A-PDF Page Crop DEMO: Purchase from www.A-PDF.com to remove the watermark


रामतीर्थस्य चोत्पत्तिं शृणुष्वैकमना मुने ॥ रावणादीन्निहत्यादौ रामो राजीवलोचनः ॥४८॥

ततः सीतासमेतः सन्नयोध्यापुरमाविशत् ॥ कृताभिषेको विप्रर्षे भ्रातृभिः सहितः सदा ॥४९॥

धर्मेण पालयन्नास्ते प्रजाः पुत्रानिवौरसान् ॥ एकदा ऋषयः सर्वे वसिष्ठागस्त्यपूर्वकाः ॥५०॥

आजग्मू रामचन्द्रस्य दर्शनार्थं मुनीश्वराः ॥ अगतान् मुनिवर्यांस्तान् प्रत्युद्गम्य कृताञ्जलिः ॥५१॥

अर्घ्याद्यैः पूजयामास प्रणिपातपुरःसरम् ॥ ततोऽब्रवीद्वसिष्ठादीन् रामः प्रवदतां वरः ॥५२॥

अद्य मे सफलं जन्म जीवितं च सुजीवितम् ॥ अद्याहं कृतकृत्योऽस्मि भवतां दर्शनेन वै ॥५३॥

इत्युक्ते रामचन्द्रेणागस्त्यः प्राह तं तदा ॥ त्वं राम पुरुषः साक्षादादिनारायणोऽव्ययः ॥५४॥

त्वया निरामयाः सर्वे वयं स्वेषु तपःसु वै ॥ इदानीं दर्शनार्थं ते वयं सर्वे समागताः ॥५५॥

ततो रामस्तु शुश्राव अगस्त्यान्मुनिसत्तमात् ॥ रावणप्रमुखानां च जन्म कर्म च रक्षसाम् ॥५६॥

श्रुत्वा मनसि निर्विण्णो रामः पप्रच्छ तानृषीन् ॥

राम उवाच ॥

ब्रह्मवंशोद्भवास्ते हि रावणाद्या निशाचराः ॥५७॥

तस्मात् सम्प्राप्तवानस्मि ब्रह्महत्यां सुदुःसहाम् ॥ तद्दोषपरिहारार्थं किं कर्तव्यं मया द्विजाः ॥५८॥

श्रद्धधानाय मे ब्रूत उपायं मुनिपुङ्गवाः ॥

अगस्त्य उवाच ॥

गोकर्णाख्यं महाक्षेत्रमस्ति वै दक्षिणापथे ॥५९॥

तत्रास्ति कोटितीर्थाख्यं सर्वपापप्रणाशनम् ॥ पश्चिमाम्बुधितीरस्थं गोकर्णं क्षेत्रमुत्तमम् ॥६०॥

ब्रह्महत्यादिपापानि दहतीति किमद्भुतम् ॥ गोकर्णं त्वं समागच्छ सीतया लक्ष्मणेन च ॥६१॥

हनूमता समं राम तपश्चर समाहितः ॥ इत्युक्ते मुनिना रामो अभिवाद्य मुनीश्वरान् ॥६२॥

सीतालक्ष्मणसंयुक्तो गोकर्णं क्षेत्रमागमत् ॥ पार्श्वे तु शतश्रृङ्गस्य पश्चिमोत्तरतो नृप ॥६३॥

तीरे सरित्पते रामो ह्याश्रमं कृतवान् ततः ॥ तपश्चचार स तदा लक्ष्मणेन समन्वितः ॥६४॥

एवं तपस्यतस्तत्र तुष्टाव परमेश्वरः ॥ तुष्टः प्रोवाच स तदा वरं ब्रूहीति सादरम् ॥६५॥

ततः प्रोवाच स तदा रामो राजीवलोचनः ॥ रावणादिवधात् प्राप्तां ब्रह्महत्यां व्यपोहय ॥६६॥

लक्ष्मणस्य च मे देव ह्येतदेव वरं मम ॥ इत्युक्ते रामचन्द्रेण ततः प्रोवाच शङ्करः ॥६७॥

तीर्थं मेतद्रामचन्द्र ब्रह्महत्यादिनाशनम् ॥ रामतीर्थ मिति ख्यातं पुण्यं भवतु सर्वतः ॥६८॥

रावणादिवधाज्जाता ब्रह्महत्या विनाशिता ॥ इतः परं कोटितीर्थे स्नात्वा चैव महाबलम् ॥६९॥

पूजयित्वा पुनस्त्वं वै अयोध्यां गच्छ राघव ॥ इत्युक्त्वान्तर्दधे शम्भुस्ततो रामस्तु हर्षितः ॥७०॥
कोटितीर्थे स्वयं स्नात्वा पूजयित्वा महाबलम् ॥ अयोध्यामगमद्रामः सीतालक्ष्मणसंयुतः ॥७१॥

नारद उवाच ॥

चैत्रमासे शुक्लपक्षे नवम्यां चैव ये जनाः ॥ स्नात्वा वै रामतीर्थे च पूजयित्वा तु राघवम् ॥७२॥
मन्त्रमष्टाक्षरं जप्त्वा ब्रह्महत्यादि नश्यति ॥ सर्वान् कामानवाप्नोति विष्णुलोकं स गच्छति ॥७३॥
य इदं पुण्यमाख्यानं रामतीर्थस्य सत्तम ॥ शृणोति श्रद्धया युक्तः सर्वान् कामानवाप्नुयात् ॥७४॥

इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे गदातीर्थपाण्डवतीर्थरामतीर्थवर्णनं नाम चतुश्चत्वारिंशोऽध्यायः ॥४४॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ४५ ॥  NEXT>>  श्लोक संख्या–५६

## ॥ भीमकुण्डम् – और्वतीर्थवर्णनम् ॥

### भीमकुण्ड

नारद उवाच ॥

गदातीर्थस्य माहात्म्यं पाण्डवानां तथैव च ॥ रामतीर्थस्य च मुने माहात्म्यं वर्णितं पुरा ॥१॥
भीमकुण्डमिति ख्यातं तीर्थमिष्टार्थसिध्दिदम् ॥ पुरा भीमाह्वयो राजा सिद्धिमाप सुदुर्लभाम् ॥२॥
पत्न्या सह नृपश्रेष्ठः किमन्यच्छ्रोतुमिच्छसि ॥

संवर्तक उवाच ॥

भीमकुण्डस्य माहात्म्यं श्रोतुमिच्छा प्रवर्तते ॥३॥
तस्याख्यानं च मे ब्रूहि श्रोतुकामाय नारद ॥ कोसौ भीमो महाबुद्धे कथं सिद्धिमुपागतः ॥४॥
गोकर्णे कुत्र नृपतिः वद मे तात साम्प्रतम् ॥

नारद उवाच ॥

पुरा कृतयुगे तात वैदर्भः पृथिवीपतिः ॥५॥
भीमो नाम महातेजाः साक्षाद्धर्म इवापरः ॥ पुत्रसंक्रामितश्रीको विरक्तः सर्ववस्तुषु ॥६॥
पत्न्या सह नृपश्रेष्ठो गोकर्णक्षेत्रमागमत् ॥ तत्र गत्वा महाराजा कृत्वाश्रमपदं शुभम् ॥७॥
तीर्थं निर्माय तत्रैव तपोवनसमीपतः ॥ गङ्गाधारस्य सविधे नियतात्मा जितेन्द्रियः ॥८॥

तपस्तेपे निराहारो घोरमुद्दिश्य शङ्करम् ॥ वर्षाणां षट्शतं राजा परमेण समाधिना ॥९॥
ततः प्रीतो महादेवस्तस्य प्रत्यक्षतां गतः ॥ स दृष्ट्वा पुरतः शम्भुं भीमो वैदर्भभूपतिः ॥१०॥
ननाम पत्न्या सहितः शङ्करं दण्डवद्भुवि ॥ तमुत्थाप्याब्रवीद्देवो वरं ब्रूहीति सादरम् ॥११॥
दातास्मि ते महाभाग यद्यपि स्यात् सदुर्लभम् ॥ इत्युक्तः शम्भुना राजा कृताञ्जलिरभाषत ॥१२॥

राजोवाच ॥

स्वर्गवासोऽक्षयो मेऽस्तु पत्न्या युक्तस्य शङ्कर ॥ प्रसादात् तव देवेश वरमेतद्वृणोम्यहम् ॥१३॥
तीर्थमेतत् सुरश्रेष्ठ सर्वपापहरं भवेत् ॥ तथेत्युक्त्वा मुनिश्रेष्ठ शङ्करः पृथिवीपतिम् ॥१४॥
ततोन्तर्धानमगमत् सोपि स्वर्गमुपेयिवान् ॥ तस्मिन् तीर्थवरे विप्र कार्तिके मासि यो नरः ॥१५॥
शुक्लपक्षे त्रयोदश्यां स्नात्वा सङ्कल्पपूर्वकम् ॥ स्थण्डिले शङ्करं पूज्य सोऽश्वमेधफलं लभेत्
॥१६॥

---

## और्वतीर्थं

नारद उवाच ॥

तस्मात् पश्चिमदिग्भागे क्रोशार्धे चाम्भसां निधेः ॥ तीरेऽस्ति शुभदं तीर्थमौर्वस्य मुनिसत्तम ॥१७॥
श्रूयतामभिधास्यामि तस्य तीर्थस्य सम्भवम् ॥ भृगुवंशोद्भवः पूर्वमौर्वो नाम महामुनिः ॥१८॥
क्रोधाविष्टस्तपस्तेपे दग्धुकामश्चराचरम् ॥ गोकर्णं समुपागम्य शतशृङ्गतटे शुभे ॥१९॥
बिन्दुतीर्थादुत्तरतः कृत्वाश्रमपदं शुभम् ॥ ब्रह्मचर्यव्रते युक्तो वाय्वम्बुकृतभोजनः ॥२०॥
घोरेण तपसा चैव रुद्रमाराधयच्चिरम् ॥ पञ्चाग्निमध्यगो भूत्वा पञ्चवर्षशतं द्विज ॥२१॥
ततस्तत्तपसा सर्वं संक्षुब्धं सचराचरम् ॥ सदेवासुरगन्धर्वं सयक्षोरगराक्षसम् ॥२२॥
सर्वमाविद्धमभवत् तपसा तस्य मोहितम् ॥ ततस्तस्याग्रतो देवः सहदेवैः पिनाकधृक् ॥२३॥
आगत्य भगवान् रुद्रो वरं ब्रूहीत्यभाषत ॥ ततश्चोन्मील्य नयने दृष्ट्वा देवं पुरःस्थितम् ॥२४॥
दण्डवत् पतितो भूमौ नत्वा स्तुत्वा जगद्गुरुम् ॥ उवाच वरदं देवमौर्वो नाम महायशाः ॥२५॥
वरं ददासि चेन्मह्यं वरार्हो यदि चाप्यहम् ॥ त्रैलोक्यदाहको वह्निर्भवेयं त्वत्प्रसादतः ॥२६॥
इति तस्य वचः श्रुत्वा तथास्त्विति पिनाकधृक् ॥ वरं दत्वा महादेवः सह देवैर्वृषध्वजः ॥२७॥
तत्रैवादर्शनं यातः शङ्करो भक्तवत्सलः ॥ और्वश्चैव ततो विप्रो वडवाग्निरजायत ॥२८॥
लेलिहानो जगत्सर्वं ज्वालामाली विभावसुः ॥ अवर्धत महावह्निर्दग्धुकामश्चराचरम् ॥२९॥
ततो ब्रह्मा जगत्स्रष्टा दृष्ट्वाग्निं सहसोत्थितम् ॥ आधावमानान् विबुधान् सह रुद्रेण विश्वसृट् ॥३०॥

तैः समेत्य जगन्नाथो ज्ञात्वा ह्यौर्वकृतं त्विदम् ॥ सह तैर्विबुधैर्विप्र क्षीराब्धेस्तटमभ्यगात् ॥३१॥
तत्राराध्य हरिं ते वै दृष्ट्वा चक्रगदाधरम् ॥ तेन सम्मन्त्र्य विबुधा गोकर्णं पुनराययुः ॥३२॥
चक्रं सुदर्शनं देवः क्षिप्तवान् तद्विभावसौ ॥ वेष्टयामास तं वह्निं विष्णुचक्रं सुदर्शनम् ॥३३॥
स चक्रान्तर्हितो भूत्वा ऊर्ध्वाग्निः समवर्धत ॥ ततस्तमिन्दुधाराभिरुपरि व्यघमद्धरिः ॥३४॥
अथोपगम्य तं विप्रं शतशृङ्गनिवासिनम् ॥ और्वमाह जगन्नाथः शङ्खचक्रगदाधरः ॥३५॥
कोपः संह्रियतां विप्र रक्षस्व भुवनत्रयम् ॥ निरागसमकाले तु न संहर्तुं त्वमर्हसि ॥३६॥
त्वमेव वह्निं विप्रेन्द्र संस्तम्भयितुमर्हसि ॥ काले हि सर्वभूतानि सृष्टानि परमेष्ठिना ॥३७॥
संह्रियन्तेऽधुना तानि वह्निना तव सुव्रत ॥ इत्युक्तः स महातेजा विष्णुना प्रभविष्णुना ॥३८॥
कृताञ्जलिपुटो भूत्वा क्षम्यतामिति चाब्रवीत् ॥ यथेच्छसि जगन्नाथ तथा तत्कर्तुमर्हसि ॥३९॥
काले प्राप्तेऽन्तिमे देव सर्वं स्थावरजङ्गमम् ॥ वह्निर्मदीयो प्रदहेत् तथा कर्तुं त्वमर्हसि ॥४०॥
मन्नाम्नाग्निरयं लोके ख्यातो भवतु केशव ॥ तपोहानिर्न मे देव त्वत्प्रसादाद्भवेन्मम ॥४१॥
तीर्थमेतत् सुरश्रेष्ठ लोके पूज्यतमं भवेत् ॥ इति श्रुत्वा वचस्तस्य और्वस्य पुरुषोत्तमः ॥४२॥

उवाच वचनं शौरिरौर्वं नाम महामुनिम् ॥ काले प्राप्तेन्तिमे पुत्र वह्निस्तव दहेज्जगत् ॥४३॥
त्वन्नाम्नाग्निर्भवेल्लोके और्व इत्यभिविश्रुतः ॥ तपोहानिश्च ते विप्र न भवेन्मत्प्रसादतः ॥४४॥
तीर्थमेतच्च ते विप्र और्वतीर्थमिति श्रुतं ॥ सर्वत्र पूज्यं भवतु बहुपुण्यप्रदायकम् ॥४५॥
इति दत्वा वरं तस्मै देवदेवो जनार्दनः ॥ अग्नेरौर्वस्य भगवान् सर्वदेवैः सह प्रभुः ॥४६॥
विधाय रक्षां विधिवत् तत्रैवान्तरधीयत ॥

संवर्तक उवाच ॥

कोसौ रक्षति विप्रर्षे और्वाग्निं वरुणालये ॥४७॥
वडवास्यः कथमभूत् तत्कथां कथयस्व मे ॥

नारद उवाच ॥

अधस्ताद्वरुणो देवो ऊर्ध्वं रक्षति चन्द्रमाः ॥४८॥
सुदर्शनं तदभितः सर्वदा पाति तं मुने ॥ एतैः संरक्ष्यते देवः सर्वभक्षो विभावसुः ॥४९॥
रुद्रवह्निरसौ विप्र क्षुद्रकुण्डेऽभवत् पुरा ॥ पुरन्दरपुरोगास्ते देवाः सम्मन्त्र्य चैकदा ॥५०॥
अश्वा ह्यादाय चौर्वास्ये मन्त्रेणाथर्वणेन हि ॥ क्षिप्ता देवैर्द्विजश्रेष्ठ तस्मात् सो वडवामुखः ॥५१॥

यत्रोत्पन्नः पुरा वह्निरौर्वस्य तपसा द्विज ॥ तदौर्वतीर्थं विख्यातं त्रिषु लोकेषु सत्तम ॥५२॥
सहस्रबिन्दोः सविधे कौबेर्यां दिशि संस्थितम् ॥ तस्मिन् स्नातः सर्वतीर्थे स्नातो भवति मानवः ॥५३॥
अश्वमेधस्य यज्ञस्य फलं प्राप्नोत्यसंशयम् ॥ सूर्यतीर्थञ्च तत्रैव चन्द्रतीर्थञ्च सत्तम ॥५४॥
अनन्ततीर्थञ्च विभो अस्ति तत्रैव पावके ॥ एतत्ते सर्वमाख्यातं यत्पृष्टोहं त्वयानघ ॥५५॥
भूयस्ते कथयिष्यामि यत्र ते रमते मतिः ॥
इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे और्वतीर्थवर्णनं नाम पञ्चचत्वारिंशोऽध्यायः॥४५॥

अध्यायाः अकारादि <<BACK ॥ अध्यायः ४६ ॥ NEXT>> श्लोक संख्या–६९

॥ सोमतीर्थवर्णनोपक्रमः – समुद्रमथनम् – विषोत्पत्तिः रुद्रेण तत् पानं ॥

## सोमतीर्थवर्णनोपक्रमः

संवर्तक उवाच ॥

चन्द्रतीर्थस्य चोत्पत्तिं सूर्यतीर्थस्य चोभयोः ॥ प्रभावं च द्विजश्रेष्ठ यथावद्वक्तुमर्हसि ॥१॥

नारद उवाच ॥

शृणुष्वावहितो विप्र कथां पापापनोदिनीम् ॥ मातृदास्यप्रमोक्षार्थं गरुडः पततां वरः ॥२॥
जित्वा सुरासुरांश्चैव सुधामाहृतवान् पुरा ॥ गरुडेन द्विजश्रेष्ठ निक्षिप्तं यत्र चामृतम् ॥३॥
तत्राभवच्चन्द्रतीर्थं सर्वलोकैकपूजितम् ॥

संवर्तक उवाच ॥

गरुडः पतगां श्रेष्ठः सुधामाहृतवान् कथम् ॥४॥
अमृतं कथमुत्पन्नं कुत्रास्ते स द्विजोत्तम ॥ तत्सर्वं श्रोतुमिच्छामि त्वत्तो विस्तरतो मुने ॥५॥
कथयस्व महाभाग भक्तायानुग्रहेण वै ॥

---

## समुद्रमथनम्

नारद उवाच ॥

श्रूयतामभिधास्यामि यत्पृष्टं भवतानघ ॥६॥
पुरा कृतयुगे विप्र देवा दैत्या महासुराः ॥ त्रैलोक्यैश्वर्यहेतुत्वात् विरोधं प्रतिपेदिरे ॥७॥

ततो युद्धमभूद्धोरं देवानां राक्षसैः सह ॥ त्रयस्त्रिंशत्कोटिसंख्या देवताः परिकीर्तिताः ॥८॥
नवाधिकनवत्यन्ताः कोटयो दैत्यदानवाः ॥ षट्षष्टिकोटयो यक्षा गुह्यका राक्षसास्तथा ॥९॥
अष्टाविंशति कोट्यस्तु किन्नरा वसवस्तथा ॥ तैः सार्धमभवद्युद्धं विप्र कल्पक्षये यथा ॥१०॥
दैत्यैः पराजिता देवा दुद्रुवुर्भयविह्वलाः ॥ त्यक्त्वा दिवं ततो देवा ब्रह्माणं शरणं ययुः ॥११॥
त्राहि त्राहि विधातस्त्वमस्मान् रक्ष च पीडनात् ॥ त्वन्नो धाता विधाता च तस्मात्त्वां शरणं गताः ॥१२॥
ततो देवगणान् दृष्ट्वा भग्नपादोरुमस्तकान् ॥ जगाद भगवान् ब्रह्मा सह देवैर्द्विजोत्तम ॥१३॥
भयं मा भूत् सुरास्तेभ्यो साधयिष्ये मनोरथान् ॥ एवमुक्त्वा ततो ब्रह्मा सह देवैर्द्विजोत्तम ॥१४॥
ययौ यत्र श्रियः कान्तो देवदेवो जगन्मयः ॥ गत्वा क्षीरोदधेस्तीरमुत्तरे देवता गणाः ॥१५॥
तं प्रणम्य हरिं वाग्भिः स्तोतुं समुपचक्रमुः ॥

देवा ऊचुः ॥

नमो नमः कारणकारणाय सूर्येन्दुनेत्राय चतुर्भुजाय ॥
नमोऽस्तु वैकुण्ठपते मुरारे नारायणाय हरये मधुसूदनाय ॥१६॥
नमोस्तु सर्वेश्वर सर्ववन्द्य सर्वोपकारकरणाय दयार्द्रमूर्ते ॥
सर्वे जनास्त्वां प्रविशन्ति चान्ते सर्वात्मकं त्वां शरणं प्रपन्नाः ॥१७॥
आर्तानस्मांस्तु दैतेयैस्त्राहि त्राहि जगद्गुरो ॥ एवं स्तुतस्तदा देवैर्भगवान् गरुडध्वजः ॥१८॥
सहस्रार्कप्रतीकाशः पद्मपत्रायतेक्षणः ॥ आविर्भूत्वा तु पुरतो देवान् प्रति वचोऽब्रवीत् ॥१९॥

श्रीभगवानुवाच ॥

मा भैषत सुरा यूयं साधयिष्ये मनोगतम् ॥ विदितं कारणं वेद्यं दैत्यानाञ्च विचेष्टितम् ॥२०॥
देवाः शृणुत भद्रंवो ह्युपायं मन्मनोगतम् ॥ अयं क्षीरोदधिर्देवा बहुयोजनविस्तृतः ॥२१॥
सर्वौषधीर्विनिक्षिप्य कुरुध्वं मन्थनं महत् ॥ मन्थानं मन्दरं कृत्वा रज्जुं कृत्वा तु वासुकिम् ॥२२॥
महोदधौ मथ्यमाने अमृतं जायते तदा ॥ उत्पन्नममृतं देवा युष्माभिः पीयते यदि ॥२३॥
न जरामरणं शोको न भयं खेदमप्युत ॥ विघ्नेभ्यो बहुसंख्येभ्यो रक्षिष्यामि च पद्मज ॥२४॥
नारायण्याभिधानेन साधयिष्येऽमृतं महत् ॥ दैत्यानां देवतानां च सन्धिं कुरु महामते ॥२५॥
कार्यं यावत् साधयन्ति तावत् सधिं समाश्रय ॥ इत्युक्त्वान्तर्दधे विष्णुर्भगवान् पावकात्मज ॥२६॥
ते सर्वे प्रत्ययुर्देवाः सन्धिं कृत्वा तु दानवैः ॥ देवदैत्यादयः सर्वे तृणवीरुल्लतौषधीः ॥२७॥

निक्षिप्य मन्दराद्रेश्च समीपं प्रतिपेदिरे ॥ ऊचुर्मन्दरशैलं ते मन्दराद्रे महाचल ॥२८॥
अमृतोन्मथनेऽस्माकं सहायं कुरु साम्प्रतम् ॥ ददामि यौवराज्यं ते कौमारं मन्दराचल ॥२९॥
इति दत्वा वरं ब्रह्मा समुत्पाट्य गिरिं सुराः ॥ आरोप्यांसे देव दैत्या बभूवुर्भारपीडिताः ॥३०॥
गत्वा क्षीरोदधेस्तीरं भारार्ता भृशदुःखिताः ॥ गतासवो निपेतुस्ते सस्मरुः पुरुषोत्तमम् ॥३१॥
हरिर्गरुडमारूढो निमेषार्धेन चागमत् ॥ तेन दृष्टाश्च ते सर्वे उत्थिताः पूर्ववत् सुखम् ॥३२॥
दृष्ट्वाग्रतो देवदेवं रमाकान्तमनामयम् ॥ स्तुत्वा प्रणम्य ते सर्वे जहसुर्जातसम्भ्रमाः ॥३३॥
आजानुमात्रमुद्धृत्य निःसत्वा देवदानवाः ॥ विस्तारं पञ्चसाहस्रयोजनं तं प्रचक्षते ॥३४॥
उच्छ्रितं दशसाहस्रयोजनं तं द्विजोत्तम ॥ वोढुं त्वशक्तास्तं शैलमुद्विग्ना देवदानवाः ॥३५॥
ततो हरिस्तद्विदित्वा वामहस्तेन लीलया ॥ उद्धृत्य काश्यपेयस्य शिरसि क्षिप्तवान् स्वयम् ॥३६॥
क्षीराब्धिमध्यगो भूत्वा लीलया ह्यवरुह्य तम् ॥ विष्णुना सह पाताळं ययुर्भोगवतीं प्रति ॥३७॥
नेत्राङ्गं वासुकिं कृत्वा उद्यता देवदानवाः ॥ रसातले स्थितां तां तु पुरीं भोगवतीं गताः ॥३८॥
ददृशुर्नागराजस्य राजधानीञ्च वासुकेः ॥ इन्द्रनीलमये रम्ये चन्द्रकान्तशिलातले ॥३९॥
वैढूर्यसोपानकृतवीथिमार्गे मनोरमे ॥ भोगवत्याश्चतुर्द्वारं महाकक्ष्यासमावृतम् ॥४०॥
सप्तत्यशीतिसाहस्रस्तम्भपङ्क्तिभिरावृते ॥ मौक्तिकैश्च वितानैश्च युते सिंहासने शुभे ॥४१॥
आवृतं परिवारेण नागकन्यागणैः सदा ॥ स्तुवन्ति चैव गायन्ति सिंहासनगतं प्रभुम् ॥४२॥
एवं विधैश्चर्ययुतं नागेन्द्रं ददृशुस्तदा ॥ द्वास्थैराज्ञापिताः सर्वे विष्ण्वाद्याश्च सुरासुराः ॥४३॥
अन्तः प्रविश्य नागस्य उत्सवं ददृशुर्द्विज ॥ वैकुण्ठादधिकैश्वर्यं दृष्ट्वा विष्णुः सनातनः ॥४४॥
नासाग्रे स्वाङ्गुलिं कृत्वा विस्मयं परमं ययौ ॥ वासुकिर् दृष्टवान् विष्णुं सह देवैः समागतम् ॥४५॥
प्रत्युत्थायासनं दत्वा कुसुमाञ्जलिभिर्युतः ॥ व्यकिरच्चार्घ्यमित्युक्त्वा पादयोः कुसुमाञ्जलिम् ॥४६॥
स्तोत्रेण शास्त्रवाक्येन स्तुत्वा नागेन्द्र उच्चकैः ॥ नृत्तैर्गीतैश्च वाद्यैश्च तोषयामास चामरान् ॥४७॥
देवाः प्रहृष्टमनसो वासुकिं वीक्ष्य सत्तम ॥ ततो विष्णुरुवाचेदं वासुकिं गरुडध्वजः ॥४८॥

विष्णुरुवाच ॥

वासुके शृणु मद्वाक्यं ममांशस्त्वं न संशयः ॥ नेत्रार्थं याचमानांश्च अस्मान् पाहि विषायुध ॥४९॥
त्वं समर्थोसि जगतां पालने मम सम्मतः ॥ ब्रह्मकोपोद्भवस्त्वं हि दक्षनेत्रात् समुत्थितः ॥५०॥

तस्मिन् काले तव ब्रह्मा ददौ वरमनुत्तमम् ॥ सुरासुरैर्मथ्यमाने क्षीराब्धौ मन्दराचले ॥५१॥
तदा त्वं नेत्ररूपेण देव कार्याणि साधय ॥ एवं ददौ वरं ब्रह्मा पूर्वं तव पितामहः ॥५२॥
तस्मात्त्वं नेत्रकार्येषु समर्थोसि विषायुध ॥ देवतांशं यथाभागममृतं च प्रदीयते ॥५३॥
इत्युक्ते सर्पराजस्तु तथास्त्विति जगाद सः ॥ गवार्थे ब्राह्मणार्थे च देवार्थे स्वेष्टदैवते ॥५४॥
गुर्वर्थे च हितार्थे च सत्यार्थं स्वतनुं त्यजेत् ॥ इति मत्वा सर्पराजो देवकार्यार्थगौरवम् ॥५५॥
जय शब्दैर्नमः शब्दैर्बहुवादित्रनिस्वनैः ॥ ते जग्मुः क्षीरजलधिं मन्दराचलसन्निधिम् ॥५६॥
ततो देवाश्च दैत्याश्च नेत्रं कृत्वा तु वासुकिम् ॥ मन्थानं मन्दरं कृत्वा ममन्थुः क्षीरसागरम् ॥५७॥
शिरोभागं गृहीत्वा तु तूष्णीं भूत्वा दितेः सुताः ॥ न गृह्णीमो वयं पुच्छे महोरगममङ्गलम् ॥५८॥
वयं कार्यार्थिनो यस्मादिति पुच्छं तु देवताः ॥ मथ्यमाने समुत्पन्नतरङ्गावर्तकेन च ॥५९॥
निवर्तमानः सोद्रिर्वै ह्यनाधारस्त्वधोऽविशत् ॥ लक्षयोजनतः कूर्मरूपो भूत्वा हरिः स्वयम् ॥६०॥
पृष्ठे दधाराद्रिवरं देवकार्यचिकीर्षया ॥

---

## विषोत्पत्तिः रुद्रेण तत् पानं

असहिष्णुः सर्पराजो उदवमद्विषमुल्बणम् ॥६१॥
(तस्य निश्वाससन्तप्ता दैत्याः केचित् गतासवः ॥ मन्थमाना निपेतुर्वै ततोन्यद् भयमुद्गतम् ॥६२॥
मथ्यमाने च क्षीराब्धौ ओषधीनां च किल्बिषम् ॥ संहत्य चादौ सम्भूतं कालकूटं महाविषम्
॥६३॥)
विषं च योजनमितमापतन्तं भयानकम् ॥ ज्वालया परिभूतास्ते प्राणत्राणपरायणाः ॥ ६४॥
दशदिक्षु गताः सर्वे सुरासुरमहोरगाः ॥ स्वं स्वं स्थानं तदा त्यक्त्वा ब्रह्मविष्णुपुरोगमाः ॥६५॥
सनकाद्या मुनिवराः कैलासं प्रत्ययुर्द्रुतम् ॥ स्तोत्रेणाबोधयन् शम्भुं रक्षस्वेति पुनः पुनः ॥६६॥
एवं संप्रार्थितो देवः शङ्करो भक्तवत्सलः ॥ रक्षितुं सर्वभूतानि विषं जग्धुं मनो दधे ॥६७॥
ततः करतलीकृत्य पपौ रुद्रस्तदा विषम् ॥ ततः प्रभृति लोकेऽस्मिन्नीलकण्ठो बभूव सः ॥६८॥
तदा तद्विषवातेन स्पृष्टास्ते वृश्चिकादयः ॥ तदादितो विषैर्युक्ता अभवन् मुनिसत्तम ॥६९॥
इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे समुद्रमथने विषोत्पत्ति वर्णनं
नामषट्चत्वारिंशोऽध्यायः ॥४६॥

॥ सोमतीर्थवर्णने अमृतोत्पत्तिः– देवानां अमृतप्राप्तिः ॥

## अमृतोत्पत्तिः

नारद उवाच ॥

विषं पीतं च रुद्रेण श्रुत्वा ब्रह्मादयः सुराः ॥ तथा दैत्यगणाः सर्वे कैलासं प्रत्ययुर्द्रुतम् ॥१॥
महादेवमुमाकान्तं दृष्ट्वा रुद्रं ततः सुराः ॥ विषं पीत्वा नीलकण्ठं सनकादिभिरावृतम् ॥२॥
हृष्टाः प्रणेमुस्ते सर्वे स्तोतुं समुपचक्रमुः ॥

देवा ऊचुः ॥

नमोस्तु देवाय वृषासनाय गौरीसमेताय दिगम्बराय ॥
नमोस्तु हालाहलकन्धराय श्रीनीलकण्ठाय नमो नमस्ते ॥३॥
क्षीराब्धिमध्ये गरलं समुत्थं दृष्ट्वेव देवासुरपन्नगाद्याः ॥
भीताः पलायन्त दिशोदशश्च त्रातारमन्यं ह्यभितो न जग्मुः ॥४॥
त्वयैव पीतं गरलञ्च भीकरं त्रातं हि कृत्स्नं सचराचरं ततम् ॥
त्रातुं समस्तं सचराचरं बहिस्तथा शरीरस्थमपीह रक्षितुम् ॥५॥
तस्माद्गले स्थापितमञ्जसा त्वया तथा विषं नीलमणिर्यथा गले ॥
विषोत्थितं नो भयमप्यपास्तं श्रीनीलकण्ठाय नमो नमस्ते ॥६॥
इति स्तुत्वा तदा देवाः कृताञ्जलिपुटा द्विज ॥ भक्त्या प्रणम्य शिरसा इदं वचनमब्रुवन् ॥७॥
त्रिपुरान्तक देवेश सृष्टिस्थित्यन्तकारक ॥ इदानीं विषपानेन कृतं कार्यं महत्तरम् ॥८॥
त्वदन्यस्त्वीदृशं कर्तुं समर्थो नास्ति कुत्रचित् ॥ अनारम्भस्तु कार्याणां प्रथमं बुद्धिलक्षणम् ॥९॥
अस्माभिरमृतार्थं तु मथितः क्षीरसागरः ॥ इदानीं नामृतं जातं तदागन्तुं त्वमर्हसि ॥१०॥
त्वामृते देवदेवेश रक्षको नो न विद्यते ॥ तस्मात्त्वया विना देव ह्यमृतं हि न जायते ॥११॥
त्वं गत्वा त्वमृतं लब्ध्वा पाहि नो करुणाकर ॥ इति श्रुत्वा महादेवो देवानां वचनं मुदा ॥१२॥
उवाच वचनं शम्भुर्गम्यतामाशु तत्र वै ॥ कृतं महत्तरं कार्यं साधयिष्याम्यहं सुराः ॥१३॥
हित्वा चिन्तां कुरुध्वं वै यत्नं तत्कार्यसाधने ॥ इत्युक्त्वा तु महादेवो वृषारूढः प्रियान्वितः

॥१४॥

गणेशवीरभद्रादिषण्मुखादिगणान्वितः ॥ हरिणा ब्रह्मणा सार्धं ससुरासुरपन्नगैः ॥१५॥

क्षीरसागरमासाद्य मन्थानं कर्तुमारभन् ॥ मथ्यमाने तदा सर्वैरभूत् क्षीरनिधौ द्विज ॥१६॥

ततो ज्वालाकुलो वह्निस्ततः सर्पिरभूत् द्विज ॥ वह्निज्वालां तदा सर्वे वोढुं तत्र सुरासुराः ॥१७॥

न शक्ताः शरणं जग्मुरुमासहितमीश्वरम् ॥ श्रान्तान् दृष्ट्वा तदा देवस्तेभ्यः शक्तिं प्रदत्तवान् ॥१८॥

ततो ममन्थुस्ते सर्वे गृहीत्वा वासुकिं द्विज ॥ ततस्तत्सलिलं सर्वे चक्रतुर्भृशमाविलम् ॥१९॥

एवं बहुप्रयत्नेन मथिते क्षीरवारिधौ ॥ ज्येष्ठादेवी समुत्पन्ना सुष्टुलक्षणसंयुता ॥२०॥

ततः समस्तलोकानां मनोहृदयनन्दनः ॥ सागराद्वै समुत्पन्नः सोमः शीतांशुरुज्वलन् ॥२१॥

ततो लक्ष्मीः समुत्पन्ना सर्वाभरणभूषिता ॥ तत्र प्राप्ता तु सा देवी यत्रास्ते गरुडध्वजः ॥२२॥

ततः सुरा कौस्तुभाख्यं रत्नं शार्ङ्गधनुस्ततः ॥ ते उभे विष्णुमायाते पारिजातश्च कामधुक् ॥२३॥

ऐरावतोऽश्वरत्नं च जग्मुस्ते वज्रिसन्निधिम् ॥ रम्भादिदेववनिताः सारभूतास्त्रिविष्टपे ॥२५॥

अश्वः सप्तमुखश्चैव आदित्यरथमागमत् ॥ पाञ्जजन्यं ततो जज्ञे विष्णुहस्ताग्रभूषणम् ॥२५॥

धन्वन्तरिस्ततो देवो वपुष्मानुदतिष्ठत ॥ श्वेतं कुम्भञ्च सङ्गृह्य सम्पूर्णं ह्यमृतेन वै ॥२६॥

---

## देवानां अमृतप्राप्तिः

धन्वन्तरिं ततो दृष्ट्वा दानवा ह्यमृतान्वितम् ॥ तद्विकृष्य तु पीयूषं स्वाधीनं चक्रुरञ्जसा ॥२७॥

ततो महाध्वनिरभून्ममेदमिति जल्पताम् ॥ अमृतार्थं दानवानां तच्छ्रुत्वा भगवान् हरिः ॥२८॥

ससर्ज मोहिनीमायां मनोहृदयनन्दिनीम् ॥ रूपौदार्यविचित्राङ्गीं मत्तद्विरदगामिनीम् ॥२९॥

ततः सा दिव्यवनिता दानवानां कुलं ययौ ॥ तत्र गत्वाऽभ्युवाचेदं मद्धस्ते दीयतामिति ॥३०॥

ततस्तदमृतं तस्यै ददुस्ते मूढचेतसः ॥ ततोऽपराणि मुख्यानि नाना प्रहरणानि च ॥३१॥

प्रगृह्याभ्यद्रवन् देवान् सहिता दैत्यदानवाः ॥ ततस्तदमृतं देवो विष्णुरादाय छद्मना ॥३२॥

जगाम दानवेन्द्रेभ्यो सुधया सहितः प्रभुः ॥ दैत्यसङ्घैश्च सहितान् आह देवगणान् प्रभुः ॥३३॥

उपविश्यासने सार्धं पिबध्वममृतं समम् ॥ मया वितीर्यते सम्यक् किमर्थं कलहश्च वाम् ॥३४॥

तथेत्युक्त्वोपविष्टा वै देवा दैत्यगणैः सह ॥ मायामोहिनिरूपेण विततार सुधां हरिः ॥

ततः सुरगणाः सर्वे प्रापुस्तदमृतं मुने ॥ दैत्यदानवसङ्घास्ते सुधां नापुरनुत्तमाम् ॥३५॥

ततः पिबत्सु तत्काले देवेष्वमृतमुत्तमम् ॥ राहुर्विबुधरूपेण दानवः प्रापिबत् सुधाम् ॥३६॥

तस्य कण्ठमनुप्राप्ते दानवस्यामृते मुने ॥ आख्यातश्चन्द्रसूर्याभ्यां देवानां हितकाम्यया ॥३७॥
तत् ज्ञात्वा भगवान् विष्णुश्चक्रमादाय सत्वरम् ॥ चकर्त विष्णुः सद्यस्तु दानवस्य शिरो महत् ॥३८॥
शिरोभागो ह्यभूदेकः अधोभागस्तथापरः ॥ तावुभौ देवता ग्रस्तुमायातौ तु भयङ्करौ ॥३९॥
ततो देवा मिलित्वा तु ददुर्ग्रासमनुत्तमम् ॥ राहुकेतू युवां भूत्वा कुरुतो ग्रासमञ्जसा ॥४०॥
पर्वकाले तु सम्प्राप्ते चन्द्रसूर्यौ तथाऽनघौ ॥ इति ताभ्यां वरं दत्वा देवा विष्णुपुरोगमाः ॥४१॥
ततो विहाय भगवान् स्त्रीरूपमतुलं हरिः ॥ नाना प्रहरणैस्तीक्ष्णैर्दानवान् समकम्पयत् ॥४२॥
ततः प्रवृत्तः सङ्ग्रामः समीपे लवणाम्बुधेः ॥ सुराणामसुराणां च तदाऽतिभयदो महान् ॥४३॥
ततो सुराश्च संविग्ना वमन्तो रुधिरं बहु ॥ असिशक्तिगदारुग्णा निपेतुर्धरणीतले ॥४४॥
शिरांसि पट्टसैश्चापि छिन्नानि युधि दारुणैः ॥ ततो रवः सम्बभूव तत्र तत्र समन्ततः ॥४५॥
एवं सुतुमुले युद्धे वर्तमाने महाहवे ॥ नरनारायणौ देवौ तदाऽऽजग्मतुराहवम् ॥४६॥
तत्र दिव्यं धनुर्धृत्वा युयुधे भगवान्नरः ॥ चिन्तयामास वै चक्रं विष्णुर्दानवसूदनम् ॥४६॥
ततोम्बरात् समायातं विष्णुचक्रमरिन्दमम् ॥ व्यदारयत्तदा दैत्यान् शतशोऽथ सहस्रशः ॥४७॥
विष्णुचक्रेण सर्वे ते छिन्नाः पेतू रणाजिरे ॥ ततोऽसुरगणाः सर्वे भयसंविग्नचेतसः ॥४८॥
दिगन्तरान् समुद्रांश्च अर्दिता विविशुर्भृशम् ॥ ततः सर्वैः समेतैश्च गमितो मन्दराचलः ॥४९॥
यथास्थानं यथाजोषं स्थापितोऽभूत्तदामरैः ॥ वासुकी नागराजस्तु यथापूर्वमतिष्ठत ॥५०॥
ततोऽमृतं समादाय देवगन्धर्वकिन्नराः ॥ स्वर्गलोकं समानीय शक्रस्यान्तःपुरे शुभे ॥५१॥
रक्षां कृत्वा बहुविधां स्थापयामासुरञ्जसा ॥ मुदा परमया युक्ता ह्यैश्वर्यं प्रतिपेदिरे ॥५२॥

नारद उवाच ॥

एतत्ते सर्वमाख्यातममृतं मथितं यथा ॥ देवदैत्यैर्यथा पीतं स्थापितं च यथा ह्यभूत् ॥५३॥
संवर्तक महाबुद्धे किमन्यच्छ्रोतुमिच्छसि ॥५४॥

इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे अमृतोत्पत्ति पानस्थापनं नाम सप्तचत्वारिंशोऽध्यायः ॥४७॥

## ॥ सोमतीर्थवर्णने–अमृताहरणाय गरुडस्य प्रस्थानम् ॥

### अमृताहरणाय गरुडस्य प्रस्थानम्

संवर्तक उवाच ॥

मातृदास्यविमोक्षार्थं गरुडः पपतां वरः ॥ देवलोके सुरैर्गुप्तां सुधामानीतवान् कथम् ॥१॥
एतद्विस्तरतो मेऽद्य मुने वक्तुं त्वमर्हसि ॥

नारद उवाच ॥

शृणु विप्र प्रवक्ष्यामि गरुडः पक्षिराट् पुरा ॥२॥
यथा सुधामाहृतवान् तथा त्वं द्विजसत्तम ॥ कद्रुश्च विनता चैव उभे ते काश्यपस्त्रियौ ॥३॥
उच्चैश्रवसहेतुत्वात् पणं कृत्वा तु ते उभे ॥ विनता पक्षिमाता तु दास्यभूत् कद्रुवेश्मनि ॥४॥
नीचकर्मकरी नित्यमास्ते दुःखेन तद्गृहे ॥ एकदा सर्पमाता सा विनतामिदमब्रवीत् ॥५॥
शृणु भद्रे वचो मेऽद्य सपुत्रां मां समावह ॥ सूर्यमण्डलपर्यन्तं पश्येयं सूर्यमण्डलम् ॥६॥
तच्छ्रुत्वा विनता देवी पुत्रमाहूय चाब्रवीत् ॥ पुत्र त्वं हि महावीर्य ससुतां कद्रुमावह ॥७॥
सूर्यमण्डलपर्यन्तं गमयित्वा पुनर्द्रुतम् ॥ यथास्थानं प्रापयस्व त्वं हि मत्प्रियकृद्यतः ॥८॥
तथास्त्विति प्रणम्यैव मातरं पक्षिसत्तमः ॥ ससुतां कद्रुमावाह्य स्वशरीरे विहायसम् ॥९॥
उत्पत्य निमिषार्धेन सूर्यमण्डलमभ्यगात् ॥ सूर्यरश्मिपरीताङ्गाः पन्नगाः पतिता भुवि ॥१०॥
कद्रुश्च तप्तसर्वाङ्ग ह्यस्तौषीदिन्द्रदैवतम् ॥ ततो वृष्टिरभूत्तत्र द्रवीभूता च सा क्षणात् ॥११॥
उवाच तार्क्ष्यं सा देवी मां प्रापय गृहं द्रुतम् ॥ इत्युक्ते गरुडस्तां वै प्रापयामास वेश्म तत् ॥१२॥
ततः सुपर्णस्तरसा मातुरन्तिकमभ्यगात् ॥ नमस्कृत्वा स्वजननीमिदं वचनमब्रवीत् ॥१३॥
किं कारणं मया मातः कर्तव्यं सर्पभाषितम् ॥

विनतोवाच ॥

उच्चैश्रवसहेतुत्वात् पणमाधाय पुत्रक ॥१४॥
उच्चैश्रवाः श्वेतवालो इत्यहं चाब्रवं सुत ॥ न तथा कृष्णवालोऽयमिति कद्रुरुवाच ह ॥१५॥
ततः समीपमासाद्य दृष्टे कृष्णमयो ह्यभूत् ॥ नागास्तु कृष्णरूपेण वालमध्येऽवसन् किल ॥१६॥
ततः कद्रुगृहे पुत्र दासीभूत्वाऽवसं चिरम् ॥ एतत्ते कथितं पुत्र दास्यकारणमित्युत ॥१७॥
इति मातृवचः श्रुत्वा गरुडः पततां वरः ॥ अतीव दुःखमापन्नो मातरं वाक्यमब्रवीत् ॥१८॥
मातर्मा कुरु दुःखं त्वं दास्यं मोक्ष्ये तवेदृशम् ॥ इत्युक्त्वा मातरं तार्क्ष्यः सर्पानिदमुवाच ह ॥१९॥

नागाः शणुत मद्वाक्यं माता मम यशस्विनी ॥ दास्याद्विमुक्ता केन स्यात् किं देयं वस्तु वो ध्रुवम् ॥२०॥

इति तार्क्ष्यवचः श्रुत्वा नागाः सञ्चिन्त्य चेतसि ॥ ऊचुर्गरुडमावेक्ष्य अमृतं यदि दास्यसि ॥२१॥

दासीभावाच्च ते माता मुच्यते नात्र संशयः ॥ इत्युक्तो गरुडः सर्पैस्ततो मातरमब्रवीत् ॥२२॥

गच्छाम्यमृतमाहर्तुं मातर्भक्ष्यं प्रदेहि मे ॥

विनतोवाच ॥

समुद्रकुक्षौ तनय निषादाः सन्ति भूरिशः ॥२३॥

पापिष्ठाश्च दुराचारा निर्घृणाः पापहिंसकाः ॥ तेषां मध्ये द्विजश्चैको वसति ब्राह्मणाधमः ॥२४॥

हित्वा तं ब्राह्मणं पुत्र निषादान् पापचेतसः ॥ तान् भक्षयित्वा पुत्राद्य अमृतं क्षिप्रमाहर ॥२५॥

गरुड उवाच ॥

कतमं वाभिजानीयां ब्राह्मणं लक्षणैः शुभैः ॥ तन्मे कारणतो मातर्वक्तुमर्हस्यशेषतः ॥२६॥

विनतोवाच ॥

यस्ते कण्ठमनुप्राप्तो ब्राह्मणो हि द्विजोत्तमः ॥ दहेदङ्गारवत् पुत्र तमवेहि द्विजोत्तमम् ॥२७॥

विनता पुनराहेदं पुत्रस्नेहेन भामिनी ॥ जानामि तेऽतुलं वीर्यमाशीर्वादं वदामि ते ॥२८॥

पक्षौ ते मारुतः पातु चन्द्रः पृष्टं च पुत्रक ॥ शिरस्तु पातु ते वह्निर्विष्णुः सर्वगतोऽवतु ॥२९॥

अहञ्च ते सदा पुत्र कार्यस्वस्तिपरायणा ॥ व्रतोपवासपरमा भवामि जयसिद्धये ॥३०॥

यावदागमनं पुत्र सुरलोकाद्गृहे मम ॥ तस्माच्छीघ्रं प्रयाहि त्वं कार्यं तव भविष्यति ॥३१॥

ततो मातृवचः श्रुत्वा आशीर्वादं प्रगृह्य च ॥ उत्पत्य गगने शीघ्रं निषादा यत्र संस्थिताः ॥३२॥

तत्र गत्वा समालोक्य निषादानन्तकोपमः ॥ ततो जिघत्सुस्तान् तार्क्ष्यः रजःपुञ्जं विनिर्ममे ॥३३॥

पक्षवातं भृशं चक्रे तत्रस्थान् पर्वतान् बहून् ॥ कम्पयामास गरुडः स्थितः पर्वतसन्निभः ॥३४॥

विस्तीर्णमाननं चक्रे तन्मार्गमवरुध्य सः ॥ ततो निषादाः परितोऽधावन् मार्गलिप्सया ॥३५॥

ततस्तदाननं मार्गं निषादा ददृशुस्तदा ॥ भयोद्विग्नास्तत्र जग्मुरुदरं विविशुः क्षणात् ॥३६॥

तन्मध्ये ब्राह्मणस्तूर्णं सहभार्यस्तदागमत् ॥ दहन् दीप्त इवाङ्गारस्तमुवाच खगाधिपः ॥३७॥

द्विजाधम विनिर्गच्छ तूर्णमास्याद्बहिर्मम ॥ न हि मे ब्राह्मणो वध्यः पापेष्वभिरतोऽपि सन् ॥३८॥

ब्रुवाणमेवं गरुडं ब्राह्मणः प्रत्यभाषत ॥ निषादी मम भार्येयं निर्गच्छेत मया सह ॥३९॥

गरुड उवाच ॥

निषादीमपि सङ्गृह्य निर्गच्छ त्वं ममास्यतः ॥ तच्छ्रुत्वा ब्राह्मणो वाक्यं निषाद्या सह भार्यया ॥४०॥
बहिर्जगामेष्टदेशं निषादान् जग्धवान् खगः ॥ वितत्य पक्षावाकाशमुत्पपात मनोजवः ॥४१॥
ततोऽपश्यत् स्वपितरं काश्यपं दीप्ततेजसम् ॥ पृष्टश्च पित्रा खगराट् क्व गन्तासि वदार्भक ॥४२॥

गरुड उवाच ॥

अहं नु सर्पैः प्रहितः सोममाहर्तुमुद्यतः ॥ मातुर्दास्यविमोक्षार्थमाहरिष्ये तदद्य वै ॥४३॥
मात्रा चाहं समादिष्टो निषादान् भक्षयेति वै ॥ न च तृप्तिरभूत्तात भक्षयित्वापि तान् बहून् ॥४४॥
तस्मात् त्वयापि भक्ष्यं मे भगवन् सम्प्रदीयताम् ॥ यद्भुक्त्वाहं समर्थः स्यां ह्याहर्तुममृतं पितः ॥४५॥

काश्यप उवाच ॥

शृणु त्वं वत्स भद्रन्ते कथां वैरानुबन्धिनीम् ॥ भ्रात्रोरर्थविभागार्थं समुत्पन्ना पुराण्डज ॥४६॥
आसीद्विभावसुर्नाम महर्षिः कोपनो भृशम् ॥ भ्राता तस्यानुजश्चासीत् सुप्रतीको महातपाः ॥४७॥
स नैच्छति धनं चैत्र्यमेकस्थं मोहितो मुनिः ॥ विभागं कीर्तयत्येव सुप्रतीकोऽनिशं द्विज ॥४८॥
अथाऽब्रवीत् स तं भ्राता सुप्रतीकं विभावसुः ॥ विभागं बहवो मोहात् कर्तुमिच्छन्ति नित्यशः ॥४९॥
ततो विभक्ताश्चान्योन्यं नाद्रियन्तेऽर्थमोहिताः ॥ ततः स्वार्थपरा मूढा पृथग्भूताः स्वकैर्जनैः ॥५०॥
बन्धुभेदपरीतास्ते निरयेषु पतन्त्यधः ॥ तस्माद्भ्रातर्विभागं हि न प्रशंसन्ति पण्डिताः ॥५१॥
गुरुशास्त्रप्रबुद्धानामन्योन्यमभिशंसिनाम् ॥ नियन्तुं न हि शक्तस्त्वं भेदतो धनमिच्छसि ॥५२॥
यस्मात्तस्मात् सुप्रतीक हस्तित्वं समवाप्स्यसि ॥ शप्तस्त्वेवं सुप्रतीको विभावसुमथाब्रवीत् ॥५३॥
त्वमप्यन्तर्जलचरः कच्छपस्तु भविष्यसि ॥ एवमन्योन्यशापात्तौ सुप्रतीकविभावसू ॥५४॥
गजकच्छपतां प्राप्तावास्तां तौ मूढचेतसौ ॥ पूर्ववैरानुसारेण प्रमाणबलदर्पितौ ॥५५॥
सरस्युपैति हस्ती स तस्य बृंहित शब्दतः ॥ कूर्मोप्यन्तर्जलचर उन्मज्जन्मोहयन् सरः ॥५६॥
तं दृष्ट्वा वेष्टितकरस्तपत्येनं गजो बली ॥ दन्तहस्ताग्रलाङ्गूलपादवेगेन वीर्यवान् ॥५७॥
विक्षोभयानस्तु सरो रम्यं बहुझषाकुलम् ॥ कूर्मोप्यभ्युद्यतशिरा युद्धायाभ्येति वीर्यवान् ॥५८॥
षड्योजनसमुच्छ्रायो गजस्तद्द्विगुणायतः ॥ कूर्मस्तु योजनोत्सेधो दशयोजनमण्डलः ॥५९॥
तावुभौ युद्धसन्नद्धौ परस्परवधैषिणौ ॥ गजकूर्मौ तु भुक्त्वैव साधयेप्सितमात्मनः ॥६०॥
इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे अमृतहरणोय प्रस्थानं नाम अष्टचत्वारिंशोऽध्यायः

॥४८॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ४९ ॥  NEXT>>  श्लोक संख्या–७८

॥ सोमतीर्थवर्णने–गरुडेन द्युलोकगमनम्– गरुडजननम् ॥

## गरुडेन द्युलोकगमनम्

नारद उवाच ॥

ततः खगाधिपो विप्र वाक्यं श्रुत्वा पितुस्तदा ॥ वितत्य पक्षौ गरुड उत्पपात विहायसि ॥१॥
ततस्तत्सर आसाद्य तौ दृष्ट्वा गजकच्छपौ ॥ नखेन गजमेकेन कूर्ममेकेन चाक्षिपत् ॥२॥
समुत्पपात चाकाशे तत उच्चैर्विहङ्गमः ॥ सो लम्बतीर्थमासाद्य देववृक्षानुपागमत् ॥३॥
ते भीताः समकम्पन्त तस्य पक्षानिलाहताः ॥ बभञ्जिरे अतितदा दिव्याः कनकशाखिनः ॥४॥
उपचक्राम गरुडो भ्राजमानान् महाद्रुमान् ॥ तेषां मध्ये महानासीत् पादपः सुमनोहरः ॥५॥
सहस्रयोजनोत्सेधो बहुशाखासमन्वितः ॥ खगानामालयो दिव्यो नाम्ना रोहिणपादपः ॥६॥
एषा मम महाशाखा शतयोजनमायता ॥ एनां शाखां समास्थाय खादेयौ गजकच्छपौ ॥७॥
इति निश्चित्य गरुडः पक्षिसाहस्रसेवितम् ॥ वेगाद्द्रुमं समागच्छत् स्पृष्टमात्रा बभञ्ज सा ॥८॥
तां भग्नां स महाशाखां स्मयमानोऽवलोकयन् ॥ ततोऽवलम्बिनोऽपश्यद् वालखिल्यानधोमुखान् ॥९॥
तेषां विनाशसन्त्रासादनुसृत्य खगोत्तमः ॥ शाखामास्येन जग्राह तेभ्यः शापभयात् खगः ॥१०॥
शनैः पर्यचरत् पक्षी पर्वतान् परिचालयत् ॥ एवं सोपपतद्देशान् बहून् सगजकच्छपः ॥११॥
दयार्थं वालखिल्यानां न च स्थानमविन्दत ॥ स गत्वा पर्वतश्रेष्ठं गन्धमादनमव्ययम् ॥१२॥
ददर्श काश्यपं तत्र पितरं तपसि स्थितम् ॥ ददर्श तं पिता चापि दिव्यरूपं विहङ्गमम् ॥१३॥
तेजोवीर्यबलोपेतं मनोमारुतरंहसम् ॥ अचिन्त्यमनभिज्ञेयं सर्वभूतभयङ्करम् ॥१४॥
अप्रधृष्यमजेयं च देवदानवराक्षसैः ॥ तमागतमभिप्रेक्ष्य भगवान् काश्यपस्तदा ॥१५॥
विदित्वा चास्य सङ्कल्पमिदं वचनमब्रवीत् ॥ पुत्र साहसं मा कार्षीः कृत्वा प्राप्स्यसि वै व्यथाम् ॥१६॥
एते दहेयुस्त्वां क्रुद्धा वालखिल्या मरीचिपाः ॥ प्रसादयामास तदा काश्यपः पुत्रकारणात् ॥१७॥

वालखिल्यान् तपः सिद्धानिदं वचनमब्रवीत् ॥ प्रजाहितार्थमारम्भो गरुडस्य तपोधनाः ॥१८॥
चिकीर्षति महत् कर्म तदनुज्ञातुमर्हथ ॥ एवमुक्ता भगवता मुनयस्ते समभ्ययुः ॥१९॥
मुक्त्वा शाखां गिरिं पुण्यं हिमवन्तं प्रपेदिरे ॥ ततस्तेष्वपयातेषु पितरं विनतात्मजः ॥२०॥
शाखाविक्षिप्तवदनः पर्यपृच्छत काश्यपम् ॥ भगवन् कुत्र मोक्ष्यामि तरुशाखामिमामहम् ॥२१॥
वर्जितं ब्राह्मणैर्देशं त्वं ममाख्यातुमर्हसि ॥ पक्षीन्द्रेणैवमुक्तस्तु काश्यपो द्विजमब्रवीत् ॥२२॥
शृणु पुत्र प्रवक्ष्यामि गुह्यदेशममानुषम् ॥ अगम्यं मनसाप्यन्यैर्हिमसंरुद्धकन्दरम् ॥२३॥
हिमाद्रेरुत्तरं पार्श्वं त्वया हि द्विजसत्तम ॥ इत्युक्तः काश्यपेनैव गरुडः पततां वरः ॥२४॥
तं चाद्रेरुत्तरं कुक्षिमुद्दिश्य महता खगः ॥ जवेन प्रययौ तार्क्ष्यः सशाखागजकच्छपः ॥२५॥
ततो गत्वा सहस्रं ह योजनं पितुराज्ञया ॥ प्रमुमोच महाशाखां लघुना तत्र खेचरः ॥२६॥
ततस्तस्य गिरेः शृङ्गे ह्यास्थाय द्विजसत्तमः ॥ भक्षयामास गरुडस्तावुभौ गजकच्छपौ ॥२७॥
ततः पर्वतकूटाग्रादुत्पपात मनोजवः ॥ प्रावर्तन्ताथ देवानां उत्पाता भयदर्शिनः ॥२८॥
इन्द्रस्य दयितं वज्रं प्रजज्वाल व्ययन्निव ॥ सधूमा चाथ सार्पिस्तु दिवोल्का नभसः च्युताः ॥२९॥
तथैव लोकपालानामादित्यानां च सर्वशः ॥ वसूनां मरुतां चैव ये चान्ये देवतागणाः ॥३०॥
तेषां प्रहरणाः सर्वे परस्परमुपाद्रवन् ॥ अभूतपूर्वं सङ्ग्रामे तथा देवासुरेष्वपि ॥३१॥
ववुर्वाताः सनिर्वाताः पेतुरुल्काः समन्ततः ॥ निरभ्रमेव चाकाशं प्रजगर्ज महास्वनम् ॥३२॥
ववर्ष रक्तवर्षाणि पर्जन्यो भयसूचकः ॥ धूममाल्यानि देवानां शेमुस्तेजांसि चैव हि ॥३३॥
ततस्तत्र समुद्विग्नः सहदेवैः शतक्रतुः ॥ उत्पातान् दारुणान् पश्यन्नित्युवाच बृहस्पतिं ॥३४॥
किमर्थं भगवन्नेते महोत्पाताः समुत्थिताः ॥ युधि शत्रून्न पश्यामि इदानीमिन्द्र ते ध्रुवम् ॥३५॥
तवापराधाद्देवेन्द्र प्रमादाच्च शतक्रतो ॥ प्रसादाद्वालखिल्यानां भूतमुत्पन्नमद्भुतम् ॥३६॥
काश्यपस्य मुनेः पुत्रो विनतागर्भसम्भवः ॥ हर्तुं सोममनुप्राप्तो बलवान् कामरूपधृक् ॥३७॥
आगत्य कृत्वा युष्माभिर्मुहूर्तं घोरसङ्गरम् ॥ धृत्वा हृत्वा सुधां देवाः क्षणेनैव गमिष्यति ॥३८॥

नारद उवाच ॥

श्रुत्वा तद्वचनं शक्रो गरुडस्य पराक्रमम् ॥ ततः क्षिप्रं समाहूय प्रोवाचामृतरक्षिणः ॥३९॥
महावीर्यबलः पक्षी हर्तुं सोममिहोद्यतः ॥ सर्वान् वो बोधयाम्यद्य गृहीतवरुणायुधाः ॥४०॥
परिवार्यामृतं सर्वे यूयं मद्वचनात् सुराः ॥ रक्षध्वं विबुधा यत्नात् यथा स न हरेद्बलात् ॥४१॥

अतुलं तु बलं तस्य बृहस्पतिरुवाच ह ॥ तच्छ्रुत्वा विबुधा वाक्यं विस्मिता यत्नमास्थिताः ॥४२॥
परितश्चामृतं तस्थौ वज्रमुद्यम्य देवराट् ॥ धारयन्तो महार्हाणि कवचानि मनस्विनः ॥४३॥
तीक्ष्णधाराणि शस्त्राणि काञ्चनाविष्कृतानि च ॥ शक्तिशूलगदादीनि प्रासतोमरयष्टिकाः ॥४४॥
देहानुरूपाण्यादाय दिव्याभरणभूषिताः ॥ दीप्तिमन्तः सुरगणा तस्थुर्युद्धाभिकांक्षिणः ॥४५॥
अमृतं रक्षितुं सर्वे यथास्वमवतस्थिरे ॥

---

## गरुडस्य जन्मकथा

संवर्तक उवाच ॥

कः प्रमादो महेन्द्रस्य कोपमाधात् द्विजेषु वै ॥४६॥
काश्यपस्य द्विजातेश्च कथं वै पक्षिराट् सुतः ॥ अधृष्यः सर्वभूतानामवध्यश्चाभवत् कथम् ॥४७॥
कथञ्च कामरूपी स कामवीर्यश्च खेचरः ॥ एतदिच्छाम्यहं श्रोतुं परं कौतूहलं हि मे ॥४८॥

नारद उवाच ॥

शृणु मे वदतः सर्वं एतत् संक्षेपतो द्विज ॥ यजतः पुत्रकाम्यस्य काश्यपस्य प्रजापतेः ॥४९॥
सहाय्यं ऋषयो देवा गन्धर्वाश्च ददुः किल ॥ तत्रेध्माऽनयने शक्रो नियुक्तः काश्यपेन हि ॥५०॥
मुनयो वालखिल्याश्च ये चान्ये देवसत्तमाः ॥ शक्रः स्ववीर्यसदृशं इध्मभारं गिरिप्रभम् ॥५१॥
ससस्यमानयामास नातिकृच्छ्रादिव प्रभुः ॥ अथापश्यदृषीन् ह्रस्वान् सर्वानङ्गुष्ठमातृकान् ॥५२॥
प्रलीनान् स्वेषु चाङ्गेषु निराहारान् तपोधनान् ॥ निमग्नान् क्लिश्यमानांश्च गोष्पदे सम्प्लुतोदके ॥५३॥
तांस्तु सर्वान् स दृष्ट्वा तु वीर्योन्मत्तः पुरन्दरः ॥ अपहास्यात्यगाच्छीघ्रं लङ्घयित्वाऽवमत्य च ॥५४॥
तेऽथ रोषसमाविष्टाः सभृशं जातमन्यवः ॥ आरेभिरे महत् कर्म तदा शक्रभयङ्करम् ॥५५॥
जुहुवुस्ते सुतपसा विधिवज्जातवेदसम् ॥ मन्त्रैरुच्चावचैर्विप्र येन कामेन तच्छृणु ॥५६॥
कामवीर्यः कामगमो देवराजभयप्रदः ॥ इन्द्रोन्यः सर्वभूतानां भवेदिति यतव्रताः ॥५७॥
इन्द्राच्छतगुणं शौर्ये गमने च मनोजवम् ॥ तपसो नः फलेनाद्य दारुणः सम्भवत्विति ॥५८॥
तच्छ्रुत्वा भृशसन्तापो देवराजः पुरन्दरः ॥ जगाम शरणं शक्रः काश्यपं शंसितव्रतम् ॥५९॥
तच्छ्रुत्वा देवराजस्य काश्यपः स बृहस्पतिः ॥ वालखिल्याऽनुपागम्य कर्मसिद्धिमपृच्छत ॥६०॥
केन कामेन चारब्धं होमकर्म द्विजर्षभाः ॥ यथा तत्वेन वै ब्रूत श्रोतुं कौतूहलं हि मे ॥६१॥

वालखिल्या ऊचुः ॥

अवज्ञाताः सुरेन्द्रेण मूढेनाक्लृप्तबुद्धिना ॥ बलोन्मत्तेन दुष्टेन नृशंसेन दुरात्मना ॥६२॥
तद्विघातार्थमारम्भो विहितं विद्धि काश्यप ॥ काश्यपस्तानुवाचेदं सान्त्वपूर्वं प्रजापतिः ॥६३॥
तदित्थं ब्राह्मणा वाक्यं कर्तुमर्हथ सत्तमाः ॥ यथा सिद्ध्येच्च भवतां सङ्कल्पोऽपि चिकीर्षितः ॥६४॥
भवत्वेवं पक्षिणां स इन्द्रोतिबलसत्ववान् ॥ प्रसादः क्रियतामद्य देवराजाय सत्तमाः ॥६५॥
एवमुक्ताः काश्यपेन वालखिल्यास्तपोधनाः ॥ प्रत्यूचुरभिसम्पूज्य मुनिश्रेष्ठाः प्रजापतिम् ॥६६॥
इन्द्रार्थोयं समारम्भः सर्वेषां नः प्रजापते ॥ अपत्यार्थोऽयमारम्भः भवतश्चायमीप्सितः ॥६७॥
तदिदं सफलं कर्म त्वयैव प्रतिगृह्यताम् ॥ तथा चैव विधत्स्वाद्य यथा श्रेयोऽनुपश्यसि ॥६८॥
एतस्मिन्नेव काले तु देवी दक्षसुता शुभा ॥ विनता नाम कल्याणी पुत्रकामा यशस्विनी ॥६९॥
ततस्तु सा व्रतपरा स्नाता पुंसवने शुचिः ॥ उपचक्राम भर्तारं तामुवाचाऽथ काश्यपः ॥७०॥
आरम्भः सफलो देवि भविताऽयं तवेप्सितः ॥ जनयिष्यामि पुत्रौ द्वौ वीरौ त्रिभुवनेश्वरौ ॥७१॥
तपसा वालखिल्यानां मम सङ्कल्पजस्तथा ॥ धार्यतां तु त्वया भद्रे गर्भोयं लोकरक्षकः ॥७२॥
एतौ पतत्रिणां भद्रे इन्द्रत्वं कारयिष्यतः ॥ इत्युदीर्य स्वभार्यां तु शतक्रतुमथाब्रवीत् ॥७३॥

काश्यप उवाच ॥

त्वत्सखायौ सुतावेतौ भ्रातरौ सम्भविष्यतः ॥ नैताभ्यां भविता दोषः सकाशात्ते पुरन्दर ॥७४॥
व्येतु ते शक्र सन्तापस्त्वमेवेन्द्रो भविष्यसि ॥ न चाप्येवं त्वया भूयः क्षेप्तव्या ब्रह्मवादिनः ॥७५॥
एवमुक्तो जगामेन्द्रो निर्विशङ्कस्त्रिविष्टपम् ॥ विनता चापि सिद्धार्था बभूव मुदिता भृशम् ॥७६॥
जनयामास पुत्रौ द्वावरुणं गरुडं तथा ॥ अरुणो विकलश्चासीदादित्यस्य पुरःसरः ॥७७॥
पतत्रिणां तु गरुडो इन्द्रत्वेनाभ्यसिच्यत ॥ तस्यैतत्तु महत्कर्म श्रूयते वह्निनन्दन ॥७८॥
इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे गरुडोत्पत्तिवर्णनं नाम एकोनचत्वारिंशोऽध्यायः ॥४९॥

## गरुडेन अमृताहरणम् इन्द्रेण पुनः अपहारः

नारद उवाच ॥

ततस्तस्मिन् द्विजश्रेष्ठ समुदीर्णे तथाविधे ॥ गरुडः पक्षिराट् तूर्णं सम्प्राप्तो विबुधालयम् ॥१॥
तं दृष्ट्वातिबलं सर्वे प्राकम्पन्त ततः सुराः ॥ परस्परं च प्रत्यघ्नन् सर्वप्रहरणानि च ॥२॥
तत्र चासीदमेयात्मा विद्युदग्निसमप्रभः ॥ भौवनः सुमहावीर्यः सोमस्य परिरक्षिता ॥३॥
स तेन पतगेन्द्रेण पक्षतुण्डेन वीक्षितः ॥ मुहूर्तमतुलं युद्धं कृत्वा विनिहतो युधि ॥४॥
रजश्चाधूय सुमहत् पक्षवातेन खेचरः ॥ कृत्वा लोकान्निरालोकांस्तेन देवानवाकिरत् ॥५॥
तेन विकीर्णरजसा देवा मोहमुपागमन् ॥ न चैनं ददृशुश्छन्ना रजसाऽमृतरक्षिणः ॥६॥
एवं स मोहयामास गरुडस्त्रिदशालयान् ॥ पक्षतुण्डप्रहारेण देवान् स विददार ह ॥७॥
ततो देवः सहस्राक्षस्तूर्णं वायुमचोदयत् ॥ विक्षिपैनां रजोवृष्टिं तवैतत् कर्म मारुत ॥८॥
अथ वायुरपोवाह तद्रजो वेगवान् बली ॥ ततो वितिमिरे जाते देवाः शकुनिमर्दयन् ॥९॥
ननादोच्चैः स भगवान् महावेगवरः खगः ॥ वध्यमानः सुरगणैः सर्वभूतानि हर्षयन् ॥१०॥
उत्पपात महावीर्यः पक्षिराट् परवीरहा ॥ तमुत्प्लुत्यान्तरिक्षे देवानामुपरिस्थितम् ॥११॥
वर्मिणो विबुधाः सर्वे नानाशस्त्रैरवाकिरन् ॥ कुर्वन् सुतुमुलं युद्धं पक्षिराणन व्यकम्पत ॥१२॥
पक्षाभ्यामायुधं सर्वं समन्ताद् व्याक्षिपत् सुरान् ॥ ते विक्षिप्तास्ततो देवाः प्रजग्मुर्गरुडार्दिताः ॥१३॥
नखतुण्डक्षताद्विप्र सुस्रावासृक् तदा बहु ॥ तान् दृष्ट्वा पतगश्रेष्ठः सर्वानुत्क्रान्तजीवितान् ॥१४॥
अभिगम्यामृतस्थानं सर्वतोग्निमपश्यत ॥ आवृण्वानं महाज्वालमभितः सर्वतो दिशि ॥१५॥
नभःस्पृशन्तं दुष्प्रेक्ष्यं सर्वभूतभयङ्करम् ॥ त्रियोजनप्रमाणेन वर्तुलं देवनिर्मितम् ॥१६॥
तं दृष्ट्वा स महावीर्यश्चिन्तयामास खेचरः ॥ केनोपायेन सप्तार्चिं नाशयिष्येऽतिदुःसहम् ॥१७॥
चिन्तयानस्तु बहुशस्तदुपायं प्रबुद्धवान् ॥ नदीजलमुपानीय प्रक्षिपाम्यनलोपरि ॥१८॥
मुखानां नवतिं कृत्वा ततस्तार्क्ष्यः प्रतापवान् ॥ एवं बुध्वा ततः पक्षी नदीजलमथानयत् ॥१९॥
तमग्निं शमयामास स जलैर्बहुभिर्द्विज ॥ ततोऽग्निं शमयित्वैवं तत्र गत्वा खगेश्वरः ॥२०॥
स चक्रं क्षुरसादृश्यमपश्यदमृतान्तिके ॥ परिभ्रमन्तमनिशं तीक्ष्णधारामयं द्विज ॥२१॥
तस्यान्तरं स दृष्ट्वैव पर्यवर्तत खेचरः ॥ अधश्चक्रस्य तस्याथ दीप्तानलसमद्युती ॥२२॥
विद्युज्जिह्वौ महाघोरौ दीप्तास्यौ दीप्तलोचनौ ॥ अमृतस्यैव रक्षार्थं नियुक्तौ सुरसत्तमैः ॥२३॥

तौ ददर्श महावीर्यौ गरुडो भुजगोत्तमौ ॥ सदा संरब्धनयनौ सदा चानिमिषेक्षणौ ॥२४॥
योजनायामसंयुक्तौ कृष्णाङ्गौ स्वस्तिकान्वितौ ॥ तयोरेकोपि सम्पश्येत् स तूर्णं भस्मसाद्भवेत् ॥२५॥
स तौ दृष्ट्वा विचित्याशु वञ्चये हरिभोजनौ ॥ इति सञ्चिन्त्य गरुडस्तद्दृष्टिं रजसावृणोत् ॥२६॥
अदृष्टपूर्वस्ताभ्यां च वेगेन पतगेश्वरः ॥ तयोरुपरि चंक्रम्य वैनतेयोन्तरिक्षगः ॥२७॥
आभिद्य सहसा मध्ये सोमममभ्यपतत्ततः ॥ समुत्पात्यामृतं तत्तु वैनतेयस्तदा बली ॥२८॥
उत्पपात जवेनैव यत्तदुन्मथ्य वीर्यवान् ॥ अगच्छदपरिश्रान्तस्ततश्चाकाशमार्गगः ॥२९॥
विष्णुना तु तदा दृष्टो वैनतेयो यदेयिवान् ॥ ततो नारायणस्तुष्टस्तेनातुल्येन कर्मणा ॥३०॥
तमुवाचाव्ययो देवो वरदोस्मीति खेचरम् ॥ उवाच गरुडो भूयो नारायणमिदं वचः ॥३१॥
अमृतश्चाजरश्चाख्याममृतेन विनाप्यहम् ॥ तथास्त्विति स तेनोक्तो विष्णुना प्रभविष्णुना ॥३२॥
प्रतिगृह्य वरं तं च गरुडो विष्णुमब्रवीत् ॥ भवतेऽपि वरं दद्मि वृणीतां च भवानपि ॥३३॥
तं वव्रे वाहनं विष्णुर्गरुडं तु महाबलम् ॥ तथेति चाब्रवत् पक्षी भगवन्तं सनातनम् ॥३४॥
तस्मिन्नेव च काले तु भगवान् हरिवाहनः ॥ अनुसृत्य च स्वर्गस्थं वज्रेणाभ्यहनद्बली ॥३५॥
तमुवाचेन्द्रमालोक्य गरुडः पपतां वरः ॥ प्रहसन् श्लक्ष्णया वाचा तथा वज्रसमाहतः ॥३६॥
ऋषेर्मानं करिष्यामि वज्रं यस्यास्थिसम्भवम् ॥ वज्रस्य च करिष्यामि तव चैव शतक्रतो ॥३७॥
एतत्पत्रं त्यजाम्येकं यस्यान्तं नोपलप्स्यसे ॥ न हि वज्रनिपातेन भवेद्रुगणञ्च हे प्रभो ॥३८॥
ततो वै सर्वभूतानि विस्मितान्यब्रुवंस्तदा ॥ सुरूपं पत्रमालोक्य सुपक्षोयं भवेदिति ॥३९॥
दृष्ट्वा तदद्भुतं चापि सहस्राक्षः पुरन्दरः ॥ खण्डितञ्च त्रिधा पत्रं वज्रेणाथ गरुत्मतः ॥४०॥
यन्मूलभान्नकुलो मध्यभागात् तु निर्विषः ॥ जज्ञे विषधरारातिर्मयूरश्चाग्रभागतः ॥४१॥
इन्द्रो महानिति ज्ञात्वा गरुडं वाक्यमब्रवीत् ॥ बलमिच्छामि विज्ञातुं यावत्ते पक्षिसत्तम ॥४२॥
सख्यं चानन्त्यमिच्छामि त्वया सह खगेश्वर ॥

गरुड उवाच ॥

सख्यमस्तु त्वया देव यथेच्छसि पुरन्दर ॥४३॥
बलञ्च मम जानीहि महच्चासह्यमेव च ॥

नारद उवाच ॥

इत्युक्ते गरुडेनैव शक्रो वचनमब्रवीत् ॥४४॥

प्रगृह्यतामिदानीं मे सख्यमानन्त्यमुत्तमम् ॥ न कार्यं तव सोमेन मम सोमः प्रदीयताम् ॥४५॥

गरुड उवाच ॥

किञ्चित्कारणमुद्दिश्य सोमोयं नीयते मया ॥ न दास्यामि समानीतं सोमं कस्यचिदप्यहम् ॥४६॥

यत्रैतत्तु सहस्राक्ष निक्षिपेयमहं स्वयम् ॥ तस्मादुद्धृत्य शक्र त्वं हरेथास्त्रिदशेश्वर ॥४७॥

वाक्येनानेन तुष्टोऽहं यत्वयोक्तमिहाण्डज ॥ यदिच्छसि वरं मत्तस्तद्गृहाण खगोत्तम ॥४८॥

इत्युक्तः प्रत्युवाचेदं कद्रुपुत्राननुस्मरन् ॥ मातृदास्यनिमित्तं तु करिष्यामि तदर्थितम् ॥४९॥

भवेयुर्भुजगाः शक्र मम भक्ष्या महबलाः ॥ तथेत्युक्त्वा तु गच्छन्तं शक्रो दानवसूदनः ॥५०॥

हरिष्यामि विनिक्षिप्तं सोममित्यनुभाष्य तम् ॥ आजगाम ततस्तूर्णं सुपर्णो मातुरन्तिकम् ॥५१॥

विनयाऽवनतो भूत्वा वचनं चेदमब्रवीत् ॥

गरुड उवाच ॥

इदमानीतममृतं देवानां भवनान्मया ॥५२॥

प्रशाधि किमितो मातः करिष्यामि शुभव्रते ॥

विनतोवाच ॥

परितुष्टाहमेतेन कर्मणा तव पुत्रक ॥५३॥

अजरश्चामरश्चैव देवानां सुप्रियो भव ॥ अथ सर्पानुवाचेदं गरुडस्तु प्रहृष्टवान् ॥५४॥

गरुड उवाच ॥

इदमानीतममृतं निक्षिपामि कुशेषु वः ॥ स्नाता मङ्गलसंयुक्तास्ततः पिबत पन्नगाः ॥५५॥

भवद्भिश्च यथा प्रोक्तं तथा चैव मया कृतम् ॥ अद्य प्रभृति मे माता न दासी पन्नगोत्तमाः ॥५६॥

ततः स्नातुं गताः सर्पाः प्रत्युक्त्वा तु तथेत्युत ॥ शक्रोप्यमृतमादाय जगाम त्रिदिवं पुनः ॥५७॥

ततः सर्पास्ततः स्नाताः कृतजाप्यसुमङ्गलाः ॥ परस्परकृतद्वेषाः सोमप्राशनकर्मणि ॥५८॥

अहं पूर्वमहं पूर्वमित्युक्त्वा तेऽथ दुद्रुवुः ॥ तदा सोमं हृतं सर्पाः शक्रमायाकृतं विदुः ॥५९॥

सोमस्थानमिदं चेति दर्भांस्ते लिलिहुस्तदा ॥ ततो द्विधा कृता जिह्वा सर्पाणां तेन कर्मणा ॥६०॥

अभवंश्च सुधास्पर्शात् दर्भास्तेऽतिपवित्रिणः ॥ नागा विषादमगमन् गरुडस्य बलात् द्विज ॥६१॥

ततः सुपर्णो मात्रा तु हृष्टचित्तो बभूव ह ॥

## सोमतीर्थम्

नारद उवाच ॥

निक्षिप्तं यत्र वै सोमं गरुडेन महात्मना ॥६२॥
तस्मिन्नौषधजातानि जज्ञिरे त्रीणि सत्तम ॥ सोममाली सुमाली च समाली च द्विजोत्तम ॥६३॥
अमृतोद्भवत्वाद्ब्रह्मर्षे ह्यमरत्वप्रदानि वै ॥ महता तपसा लभ्या न लभ्यानि च पापिनाम् ॥६४॥
तत्सोमतीर्थं विख्यातं सर्वतीर्थोत्तमोत्तमम् ॥ सोमनिष्यन्दजनितं ऋषिदेवार्चितं सदा ॥६५॥
सर्वपापहरं नृणां तपोवर्धनमुत्तमम् ॥ सोमकुण्डमिति ख्यातं तीर्थानां प्रवरं महत् ॥६६॥

---

## सोमस्य कथा

पुरा सोमो दक्षशापात् क्षीणत्वमगमद् द्विज ॥ तस्मिन् तीर्थवरे स्नात्वा दक्षशापाद्विमुक्तवान् ॥६७॥

संवर्तक उवाच ॥

किं कारणं पुरा दक्षः शशाङ्कं शप्तवान् मुने ॥ निशानाथः किमकरोद्दक्षस्य परमेष्ठिनः ॥६८॥
तन्मे विस्तरतो ब्रूहि शशाङ्कस्य कथां शुभाम् ॥

नारद उवाच ॥

शृणु विप्र प्रवक्ष्यामि संक्षेपेण कथां विधोः ॥६९॥
पुरा कृतयुगे चासीद्दक्षो नाम प्रजापतिः ॥ चन्द्राय प्रददौ कन्याः सप्तविंशति संख्यकाः ॥७०॥
अश्विन्याद्या द्विजश्रेष्ठ दत्वा प्रीतिमवाप्तवान् ॥ द्विजराजस्तु ताः कन्याः विवाह्य विधिवत् द्विज ॥७१॥
ताभिः सहैव चाध्यास्त सोमलोकमनिन्दितम् ॥ स तत्र रमयामास प्रत्यहं त्वेकया समम् ॥७२॥
तासां मध्ये सुरूपैका चतुर्थी रोहिणी द्विज ॥ तामेव रमयामास रोहिणीं द्विजराट् ततः ॥७३॥
सर्वाःस्त्रियः समुत्सृज्य सोमश्चास्ते तया सह ॥ एवं बहुतिथे काले दक्षः कन्यापरायणः ॥७४॥
दृष्टुकामस्तदा सोमं गतस्तल्लोकमुत्तमम् ॥ जामातरं समासाद्य ह्युपविश्य सुखासने ॥७५॥
किञ्चिद्विश्रम्य ताः सर्वा विलोक्य वचनं जगौ ॥ पुत्र्यः कच्चित् सुखं वोऽत्र दुःखं वा ब्रूत साम्प्रतम् ॥७६॥
कच्चिद्वः कुशलं भर्ता समं पश्यति वा किमु ॥ इत्युदीरितमाकर्ण्य कन्याः कमललोचनाः ॥७७॥
तात नः सर्वतः सौख्यमस्तीह त्वदनुग्रहात् ॥ किन्तु वक्ष्यामहे सर्वा एकवाक्यं निशामय ॥७८॥
चन्द्रो नः सम्परित्यज्य रोहिणीं रमते सदा ॥ अस्माभिरेतद्दुःखं तु न सोढुं शक्यते पितः ॥७९॥
यद्वयो यादृशं रूपं यौवनं सर्वसम्पदः ॥ तत्सर्वं विफलं स्त्रीणां पत्युः सङ्गविवर्जनात् ॥८०॥
इति तासां वचः श्रुत्वा पुत्रीणां दुःखकारणम् ॥ चन्द्रमालोक्य दक्षोऽसौ कोपसंरक्तलोचनः ॥८१॥

एहि पापसमाचार गुरुद्रोहिन् सदा खल ॥ यस्मात् सुलोचनास्त्वं हि कन्यास्त्यक्त्वा सुमध्यमाः ॥८२॥
केवलं रोहिणीमेनां रन्तुमिच्छसि पापिवत् ॥ तस्मात्त्वमपि वै सोम क्षयरोगी भवाधुना ॥८३॥
इति शप्त्वा तदा सोमं दक्षः पुनरगाद्गृहम् ॥ ततः सोमोऽतिदुःखेन दक्षशापात् द्विजोत्तम ॥८४॥
क्षयरोगमवाप्याथ प्रत्यहं क्षीणतामगात् ॥ पितुः सकाशादागत्य दक्षशापं व्यजिज्ञपत् ॥८५॥
तच्छ्रुत्वाऽत्रिर्महातेजा दक्षशापस्य कारणम् ॥ पुत्रस्य द्विजशार्दूलस्तदुपायं तदाऽब्रवीत् ॥८६॥

अत्रिरुवाच ॥

शृणु पुत्र प्रवक्ष्यामि त्वच्छापविनिवृत्तये ॥ अस्ति पुण्यं महत्क्षेत्रं गोकर्णं भुवि विश्रुतम् ॥८७॥
तत्रास्ते शतशृङ्गाख्यो गिरिः सिद्धनिषेवितः ॥ तस्य पश्चिमदिग्भागे तीर्थमस्ति महत्तरम् ॥८८॥
सोमनिष्यन्दजनितं ऋषिदेवार्चितं सदा ॥ तत्र गत्वा त्वमपि वै स्नात्वा तीर्थवरेऽमले ॥८९॥
मासमेकं निरहारस्तपसा शङ्करं यज ॥ तेन ते शापमुक्तिः स्यान्नात्र कार्या विचारणा ॥९०॥
पितुर्वचनमाकर्ण्य गत्वा तीर्थवरोत्तमम् ॥ स्नात्वा च विधिवत्तत्र पित्रोक्तं यत्तथा करोत् ॥९१॥
तदा शापाद्विनिर्मुक्तः सिद्धिं प्राप्य सुदुर्लभाम् ॥ मूर्ध्नि स्थानमवापाग्र्यं शिवस्य द्विजसत्तम ॥९२॥
देवानां श्रैष्ठ्यमगमत् तस्य तीर्थस्य सेवनात् ॥ सोमो निरामयश्चाभूत् किं तस्मादधिकं द्विज ॥९३॥
सोमतीर्थे नरः स्नात्वा विन्देद्बहु सुवर्णकम् ॥ सर्वपापैः प्रमुच्येत सप्तजन्मकृतैरपि ॥९४॥
क्षयरोगादिहानिः स्यात् स्नातानामत्र सत्तम ॥ इदं पवित्रमाख्यानं यः शृणोति द्विजोत्तम ॥९५॥
स चन्द्रलोकमासाद्य चन्द्रवन्मोदते भृशम् ॥

इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे चन्द्रतीर्थवर्णनं नाम पञ्चाशोऽध्यायः ॥ ५० ॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ५१ ॥  NEXT>>  श्लोक संख्या–७३

## ॥ सूर्यतीर्थ– अनन्ततीर्थ, अनन्तदृषत् (मणिनाग) – शिंशुमारतीर्थ वर्णनम् ॥

### सूर्यतीर्थ

नारद उवाच ॥

सोमतीर्थादुत्तरतः सूर्यतीर्थमिति श्रुतम् ॥ सूर्यतीर्थस्य माहात्म्यं शृणुष्व वदतो मम ॥१॥
त्वष्टुः प्रजापतेः कन्या भार्या सूर्यस्य सत्तम ॥ साऽसहन्ती भर्तृतेजः पितृवेश्म जगाम वै ॥२॥

तज्ज्ञात्वा सविता पश्चात् त्वष्टुर्गृहमुपागमत् ॥ समाजस्तत्र देवानां तदा ह्यासीत् द्विजोत्तम ॥३॥
ततस्त्वष्टा महातेजाः सम्मन्त्र्य सह दैवतैः ॥ तेजो निशातयामास यन्त्र आरोप्य तं शनैः ॥४॥
तदंशमपतद्विप्र शतशृङ्गस्य पश्चिमे ॥ तटे समुद्रसविधे शिलानागस्य दक्षिणे ॥५॥
तज्ज्ञात्वा भगवानीशः शर्वः सुरगणार्चितः ॥ तपसा महता विप्र चक्रे चक्रं सुदर्शनम् ॥६॥
सुदर्शनमिति ख्यातं पूर्वतो द्विजसत्तम ॥ ततः सुदर्शनं जातं देवानां तद्धि शङ्करात् ॥७॥
तस्य सूर्यस्य वै तेजः संवृतं रुद्रतेजसा ॥ तपसा तस्य देवस्य त्वष्टुः शिक्षा बलेन च ॥८॥
रक्षार्थं सर्वलोकानां निर्ममे शङ्करः स्वयम् ॥ तपसाराध्य घोरेण भगवन्तं त्रिलोचनम् ॥९॥
तद्गृहीतं भगवता विष्णुना प्रभविष्णुना ॥ तत्सूर्यतीर्थं विख्यातं यत्र तीर्थं रवेः कणाः ॥१०॥
तत्र स्नातः सर्वतीर्थे स्नातो भवति मानवः ॥ पापकञ्चुकमुत्सृज्य सूर्यलोकं स गच्छति ॥११॥
अग्निष्टोमस्य यज्ञस्य फलं प्राप्नोत्यसंशयम् ॥ ( द्वितीयं सूर्यतीर्थं )

---

### अनन्ततीर्थं, अनन्तदृषत्(मणिनागः) च

ततः परमनन्तस्य तीर्थं शृणु महामते ॥१२॥
नागराजः पुरानन्तस्तत्र तेपे महत्तपः ॥ सुधां पीत्वा द्विजश्रेष्ठ संयम्यात्मनि चेन्द्रियम् ॥१३॥
कृते युगे द्विजश्रेष्ठ विष्णुमाराधयत् प्रभुम् ॥ त्रेतायां विधिमुद्दिश्य द्वापरे तु महेश्वरम् ॥१४॥
तुरीये तु युगे विप्र ब्रह्मविष्णुमहेश्वराः ॥ तस्य प्रत्यक्षमगमन् ऊचुश्च वरयेत्युत ॥१५॥
तान् दृष्ट्वा विबुधश्रेष्ठाननन्तः पन्नगेश्वरः ॥ सहस्रसङ्ख्यैर्विप्रेन्द्र शिरोभिः प्रणिपत्य तान् ॥१६॥
कृताञ्जलिपुटो भूत्वा स्तोतुं समुपचक्रमे ॥

अनन्त उवाच ॥

नमः कर्त्रे च भर्त्रे च हर्त्रे च जगतां नमः ॥१७॥
कार्यकारणकर्तृत्वे पृथग्देहं समाश्रिताः ॥ अज्ञानिनो मूर्तिभेदान् जानन्ति पृथगेव हि ॥१८॥
जानन्ति ज्ञानिनो नित्यमेकमूर्तिं सुरेश्वरान् ॥ ब्रह्मविष्णुशिवाख्येन मूर्तिभेदेन सर्वदा ॥१९॥
सृष्टिस्थित्यन्तकरणाः सर्वेषां प्रपितामहाः ॥ विवीशवृषवाहाश्च विवीशवृषभध्वजाः ॥२०॥
ऋृगयजुःसामविदिताः पद्मोदधिनगौकसः ॥ ब्रह्मणे विष्णवे चैव ईश्वराय नमो नमः ॥२१॥
शङ्कराय नमस्तेस्तु केशवाय नमो नमः ॥ विरिञ्चाय नमस्तेस्तु सर्वेभ्यो वै नमो नमः ॥२२॥
त्रिभिर्व्याप्तमिदं विश्वं दृश्यादृश्यं सुरेश्वराः ॥ अथ त्रिभिर्गुणैर्देवाः सर्वप्राणिषु संस्थिताः ॥२३॥

भक्तानुकम्पया यूयं मम प्रत्यक्षतां गताः ॥ इति स्तुता तदा देवा अनन्तेन महात्मना ॥२४॥
ब्रह्मविष्णुमहादेवा वरं ब्रूहीति चाब्रुवन् ॥ नागराजो वरं वव्रे यथावच्छृणु पावके ॥२५॥

अनन्त उवाच ॥

वरं ददासि चेन्मह्यं वरार्हो यदि चाप्यहम् ॥ ज्ञानं देहि महाभाग अमरत्वं च देहि मे ॥२६॥
बले धैर्ये तथा धुर्ये सर्वेभ्योऽहं यथाधिकः ॥ तथा देहि वरान् मह्यं स्थानमेतत् सुरोत्तम ॥२७॥
उत्तमोत्तमतामेतु तीर्थमज्ञाननाशनम् ॥ भवेदेवं सुरश्रेष्ठ यदि तुष्टोसि शङ्कर ॥२८॥
तथास्त्विति च तेनोक्तो लोककान्तेन शम्भुना ॥ नागराजश्च तुष्टोभूदन्तर्धानं गताः सुराः ॥२९॥
ततोऽनन्तः प्रविश्याब्धिं जलमार्गेण वह्निज ॥ संस्तूयमानो नागेन्द्रैर्गन्धर्वाप्सरसां गणैः ॥३०॥
स्वस्थानमगमद्विप्र अनन्तः पन्नगाधिपः ॥ तत्रानन्तदृषन्नाम पाषाणं लोकविश्रुतम् ॥३१॥
शिलायां दृश्यते मार्गः समुद्रे च तथाविधः ॥ तच्छिलायाश्च सविधे ह्युत्तरे नागशासितुः ॥३२॥
तीर्थमस्ति महत्पुण्यं पवित्रं पापनाशनम् ॥ अस्मिन् स्नातः सर्वतीर्थे स्नातो भवति मानवः ॥३३॥
राजसूयस्य यज्ञस्य फलं प्राप्नोत्यसंशयम् ॥ तन्मार्गं ये प्रविश्यन्ति शिलायां वरुणालये ॥३४॥
आजन्मचरितं पापं तत्क्षणादेव नश्यति ॥

---

## शिंशुमारतीर्थ

नारद उवाच ॥

शिंशुमारमिति ख्यातं तीर्थं सर्वसुरार्चितम् ॥३५॥
एकबिन्दोर्दक्षिणतो ह्यास्ते पुण्यं द्विजोत्तम ॥ सर्वदेवमयः साक्षात् शिंशुमारः प्रजापतिः ॥३६॥
तपस्तेपे निराहारः सिद्धिमिच्छन् पुरा मुने ॥ घोरेण तपसा तस्य तुतोष भगवान् हरः ॥३७॥
प्रत्यक्षमगमत् तस्य साक्षाद् विश्वेश्वरः शिवः ॥ प्रजापतिस्तु तं दृष्ट्वा देवदेवमुमापतिम् ॥३८॥
दण्डवत् पतितो भूम्यां ननाम शिरसा भुवम् ॥ उत्थापयामास तदा प्रणतं तं पिनाकधृक् ॥३९॥
उवाच मेघगम्भीरध्वनिना तं महेश्वरः ॥

शिव उवाच ॥

क्षेत्रं भवान् मम विभो देवानां च प्रजापते ॥४०॥
मत्तः किमिच्छसि विभो ब्रूहि तत्ते ददाम्यहम् ॥

नारद उवाच ॥

तच्छ्रुत्वा वचनं शम्भोर्देवदेवस्य वै द्विज ॥४१॥

शिंशुमारः प्रहृष्टात्मा स्तुत्वा तं विविधैः स्तवैः ॥ कृताञ्जलिपुटो भूत्वा वरं वव्रे महेश्वरात् ॥४२॥
सिद्धिमिच्छामि भगवन् परां सिद्धिं प्रदेहि मे ॥ वरमन्यत् सुरश्रेष्ठ देहि मत्प्रीतिवर्धनम् ॥४३॥
यश्चात्रागत्य भगवन् स्नाति तीर्थे मम प्रभो ॥ सोपि सिद्धो भवेदत्र प्रसादात्तव शङ्कर ॥४४॥
मन्नाम्ना पार्वतीकान्त तीर्थं ख्यातिं च गच्छतु ॥

शिव उवाच ॥

सिद्धोऽसि त्वं पूर्वमेव स्वभावात् त्वं सुराग्रणे ॥४५॥
त्वदंशभूता हि वयं सर्वे चैव सुरासुराः ॥ त्वदधीना सिद्धिरियं तत्किं सिद्धिमभीप्स्यसे ॥४६॥

शिंशुमार उवाच ॥

क्षेत्रं त्वहं हि देवानां मदुत्पन्ना हि देवताः ॥ तथापि सिद्धिमिच्छामि क्षेत्रेऽस्मिन्नेव शंङ्कर ॥४७॥
त्वं प्रभुः सर्वदेवानामस्माकं च सुरोत्तम ॥ त्वया कृतानि चैतानि स्थितिकल्पान्यनेकधा ॥४८॥
त्वया कृतमिदं विश्वं त्वय्येवाहं त्रिलोचन ॥ त्वदधीना परा सिद्धिर्नात्र कार्या विचारणा ॥४९॥

शिव उवाच ॥

युक्तमुक्तं त्वया ब्रह्मन् शिंशुमार महामते ॥ तस्मात् सिद्धिर्भवतु ते मत्प्रसादान्न संशयः ॥५०॥
ये द्रक्ष्यन्त्याश्रममिदं तेऽपि सिद्धा भवन्तु वै ॥ त्वया कृतमिदं तीर्थं त्वन्नाम्ना ख्यातिमेष्यति ॥५१॥
इति तस्य वरं दत्वा भगवान् भूतभावनः ॥ तत्रैवादर्शनं यातः किमन्यच्छ्रोतुमिच्छसि ॥५२॥

संवर्तक उवाच ॥

ब्रूहि कोसौ च ब्रह्मर्षे शिंशुमारः प्रजापतिः ॥ प्रभावं तस्य मे शंस जन्म कर्म च वै मुने ॥५३॥

नारद उवाच ॥

एकार्णवे पुरा विप्र नष्टे स्थावरजङ्गमे ॥ स्त्रष्टुकामः प्रजाः सर्वाः पद्मयोनिः प्रजापतिः ॥५४॥
चित्ररूपं ददर्शाऽथ छायारूपमिवाम्बरे ॥ तं दृष्ट्वाऽचिन्तयद् ब्रह्मा किमेतदिति सुव्रत ॥५५॥
ततो दध्यौ चिरं ब्रह्मा ज्ञातुं तद्भूतभावनः ॥ ज्ञात्वा ध्यानेन तद्भूतं ब्रह्मा लोकपितामहः ॥५६॥
ततो ददर्श विश्वात्मा पीयमानं पयोनिधिम् ॥ क्षणान्निस्तोयभूतं च धिष्ण्यानि ददृशे प्रभुः ॥५७॥
शिंशुमारे स्थितं विश्वं जीवांशं सचराचरम् ॥ लोकानां क्षेत्रभूतं च दृष्ट्वा ब्रह्मा जगत्पतिः ॥५८॥
तस्मादुद्धृत्य जीवांशं देवादीनां द्विजोत्तम ॥ देवादितृणपर्यन्तं ह्यसृजत् स चराचरम् ॥५९॥
सृष्ट्वा हि सर्वभूतानि ब्रह्मा लोकपितामहः ॥ पुनस्तस्मिन् शिंशुमारे अंशान्याधाय सुव्रत ॥६०॥
क्षिप्तवान् सर्वभूतेशश्चराचरकृतेच्छया ॥ यथा च कर्षकः पुत्र सिद्धेर्व्रीहिषु बुद्धिमान् ॥६१॥

दधाति बीजान्युद्धृत्य तदेवाक्षयसिद्धये ॥ तथासौ भूतकर्तृत्वं शिंशुमारे न्यधापयत् ॥६२॥
तस्मान्नित्यशरीरोऽसौ देवानां च प्रजापतिः ॥ सर्वदेवमयः साक्षात् परमात्मा स उच्यते ॥६३॥
स शिवः स च वै विष्णुः स ब्रह्मा स प्रजापतिः ॥ स एव पूर्वं हि पृथक्ततस्तस्मादजायत ॥६४॥
तत्प्राप्तिमचलामाहुः परां सिद्धिं द्विजोत्तम ॥ सोप्यत्रागत्य भगवान् शिंशुमारः प्रजापतिः ॥६५॥
सिद्धिमाप महाक्षेत्रे गोकर्णे ब्राह्मणोत्तम ॥ सर्वदेवमयं क्षेत्रं गोकर्णमभिधीयते ॥६६॥
भुक्तिं तथा परां मुक्तिमिच्छन्त्यत्र सुरासुराः ॥ गन्धर्वाप्सरसश्चैव सुपर्णा यक्षराक्षसाः ॥६७॥
सिद्धविद्याधराश्चैव पशुपक्षिसरीसृपाः ॥ नगा नागा मनुष्याश्च तीर्थानि च सरांसि च ॥६८॥
नद्यो नदाश्च तरवः सर्वे च द्विजसत्तम ॥ गोकर्णक्षेत्रमासाद्य सिद्धिं प्रापुः परात्पराम् ॥६९॥
तस्मात् क्षेत्रोत्तमं ह्येतद्गोकर्णं पावकात्मज ॥ नैतत् कृतघ्नाः पश्यन्ति नास्तिकाऽनृतवादिनः ॥७०॥
ये केचित् पापिनस्तत्र ते न गच्छन्ति सुव्रत ॥ युगेषु वर्तमानेषु तीर्थमावर्तते द्विज ॥७१॥
यास्यत्यदर्शनं चैव पापिष्ठानां न संशयः ॥ य इदं पुण्यमाख्यातं शृणोति श्रद्धया नरः ॥७२॥
सर्वपापविनिर्मुक्तः स्वर्गलोके महीयते ॥

इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे सूर्यतीर्थ अनन्ततीर्थ शिंशुमारतीर्थ वर्णनं नाम एकपञ्चाशोऽध्यायः ॥५१॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ५२ ॥  NEXT>>  श्लोक संख्या–६३

॥ उपक्रमः – सूर्याश्रमं सूर्यतीर्थं सूर्येश्वरः – धर्माश्रमं धर्मतीर्थं धर्मेश्वरः ॥

## उपक्रमः

संवर्तक उवाच ॥

धर्मस्य चरितं ब्रूहि तस्य तीर्थस्य च प्रभो ॥ आश्रमस्यास्य पुण्यस्य नित्यस्य मुनिसत्तम ॥१॥

नारद उवाच ॥

प्रजाः सिसृक्षता पूर्वं ब्रह्मणा परमेष्ठिना ॥ सृष्टश्च भगवान् देवो मनसः पद्मजन्मनः ॥२॥
चतुष्पाद्भगवान् धर्मो बभूव द्विजसत्तम ॥ शुद्धस्फटिकसङ्काशः शुद्धबुद्धिसमुद्भवः ॥३॥
तस्मिन् जाते भगवति ब्रह्मा लोकपितामहः ॥ भारार्तः पुरुषो यद्वदवलुप्य लघुर्भवेत् ॥४॥
तद्वदासीज्जगत्स्रष्टा सृष्ट्वा धर्मं सनातनम् ॥ सृष्टानि सर्वभूतानि ब्रह्मणा ब्राह्मणोत्तम ॥५॥

दधार धर्मो भगवान् प्रजाः सर्वास्तदा मुने ॥ प्रजया धार्यते धर्मः सततं सुखमिच्छता ॥६॥
धर्मो धाता पिता चैव लोकानां प्रभुरव्ययः ॥ तत्प्राप्तिमाहुर्धर्मज्ञाः सिद्धिं पावकनन्दन ॥७॥
स्वर्गो निर्वाणमपि च धर्माद्भवति नान्यथा ॥ सृष्ट्वा तं भगवान् ब्रह्मा ऋणमुक्तो बभूव ह ॥८॥
सत्पुत्रेण पिता यद्वत् ऋणमुक्तो भविष्यति ॥ तथा धर्मेण वै ब्रह्मा ऋणमुक्तो बभूव ह ॥९॥
प्रीत्या तमाह भगवान् ब्रह्मा लोकपितामहः ॥ मत्प्रजाः पालयस्वेति धर्मं पावकनन्दन ॥१०॥
तच्छ्रुत्वा वचनं धर्मस्तथास्त्विति तमब्रवीत् ॥ पितुराज्ञां पुरस्कृत्य पालयामास वै प्रजाः ॥११॥
ततो विवादमभवद्देवानां वै परस्परम् ॥ अहं श्रेष्ठः शरीरेऽस्मिन् क्षेत्रज्ञोऽहमिति द्विज ॥१२॥
मया विना क्षेत्रमिदं मुहूर्तं नावतिष्ठते ॥ एवं परस्परं देवास्तदोचुर्वह्निनन्दन ॥१३॥
ततः सर्वे देवगणास्त्यक्त्वा स्वं स्वं कलेवरम् ॥ वायुभूताश्चरन्ति स्म तत्क्षेत्रं पूर्ववत् स्थितम् ॥१४॥
चन्द्रमाधिष्ठितत्वाच्च नित्यत्वाच्च द्विजोत्तम ॥ न नाशमगमत् तद्वै शिंशुमारः प्रजापतिः ॥१५॥
चन्द्रमाः सर्वभूतानां श्रेष्ठ इत्यवगम्यते ॥ शरीरार्थं ततः सर्वे स्वां स्वां योनिमुपागमन् ॥१६॥
धर्मोपि भगवान् देवः स्वां योनिं समचिन्तयत् ॥ ज्ञात्वा सूर्यं विशेषाच्च वायुभूतः सनातनः ॥१७॥

---

## सूर्याश्रमं सूर्यतीर्थं सूर्येश्वरः ह

तस्मिन् काले स भगवान् विवस्वान् लोकपावनः ॥ तपस्तेपे स गोकर्णे सिद्धिकामः सुरोत्तमः ॥१८॥
संस्थाप्य शाम्भवं लिङ्गं पूजयन् सुचिरं द्विज ॥ दिव्यवर्षसहस्रान्ते भगवान् गोवृषध्वजः ॥१९॥
प्रत्यक्षमगमत् तस्मिन् लिङ्गे सूर्यस्य सत्तम ॥ तमाह देवदेवेशः शूलधृक् सुरसत्तमः ॥२०॥
वरं ब्रूहि महाभाग तुष्टोऽस्मि तपसा तव ॥ ततः प्रणम्य भगवानादित्यस्तपतां वरः ॥२१॥
कृताञ्जलिपुटो भूत्वा स्तोतुं समुपचक्रमे ॥ विश्वमूर्ते नमस्तुभ्यं मूर्तामूर्ते नमो नमः ॥२२॥
ज्ञानगम्य नमस्तेस्तु नमस्ते ज्ञानदायिने ॥ अध्यात्ममूर्तये तुभ्यं लोकान्तक नमोस्तु ते ॥२३॥
नमस्ते कालदमन कालप्रकृतये नमः ॥ भगनेत्रहृते तुभ्यं विष्णुप्रिय नमोस्तु ते ॥२४॥
नमः कर्त्रे च भर्त्रे च हर्त्रे च हरये नमः ॥ पूषदन्तविनाशाय पूर्णानन्दाय ते नमः ॥२५॥
नमः शिवाय शान्ताय त्र्यम्बकाय नमो नमः ॥ त्रिशूलपाणये तुभ्यं त्रिनेत्राय नमो नमः ॥२६॥

नमस्त्रिमूर्तये तुभ्यं नमस्ते त्रिगुणात्मने ॥ भूतवाहन भूतेश नमस्ते भुवनेश्वर ॥२७॥

सामगम्य नमस्तेस्तु सर्वस्याधारिणे नमः ॥ जयदेव जगन्नाथ जयसर्वसुरार्चित ॥२८॥

शरणं भव देवेश जन्ममृत्युजरापह ॥ परां सिद्धिं प्रदिश मे नमस्तेऽज्ञाननाशिने ॥२९॥

इति स्तुतः स भगवानादित्येन महेश्वरः ॥ प्रीतिमानभवच्छम्भुर्दिवाकरमभाषत ॥३०॥

सिद्धोऽसि वै स्वभावेन सिद्धिस्त्वय्येव वर्तते ॥ तथापि मत्प्रभावेण सिद्धो भव महाद्युते ॥३१॥

त्वमेवाहं सुरश्रेष्ठ विष्णुस्त्वय्येव वर्तते ॥ त्वय्येव भगवान् ब्रह्मा त्वयि सर्वं चराचरम् ॥३२॥

ये त्वां स्मरन्ति द्युमणे ते पश्यन्ति परं पदम् ॥ त्वया कृतमिदं लिङ्गं तीर्थं स्थानं ग्रहाधिप ॥३३॥

श्रेष्ठं भवतु सर्वत्र मत्प्रसादाद्विभावसो ॥ अत्रागत्य नरो यस्तु स्नात्वा तीर्थे तव प्रभो ॥३४॥

त्वया कृतमिदं लिङ्गं पूजयित्वा विधानतः ॥ चन्दनैः करवीरैश्च मन्त्रैस्तव सुशोभनैः ॥३५॥

तथार्घ्यं च पृथग्दत्वा नमस्कारं तथैव च ॥ माघमासे शुक्लपक्षे सप्तम्यां रविवासरे ॥३६॥

तस्मिन् काले विशेषेण यत्किञ्चिद्दानमाचरेत् ॥ स सर्वभोगान् भुक्त्वेह लोकं तव गमिष्यति ॥३७॥

इति तस्मै वरं दत्वा लिङ्गे तस्मिन् व्यलीयत ॥ अन्तर्हिते भगवति सूर्यः स्वस्त्रीमवाप्तवान् ॥३८॥

संज्ञया सह सङ्गम्य तस्यां धर्ममवाप्तवान् ॥ धर्मस्तदा समुत्पन्नः सूर्यात् पावकनन्दन ॥३९॥

त ादे त ाद्द श्ट ात ा ि ० ाए ा आ ाश्र ाम ा ॥ सूर्याश्रममिति ख्यातं त ा० ा

क्षिप्रं सिद्धिकरं नृणाम् ॥४०॥

पुण्याश्रममिति ख्यातं नृणां पुण्यविवर्धनम् ॥ सूर्येण स्थापितं लिङ्गं पुण्येशं पुण्यवर्धनम् ॥४१॥

पूजनात् तस्यलिङ्गस्य नृणां पापविनाशनम् ॥ उत्पाद्य धर्मं सूर्यश्च यथास्थानमगात् प्रभुः ॥४२॥

---

धर्माश्रमं धर्मतीर्थं धर्मेश्वरः

धर्मोपि तत्र भगवान् स ा ट ाा श्र ाम ास ाम ा॥ कृत्वाश्रमंपदं ब्रह्मन् तपस्तेपे सुदुश्चरम् ॥४३॥

द ि क्ष ाण ाा ग ा ह र ाजस्ट ा स ा मुनिसत्तम ॥ सिद्धिकामः पुरा विप्र

वर्षाणामयुतं प्रभुः ॥४४॥

तस्य तुष्टास्त्रयो देवा ब्रह्मविष्णुमहेश्वराः ॥ प्रत्यक्षमगमन् तस्य धर्मस्य मुनिपुङ्गव ॥४५॥
वरं ब्रूहीति तं ब्रह्मा प्रथमं चाह पावके ॥ ततः प्रणम्य धर्मोऽपि पितामहमुवाच ह ॥४६॥
सिद्धिमिच्छामि भगवन् तां मे देहि जगद्गुरो ॥ परं ज्ञानं च देवेश वरमेतद्वृणोम्यहम् ॥४७॥
तथास्त्विति च तेनोक्ते विष्णुर्धर्ममुवाच ह ॥ गृहाण मत्तश्च वरं मनसा यद्यदिच्छसि ॥४८॥
ततः प्रणम्य तं धर्मो वरं वव्रे द्विजोत्तम ॥ बलेन मत्तो देवेश न कश्चिदधिको भवेत् ॥४९॥
लोकपालत्वमपि च वरं देहि जनार्दन ॥ तथेति विष्णुना प्रोक्ते रुद्रो धर्ममुवाच ह ॥५०॥
मत्तोपि त्वं वरं देव वृणीष्व यदि मन्यसे ॥ इत्युक्तः शूलिना धर्मः प्रणिपत्य महेश्वरम् ॥५१॥
ममाश्रमपदे देव अधर्मो न भवेत् प्रभो ॥ अत्रस्थो यस्त्यजेत् प्राणान् सोऽक्षयं स्वर्गमाप्नुयात् ॥५२॥
अत्रागत्य भजन्ते त्वां तेषां पापं विनश्यतु ॥ सप्तजन्मार्जितं वापि वरमेतद्वृणोम्यहम् ॥५३॥
तथास्त्विति च तं विप्र प्रोवाच भगवान् भवः ॥ एवं लब्धवरः सोऽथ कृतकृत्यो बभूव ह ॥५४॥
इति दत्वा वरं तस्मै ब्रह्मविष्णुमहेश्वराः ॥ तत्रैवान्तर्दधुः सर्वे लिङ्गे धर्मस्य सत्तम ॥५५॥
तत्रास्ते मुनिशार्दूल तीर्थं धर्मकृतं महत् ॥ पापनाशनसंज्ञं तु पुण्यं देवर्षिसेवितम् ॥५६॥
तत्र स्नात्वा नरो भक्त्या धर्मेशं परिपूजयेत् ॥ जपेत् पञ्चाक्षरं मन्त्रं सर्वपापैः प्रमुच्यते ॥५७॥
माघशुक्लद्वितीयायां तत्र गत्वा करोति यः ॥ स्नानदानादिकं कर्म एकं कोटिगुणं भवेत् ॥५८॥
राजसूयस्य यज्ञस्य फलं च लभते पुमान् ॥

---

## सूर्यतीर्थम् ह्ण

[illegible] सुव्रत ॥५९॥
अविदूरे स्थितं विप्र रवेस्तीर्थमनुत्तमम् ॥ सर्वपापहरं पुण्यं त्रिषु लोकेषु विश्रुतम् ॥६०॥
तत्र स्नात्वा नरो विप्र विराजति यथा रविः ॥ पापकञ्चुकमुत्सृज्य त्वचं जीर्णामिवोरगः ॥६१॥
गोसहस्रप्रदानस्य फलं च लभते नरः ॥६२॥ (अन्यत् सूर्यतीर्थं)
एतत्पवित्रं परमं द्विजोत्तम सिद्धिप्रदं सर्वविपद्विमोचनम् ॥
सुरासुरा ह्यत्र महानुभावा स्नात्वा कृतार्थाः सुखिनो बभूवुः ॥६३॥
इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे सूर्याश्रम वर्णनं नाम द्विपञ्चाशोऽध्यायः ॥५२॥

## ॥ योगाश्रमं योगेश्वरः – चक्रतीर्थं चक्रखण्डेश्वरः ॥

### योगाश्रमं योगेश्वरः

नारद उवाच ॥

सनत्कुमारो भगवानत्र सिद्धः सनातनः ॥ तपसा महता विप्र क्षेत्रे वै पावकात्मज ॥१॥

संवर्तक उवाच ॥

कथं स भगवान् सिद्धः क्षेत्रेऽस्मिन् ब्रह्मनन्दनः ॥ सनत्कुमारस्य कथां ब्रूहि मे मुनिपुङ्गव ॥२॥

नारद उवाच ॥

संवर्तेनेरितं वाक्यं श्रुत्वा देवऋषिस्तदा ॥ उवाच नारदो वाक्यमिदं संवर्तकं प्रति ॥३॥

श्रुणुष्वैकमना ब्रह्मन् तच्चरित्रं वदामि ते ॥ सनत्कुमारो भगवान् क्षेत्रेऽस्मिन् पावकात्मज ॥४॥

कृत्वाश्रमपदं विप्र तपस्तेपे सुदुश्चरम् ॥ बद्धपद्मासनो मौनी वाय्वाहारो वियद्गतः ॥५॥

ध्यानमास्ते निरालम्बो वर्षाणामयुतं प्रभुः ॥ अन्तर्निरुध्य सर्वाणि इन्द्रियाणि महामनाः ॥६॥

प्राणापानौ च भगवान् व्यानोदानौ च सत्तम ॥ निरुध्य तान् समाने तु वायौ वियति संस्थितः ॥७॥

निरुध्य सर्वद्वाराणि विषयेभ्यः परंतपः ॥ परमार्थं परब्रह्म शिवं शान्तमकल्मषम् ॥८॥

मय्येवेति महायोगी ध्यात्वा ब्रह्माद्वितीयकम् ॥ योगैश्वैर्यबलाद्ब्रह्म परं मनस्यधिष्ठितम् ॥९॥

तपसस्तस्य भगवानाविरासीत् सदाशिवः ॥ पुरतो वृषभारूढः पार्षदैः सह सुव्रत ॥१०॥

उवाच वचनं शम्भुर्मेघगम्भीरया गिरा ॥

शिव उवाच ॥

सनत्कुमार योगीन्द्र वरं वरय पुत्रक ॥ तद्ददाम्यविलम्बेन यद्यपि स्यात् सुदुर्लभम् ॥११॥

इत्युदीरितमाकर्ण्य उन्मील्य नयने तदा ॥ दृष्ट्वा देवमुमाकान्तं शरण्यं भक्तवत्सलम् ॥१२॥

प्रणम्य दण्डवद्भूमौ कृताञ्जलिपुटस्तदा ॥ स्तुत्वा ह्युपनिषद्वाक्यैर्वरं वव्रे स योगिराट् ॥१३॥

यदि तुष्टोसि देवेश गङ्गाधर जगत्पते ॥ शाश्वतीं सिद्धिमिच्छामि देहि तां भगवन् मम ॥१४॥

तच्छुत्वा वचनं तस्य योगीन्द्रस्य जगत्पतिः ॥ तमुवाच महादेवः स्निग्धगम्भीरया गिरा ॥१५॥

सिद्धोसि वै पूर्वमेव स्वभावाद्देवसत्तम ॥ तथापि मत्प्रसादेन सिद्धिस्तव भविष्यति ॥१६॥

ददामि तव भूयोपि वरं वरय पुत्रक ॥ तपसा नियमेनाद्य तुष्टोस्मि नितरां मुने ॥१७॥

सनत्कुमार उवाच ॥

यदि तुष्टोसि देवेश वरमन्यं ददासि चेत् ॥ इदं मया कृतं लिङ्गं त्रैलोक्यतिलकं भवेत् ॥१८॥

योगेश्वराभिधानेन स्पर्शनात् स्वर्गदं नृणाम् ॥ पापिनामपि सर्वेषां भवत्विह सुरेश्वर ॥१९॥

तच्छ्रुत्वा वचनं शम्भुर्योगीन्द्रस्य द्विजोत्तम ॥ तथास्त्विति वरं दत्वा लिङ्गे तस्मिन् व्यलीयत ॥२०॥

सनत्कुमारो भगवान् सिद्धिं प्राप्य महेश्वरात् ॥ ययौ ब्रह्मश्रिया युक्तो रोदसी दीपयन् प्रभुः ॥२१॥

सत्यलोकं प्रति तदा योगीन्द्रो हृष्टमानसः ॥ तदिदं दृश्यते विप्र आश्रमं श्रमनाशनम् ॥२२॥

आश्रमात् तव विप्रेन्द्र क्रोशमात्रे स्थितं महत् ॥ लिङ्गं योगेश्वरं नाम कौबेर्यां दिशि पावके ॥२३॥

त्रिषु लोकेषु विख्यातं स्पर्शनात् स्वर्गदं नृणाम् ॥ स्पृष्ट्वा तत् सर्वभूतानि स्वर्गं गच्छन्त्यहर्निशम् ॥२४॥

महापातकयुक्ताश्च ह्युपपातकिनस्तथा ॥ तिर्यग्योनिं गताश्चापि सर्वे च द्विजसत्तम ॥२५॥

पूर्णमासीद्देवलोकः प्राणिभिर्लोकवासिभिः ॥ नावकाशमभूद्विप्र देवानां भवने तदा ॥२६॥

---

## चक्रतीर्थं चक्रखण्डेश्वरः

ततो देवाः समागम्य सर्व एव द्विजोत्तम ॥ ऊचुर्ब्रह्माणमागत्य ऋषिभिः सह देवताः ॥२७॥

भगवन् प्राणिनः सर्वे दिवमायान्त्यवारिताः ॥ अधर्मज्ञाश्च पापिष्ठा दिवं गत्वा निरामयाः ॥२८॥

अस्मानुच्चाटयन्त्यस्मात् बहुत्वात् सुरसत्तम ॥ अधर्मज्ञैर्बलोद्रिक्तैः सम्पूर्णं भवनं हि नः ॥२९॥

न विद्मः कारणं देव विपरीतं प्रवर्तते ॥ इत्युक्तस्तैरिदं ब्रह्मा तानाह द्विजसत्तम ॥३०॥

लिङ्गं योगेश्वरं नाम गोकर्णे स्थापितं सुराः ॥ मत्पुत्रेण महाभागास्तपसा महताबलात् ॥३१॥

तस्मिन् लिङ्गे शिवः साक्षाद्रमते प्रियया सदा ॥ स्पर्शात् सिद्धिकरं नृणां तल्लिङ्गं सुरसत्तमाः ॥३२॥

स्पृष्ट्वाऽऽयान्तीह भूतानि सर्वाणि विबुधेश्वराः ॥ तस्माद्गच्छत देवेशं विष्णुं त्रिभुवनेश्वरम् ॥३३॥

प्रसादयध्वं विबुधाः स वः कार्यं करिष्यति ॥ तच्छ्रुत्वा विबुधास्तेन विष्णुं जग्मुर्दिवौकसः ॥३४॥

क्षीराब्धेरुत्तरं तीरं ऋषिसङ्घैः समावृतम् ॥ तत्राराध्य जगन्नाथं तपसा महता सुराः ॥३५॥

प्रत्यक्षीकृत्य विष्णुं त इदं वचनमब्रुवन् ॥ त्राह्यस्मान् देव देवेश शङ्खचक्रगदाधर ॥३६॥

ये भूता भूतलगता जङ्गमा धरणीधराः ॥ स्थावराश्च जगन्नाथ दिवमायान्त्यवारिताः ॥३७॥

अहर्निशं देवदेव स्पृष्ट्वा योगेश्वरं शिवम् ॥ सर्वदेवमयं लिङ्गं गोकर्णे तीर्थसत्तमे ॥३८॥
सनत्कुमारेण विभो स्थापितं कमलापते ॥ तं स्पृष्ट्वा प्राणिनः सर्वे सशरीरा दिवङ्गताः ॥३९॥
तैर्वयं भगवन् सर्वे बाधिताः स्म जगत्पते ॥ अमार्गगैर्दुराचारैर्हतानस्मान् समुद्धर ॥४०॥
ततस्तानाह भगवान् चक्रपाणिः सुरोत्तमः ॥ गच्छध्वं सहिता देवा यथास्थानं यथासुखम् ॥४१॥
छिन्दे योगेश्वरं लिङ्गं चक्रेण सुरसत्तमाः ॥ इत्युक्त्वा तान् जगन्नाथश्चक्रं संचोद्य पाणिना ॥४२॥
मुमोच लिङ्गमुद्दिश्य देवदेवः सुदर्शनम् ॥ सर्वायुधमहामात्रं विष्णुचक्रं सुदर्शनम् ॥४३॥
द्वादशादित्यसदृशं ज्वलन्तं स्वेन तेजसा ॥ गोकर्णं प्रत्यगच्छत् तद्दृष्ट्वा न सेहिरे सुराः ॥४४॥
समागत्य द्विधा चक्रे विष्णुचक्रं सुदर्शनम् ॥ अधोभागं स्थितं भूमौ चक्रोपरि तथापरम् ॥४५॥
मग्नमासीत् द्विजश्रेष्ठ भारेण महता तदा ॥ तद्भारपीडितं चक्रं ममज्जाशु रसातले ॥४६॥
ततो देवाः सगन्धर्वा ऋषयश्च तपोधनाः ॥ विष्णुना सहिताः सर्वे गोकर्णं समुपागमन् ॥४७॥
रुद्रमाराधयामासुश्चक्रार्थं त्रिदिवौकसः ॥ तेभ्यः प्रसादयामास भगवान् वृषभध्वजः ॥४८॥
अवतारयामास विभुस्तद्भागं भवभङ्गकृत् ॥ ततोवतार्य तद्भागं पाताळे समवेशयत् ॥४९॥
तद्भागं द्विजशार्दूल पाताले ह्यवतिष्ठत ॥ ततस्तस्मात् पुनश्चक्रमुत्ततार द्विजोत्तम ॥५०॥
तच्चक्रतीर्थं विख्यातं सर्वपापप्रणाशनम् ॥ स्नातानां तत्र विप्रेन्द्र तीर्थे चक्रस्य पुण्यदे ॥५१॥
राजसूयाश्वमेधाभ्यां फलं भवति निश्चितम् ॥ योगैश्वर्यमवाप्याशु ब्रह्मज्ञानं स विन्दति ॥५२॥
तदारभ्य तु तल्लिङ्गं पुण्यं योगेश्वरं द्विज ॥ चक्रेण खण्डितत्वाच्च चक्रखण्डेश्वराभिधम् ॥५३॥
ख्यातं बभूव लोकेषु सर्वेषु द्विजसत्तम ॥ य इदं पुण्यमाख्यानं शृणोति श्रद्धया नरः ॥५४॥
सर्वपापैः प्रमुक्तस्तु वैराग्यज्ञानबृंहितः ॥ त्रिसप्तकुलजैः सार्धं शिवलोके महीयते ॥५५॥

इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे योगेश्वर चक्रतीर्थ (चक्रखण्डेश्वर) महिमानुवर्णनं नाम त्रिपञ्चाशोऽध्यायः ॥५३॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ५४ ॥  NEXT>>  श्लोक संख्या–३८

## ॥ संवर्तकाश्रमं संवर्तकतीर्थं संवर्तकेश्वरः ॥

सूत उवाच ॥

इत्युक्त्वा नारदो राजन् पुनः संवर्तमब्रवीत् ॥ किमिच्छसि महाभाग तद्ब्रूहि वितरामि ते ॥१॥

अमोघं दर्शनं विद्धि मदीयं ब्रह्मणोत्तम ॥ अशक्यं नास्ति हि मम दातुं देवत्वमप्युत ॥२॥

संवर्तक उवाच ॥

सनत्कुमारो भगवान् यथासिद्धः पुरातनः ॥ तथा सिद्धिर्भवतु मे प्रसादात् तव सुव्रत ॥३॥

वापीयं मम देवर्षे तीर्थेषु प्रवरा भवेत् ॥ आश्रमं च मम ब्रह्मन् लिङ्गं चेदं द्विजोत्तम ॥४॥

नारद उवाच ॥

सिद्धिर्भवतु ते विप्र मत्प्रसादान्महामते ॥ सनत्कुमारो भगवान् यथा सिद्धिमुपागतः ॥५॥

संवर्तक महाबुद्धे तथा भवतु ते ध्रुवम् ॥ वापी च तव भद्रन्ते त्वन्नाम्ना ख्यातिमेतु वै ॥६॥

संवर्तकस्य वापीति तीर्थेषु प्रवरा भवेत् ॥ सप्तजन्मकृतं पापमल्पं वा यदि वा बहु ॥७॥

तत्सर्वं स्नानमात्रेण नाशं यातु नृणां मुने ॥ सहस्रं कपिलानां च गवां दानेन यत्फलम् ॥८॥

तत्फलं कोटिगुणितं भवत्विह नृणां मुने ॥ संवर्तकाश्रममिति आश्रमं ख्यातिमेष्यति ॥९॥

पूज्यं भवतु सर्वत्र त्रिषु लोकेषु सुव्रत ॥ अत्र दत्तं हुतं वापि एकं कोटिर्भविष्यति ॥१०॥

लिङ्गं च तव विप्रेन्द्र संवर्तेश्वरसंज्ञया ॥ ख्यातिं भवतु त्रैलोक्ये क्षिप्रं सिद्धिकरं नृणाम् ॥११॥

फाल्गुणे मासि विप्रेन्द्र सिद्धस्त्वं फल्गुणीषु च ॥ तस्मात् स एव दिवसस्तव तीर्थस्य सेवने ॥१२॥

श्रेष्ठो भवतु विप्रेन्द्र स्नानदानादिकर्मणि ॥ अत्रागत्य नरो यस्तु तस्मिन् काले द्विजोत्तम ॥१३॥

स्नानं वापि जपं वापि दानं वा यजनं तु वा ॥ करोति तत् कोटिगुणं मत्प्रसादाद् भवेद्ध्रुवम् ॥१४॥

---

## अन्येषां आश्रमादीनां वर्णनोपक्रमः

सूत उवाच ॥

इत्युक्त्वा नारदो राजन् देवलोकमगात् प्रभुः ॥ संवर्तकोपि भगवन् सिद्धस्तस्मिन् द्विजोत्तमः ॥१५॥

स्वर्गलोकमगात् क्षिप्रं योगैश्वर्यसमन्वितः ॥ नारदो भगवान् गत्वा समाजं त्रिदिवौकसाम् ॥१६॥

कथामकथयत्तेषां गोकर्णाधिकृतां नृप ॥ अटित्वा सर्वतीर्थानि पुराहं राजसत्तम ॥१७॥

गोकर्णमगमं पश्चात्तस्मिन् मासत्रयं स्थितः ॥ तत्र स्थितेषु तीर्थेषु स्नानं कृत्वा विधानतः ॥१८॥

संवर्तकं मुनिं दृष्ट्वा सर्वांश्च मुनिसत्तमान् ॥ स्थित्वा क्षेत्रे मुनिवर माघान्ते पुनरागतः ॥१९॥

मासमेकं नृपश्रेष्ठ गोकर्णे यो वसेन्नरः ॥ तीर्थसेवी जितक्रोधो मौनव्रतपरायणः ॥२०॥

नियमेन विशेषेण तस्य पुण्यफलं श्रृणु ॥ जन्मायुतैः कृतं पापं नश्यत्येव न संशयः ॥२१॥

परत्र च परां सिद्धिं स प्राप्नोति द्विजोत्तम ॥ तच्छ्रुत्वा तत्र वसतिं कृतवान् ऋषिभिः सह ॥२२॥
तेषां कथा विचित्रार्थाः श्रुताः श्रुतिमनोहराः ॥ व्यासपुत्रः शुकस्तत्र तपस्यति महामनाः ॥२३॥
सर्वे च मुनयस्तत्र कृत्वाश्रमपदं शुभम् ॥ तपोवने पुण्यतमे तपः कुर्वन्ति नित्यशः ॥२४॥
आश्रमेषु च सर्वेषु मुनीनां भावितात्मनाम् ॥ एकैकरात्रं राजेन्द्र तत्र तत्रोषितं मया ॥२५॥
तत्रासन् यानि लिङ्गानि तेषां पूजा मया कृता ॥ समाप्य नियमं तस्मिन् त्रैमासिकमरिन्दम ॥२६॥
अभिनन्द्य मुनीन् सर्वाननुज्ञाप्य च शङ्करम् ॥ तस्मात् क्षेत्रवराद्राजन् आगतोऽहं तवान्तिकम् ॥२७॥
भवन्तं कृतसन्यासं द्रष्टुकामः स्मरन् प्रभो ॥ शौनकादीन्नृपश्रेष्ठ किमन्यच्छ्रोतुमिच्छसि ॥२८॥

शतानीक उवाच ॥

केन पृष्टस्तु देवर्षिः कथामकथयद्दिवि ॥ गोकर्णाधिकृतां सूत किं तद्वद ममानघ ॥२९॥
भूयोपि मे महाप्राज्ञ तत्क्षेत्रस्य महामते ॥ माहात्म्यं कथ्यतां सूत श्रोतुमिच्छा प्रवर्तते ॥३०॥
तत्र स्थितानां तीर्थानामाश्रमाणां च कृत्स्नशः ॥ देवतायतनानां च विस्तरेण वदस्व नः ॥३१॥
महिमानमृषीणां च संस्थानं भुवनस्य च ॥ समुद्रपर्वतानां च देवादीनां महामते ॥३२॥
पूर्वमुक्तं त्वया सूत अस्माकं क्षेत्रविस्तरम् ॥ सृष्टेराद्यमिदं क्षेत्रं तत् कथं सूतनन्दन ॥३३॥
यथा निःसंशयं सूत भवेन्मम तथा वद ॥ शौनकेनैवमुक्तस्तु सूतः पौराणिकोत्तमः ॥३४॥
कथामकथयद्दिव्यां गोकर्णाधिकृतां द्विज ॥

सूत उवाच ॥

शृणु शौनक वक्ष्यामि नृपेण ऋषिभिः सह ॥३५॥
पुराब्जयोनिना सृष्टं गोकर्णं द्विजसत्तम ॥ यत्र सा प्रकृती राजन् रमते पुरुषेण हि ॥३६॥
क्षेत्रं तत्परमं प्रोक्तं नात्र कार्या विचारणा ॥ तत्र स्थितः शिवः साक्षादिति वेदविदो विदुः ॥३७॥
य इदं पठते नित्यं शृणोति श्रद्धया नरः ॥ सर्वपापविनिर्मुक्तः शिवलोके महीयते ॥३८॥

इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे संवर्तकाश्रमवर्णनं नाम चतुःपञ्चाशोऽध्यायः ॥५४॥

## श्रीमहाबलेश्वर(आत्मलिङ्ग)वर्णनोपक्रमः

सूत उवाच ॥

गोकर्णान्नारदो योगी ययौ कैलासपर्वतम् ॥ दृष्ट्वा तत्र महेशानं नत्वा स्तुत्वा जगद्गुरुम् ॥१॥

स्थित्वा तस्मिन् मुहूर्तं तु शम्भोराज्ञां प्रगृह्य च ॥ त्रिविष्टपं ततो गन्तुं प्रस्थितो भरतर्षभ ॥२॥

एतस्मिन्नन्तरे सामगानं श्रुत्वा ततो मुनिः ॥ दिशो विलोकयामास परितः कुरुसत्तम ॥३॥

नृत्यन्तं दृष्टवान् तत्र दशास्यं नारदोऽसुरम् ॥ एवं लङ्काधिपं राजन् धृत्वा वीणां करे मुदा ॥४॥

वादयन्तं कराग्रैस्तु शनैः सामसमुद्भवैः ॥ एतादृशं कुरुश्रेष्ठ रावणं राक्षसाधिपम् ॥५॥

शिवस्य निकटे दृष्ट्वा ज्ञात्वा तस्य मनोगतम् ॥ विस्मयं परमं गत्वा नारदो भरतर्षभ ॥६॥

ततः कैलासशिखरात् जगाम त्रिदशालयम् ॥ सकाशं देवराजस्य त्रैलोक्याटनतत्परः ॥७॥

दूरादायान्तमालोक्य नारदं देवराट् तदा ॥ अभ्युत्थायासनं दत्वा नारदाय महात्मने ॥८॥

पूजयामास देवेन्द्रो अर्घ्यपाद्यादिभिर्नृप ॥ देवैः समं मुनिश्रेष्ठं मुदा परमया युतः ॥९॥

नारदोऽपि कुरुश्रेष्ठ आशीर्भिरभिनन्द्य तम् ॥ उपविष्टस्ततस्तस्यां सभायां मुनिसत्तमः ॥१०॥

वासवोऽथ मुनिं दृष्ट्वा विश्रान्तं भरतर्षभ ॥ तमुवाच ततः शक्रः कुत आगम्यते द्विज ॥११॥

अवारितगतिस्त्वं हि सर्वलोकेषु सत्तम ॥ किमाश्चर्यं त्वया दृष्टं तत्सर्वं वद मे मुने ॥१२॥

सूत उवाच ॥

इत्युक्तो देवराजेन नारदः प्रत्युवाच ह ॥ गोकर्णादागतं विद्धि इदानीं सुरसत्तम ॥१३॥

अटित्वा सर्वलोकांश्च भवन्तं द्रष्टुमागतः ॥ आगच्छता मया दृष्टः पथि रक्षोगणाधिपः ॥१४॥

कैलासशिखरे रम्ये तपश्चरति रावणः ॥ मृगशृङ्गं नेतुकामो लिङ्गं युष्माभिरर्चितम् ॥१५॥

तपसा महता देव सामगानेन नर्तनैः ॥ वीणास्वनेन गिरिशं सन्तोष्य त्रिदिवेश्वर ॥१६॥

लब्ध्वा शम्भोः सकाशात्तु लिङ्गं नेष्यति रावणः ॥ लिङ्गे नीते रावणेन लङ्कां प्रति सुरेश्वर ॥१७॥

नष्टैश्वर्या भविष्यन्ति विबुधा ऋषिभिः सह ॥ तस्माद्यत्नं कुरुष्वाद्य विघ्नार्थं राक्षसस्य हि ॥१८॥

यथा न दीयते तस्मै लिङ्गं यत्नं तथा कुरु ॥ इत्युक्त्वा नारदस्तस्माद् ब्रह्मलोकमगान्मुनिः ॥१९॥

---

## मृगशृङ्गोत्पत्ति वर्णनम्

गते तु नारदे शक्रो बृहस्पतिमुवाच ह ॥ मृगशृङ्गमिति ख्यातं किं तद्वद ममानघ ॥२०॥

कथं तल्लिङ्गमभवद्देवैः सम्पूजितं पुरा ॥ तमाहाङ्गिरसो राजन् न जाने तस्य सम्भवम् ॥२१॥

काश्यपो वेत्ति तत्सर्वं पिता तव सुरेश्वर ॥ तत्र गच्छाव भद्रन्ते स च सर्वं वदिष्यति ॥२२॥

इत्युक्तो गुरुणा शक्रो जगाम पितरं तदा ॥ काश्यपं मुनिशार्दूलं गुरुणा सह भारत ॥२३॥

पितरं सर्वदेवानां ननाम भुवि दण्डवत् ॥ नमस्कृत्वाऽथ पितरमिदमाह शचीपतिः ॥२४॥

मृगशृङ्गस्य मे तात सम्भवं वक्तुमर्हसि ॥ माहात्म्यं तस्य कथय लिङ्गस्य मुनिसत्तम ॥२५॥

सूत उवाच ॥

इन्द्रस्य वचनं श्रुत्वा काश्यपो मुनिपुङ्गवः ॥ कथामकथयद्दिव्यां मृगशृङ्गस्य मुक्तिदाम् ॥२६॥

काश्यप उवाच ॥ ८

शृणु पुत्र परं गुह्यं मृगशृङ्गस्य सम्भवम् ॥ पातालस्थः पुरा रुद्रस्तपस्तीव्रमतप्यत ॥२७॥

स्त्रष्टुकामः प्रजास्तात सात्विकेन पिनाकधृक् ॥ तस्मिंस्तथा वर्तमाने सृष्टा लोकाः स्वयम्भुवा ॥२८॥

त्रिभिर्गुणैः सुरश्रेष्ठ प्रजाः सर्वाश्चतुर्विधाः ॥ तदा चुकोप भगवान् तेषां दृष्ट्वा समुद्भवम् ॥२९॥

सत्वमादाय सर्वेषां भूतानां भुवनाधिपः ॥ पिण्डीकृत्वा तु तत् सत्वं देवदेवो महेश्वरः ॥३०॥

अणुमात्रेषु भूतेषु यत् सत्वं परिवर्तते ॥ तदादाय सुरश्रेष्ठो निर्ममे मृगमुत्तमम् ॥३१॥

तन्न जानन्ति देवेन्द्र ब्रह्माद्या देवतागणाः ॥ ऋते नारायणाद्देवात् सत्वभूतात् शिवस्य च ॥३२॥ 10

तन्मृगेण जगत्स्वामी सह कैलासमास्थितः ॥ ततः प्रजाः स्थावराद्याः सर्वे वै सत्ववर्जिताः ॥३३॥

सुरासुरमनुष्याश्च सात्विकास्तामसास्तथा ॥ समा ह्यासन् सुरश्रेष्ठ नोत्तमाधममध्यमाः ॥३४॥

तत्कारणमविज्ञाय ऋषयो देवतागणाः ॥ गत्वा सर्वे ब्रह्मलोकं तत्र दृष्ट्वा प्रजापतिम् ॥३५॥

नत्वा स्तुत्वा जगन्नाथं स्ववृत्तान्तमथाब्रुवन् ॥ तच्छ्रुत्वा वचनं तेषां ब्रह्मा लोकपितामहः ॥३६॥

सर्वे शृणुत मद्वाक्यं सत्वहीनोऽस्म्यहं सुराः ॥ नारायणो जगद्योनिः परात्परतरोऽव्ययः ॥३७॥

स वेत्ति सर्ववृत्तान्तं तस्माद्यास्याम तं प्रति ॥ इत्युक्त्वा जगतां नाथः सर्वैर्देवर्षिभिः सह ॥३८॥

क्षीरोदशय्याशयनं शङ्खचक्रगदाधरम् ॥ गत्वा प्रणेमुः सहिता ब्रह्माद्याश्च सुरासुराः ॥३९॥

प्रणम्य श्रीधरं भक्त्या इदमूचुस्तदा हरिम् ॥ हरे वयं देवनराः सर्वे स्थावरजङ्गमाः ॥४०॥

सत्वहीनास्तु सर्वेश न जानीमोऽत्र कारणम् ॥ यथा पूर्वं स्थिताः सर्वे तथा कुरु जनार्दन ॥४१॥

लोके पूज्या भविष्यामः सत्वाढ्यास्त्वदनुग्रहात् ॥ स तेषां वचनं श्रुत्वा जातकारुण्यमब्रवीत् ॥
४२॥

देवान् भरतशार्दूल भगवान् गरुडध्वजः ॥

विष्णुरुवाच ॥

सत्वं हृतं वो रुद्रेण कुपितेन दिवौकसः ॥४३॥

सत्वेन भगवान्रुद्रो मृगं दिव्यं विनिर्ममे ॥ स मृगेण महादेवः कैलासे तिष्ठति प्रभुः ॥४४॥
तं गत्वा विबुधश्रेष्ठं गृह्णीध्वं सत्वमात्मनाम् ॥ तपसा शङ्करं तुष्ट्वा भविष्यध्वं निरामयाः ॥४५॥
ददाति रुद्रः सन्तुष्टो युष्मत्सत्वं न चान्यथा ॥ इति तद्वचनं श्रुत्वा देवा विष्णुसमन्विताः ॥४६॥
कैलासमगमन् सर्वे द्रष्टुं देवं महेश्वरम् ॥ गत्वा ते तपसा रुद्रं भक्त्या चाराधयन् तदा ॥४७॥
तेषु तुष्टो महादेवो भक्त्या च नियमेन च ॥ प्रत्यक्षमगमच्छम्भुर्देवान् प्राह शचीपते ॥४८॥
तुष्टोस्मि तपसाऽत्यन्तं युष्माकं देवतागणाः ॥ यथा चित्तेऽभिलषितान् तथा ब्रूत वरान् परान् ॥४९॥
तच्छ्रुत्वा वचनं शम्भोर्देवाः सर्वे तदाऽब्रुवन् ॥ सत्वहीना वयं शम्भो ह्यस्मत्सत्वं च देहि नः ॥
५०॥
तच्छ्रुत्वा वचनं शम्भुस्तेषां सत्वमदात् तदा ॥ यत्कारितं सत्वरूपमृगं तस्मात् सदाशिवः ॥५१॥
गृहीत्वा चात्मनो भागं सर्वं तेभ्यः प्रदत्तवान् ॥ हिमाद्रौ निर्मितः पूर्वं सर्वसत्वमयो मृगः ॥५२॥
अत्यद्भुतो महेशेन कुपितेन सुरेश्वर ॥ रूपं मृगस्य वक्ष्यामि शृणुष्वैकमना भव ॥५३॥
मृगः स काञ्चनो दिव्यो वज्रस्फटिकमौक्तिकैः ॥ समन्वितो देवराज सर्वलक्षणलक्षितः ॥५४॥ चतु
ष्पादस्त्रिनेत्रश्च त्रिशृङ्गश्चारुदर्शनः ॥ सर्वदेवमयः शक्र दिव्यो रुद्रेण निर्मितः ॥५५॥
तस्यैकशृङ्गे भगवान् ब्रह्मा लोकपितामहः ॥ वामञ्च वैष्णवं प्राहुर्मध्यमं शैवमुच्यते ॥५६॥
एतादृशं सत्वभूतं मृगं प्राप्य महेश्वरात् ॥ देवासुरनराः सर्वे मुदिताश्चाभवंस्तदा ॥५७॥
खण्डयित्वा मृगं सर्वैर्गृहीतं सत्वमात्मनाम् ॥ स्वशृङ्गं ब्रह्मणा तात गृहीतं विबुधाधिप ॥५८॥
विष्णुना च सुरश्रेष्ठ तथा रुद्रेण च प्रभो ॥ स्वशृङ्गं नीलकण्ठस्तु दिव्यरूपं महाद्युतिम् ॥५९॥
कैलासे पूजयामास भक्त्या नित्यमतन्द्रितः ॥ यस्य यस्य यदिष्टं स्यात् तत्तत् प्राप्नोति पूजकः ॥
६०॥
तस्य मांसं हृतमभूद्यक्षैर्विद्याधरैः प्रभो ॥ मेदस्तस्य गृहीतश्च अप्सरोभिः सुरोत्तम ॥६१॥
चर्म नागैर्गृहीतं च रक्षोभिश्चास्थिसंचयम् ॥ राक्षसैश्च तथा रक्तं भूम्या शुक्लं समाहृतम् ॥६२॥
खगैः पित्तं कफं देवैर्वातं वै यातुधानकैः ॥ रोमाणि तस्य ऋषयो जगृहुर्विबुधेश्वर ॥६३॥
पिशाचैश्च हृतं मूत्रं पुरीषं पशुभिर्हृतम् ॥ मनुष्यैश्च हृता मज्जा अन्यदन्यैः समाहृतम् ॥६४॥
एवं सर्वाणि चाङ्गानि गृहीतानि सुरादिभिः ॥ उत्तमाधममध्यानि उत्तमाधममध्यमैः ॥६५॥
एवमङ्गानि चादाय सत्ववन्तो बभूविरे ॥

सूत उवाच ॥

पुरा विवादो ह्यभवत् त्रैलोक्यार्थं सुरासुरैः ॥६६॥

देवान् दैत्याः पराजित्य युद्धेऽतिबलिनः प्रभो ॥ अपहृत्य सुरैश्वर्यं बुभुजुर्विषयान् प्रियान् ॥६७॥

सम्पूज्य देवैस्तु शिवं लब्ध्वा शृङ्गं महेश्वरात् ॥ आराध्य प्रापुरैश्वर्यं मृगशृङ्गं शिवस्य च ॥६८॥

हृतं देवैर्देवराज जित्वा देत्यान्रणाजिरे ॥ शङ्कराय ददुः पश्चात्तच्छृङ्गं च सुरेश्वर ॥६९॥

तस्मात्तदेव शृङ्गं च देवैः सम्पूजितं पुरा ॥ यस्मिन् वसति तल्लिङ्गं तस्मिन् वै विजयो भवेत् ॥

७०॥

एवं भूतं तु तल्लिङ्गं यत्पृष्टं कथितं च वः ॥

इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे काश्यपेन इन्द्रबृहस्पत्योर्मृगशृङ्गोत्पत्तिवर्णनं नाम पञ्चपञ्चाशोऽध्यायः ॥५५॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ५६ ॥  NEXT>>  श्लोक संख्या–९०

## ॥ महाबलेश्वर प्रतिष्ठापनम् ॥

सूत उवाच ॥

तस्य तद्वचनं श्रुत्वा देवराजबृहस्पती ॥ शिरसा काश्यपं नत्वा गग्मतुस्तौ मुदान्वितौ ॥१॥

देवलोकं कुरुश्रेष्ठ ततस्तत्र शचीपतिः ॥ सुरान् सर्वान् समाहूय इदमाज्ञापयत् तदा ॥२॥

देवाः शृणुध्वं मद्वाक्यं शासनान्मम गच्छत ॥ कैलासं पर्वतश्रेष्ठमिदानीं शङ्करालयम् ॥३॥

मृगशृङ्गं नेतुकामो लङ्केशस्तत्र तिष्ठति ॥ तपः करोति घोरं स तद्विघ्नं कुरुतानघाः ॥४॥

तच्छ्रुत्वा देवराजस्य भाषितं त्रिदिवौकसः ॥ सबलाः सगणा राजन् जग्मुः कैलासमञ्जसा ॥५॥

इन्द्रेण सह राजेन्द्र नापश्यंस्तत्र रावणम् ॥ एतस्मिन्नन्तरे पूर्वं रावणो राक्षसाधिपः ॥६॥

महता सामगानेन नृत्तेन विविधेन च ॥ तपसा नियमेनैव घोरेण भरतर्षभ ॥७॥

तोषयामास वै शम्भुं गिरिशं भक्तवत्सलम् ॥ ततः प्रत्यक्षमगमद्रावणस्य महेश्वरः ॥८॥

पार्वत्या प्रियया सार्धं वृषारूढो गणान्वितः ॥ सम्प्रेक्ष्य रावणं शम्भुर्गायन्तं सामगायनैः ॥९॥

मुदा परमया युक्तो विस्मयोत्फुल्ललोचनः ॥ मेघगम्भीरया वाचा अब्रवीद्दशकन्धरम् ॥१०॥

शङ्कर उवाच ॥

लङ्केश्वर महाभाग तुष्टोहं नितरां तव ॥ नृत्तेन सामगीतेन तपसाऽनन्यपूर्वया ॥११॥

भक्त्या च नियमेनाद्य वरं ब्रूहि यथेप्सितम् ॥ दास्यामि तव लङ्केश यद्यपि स्यात् सुदुर्लभम् ॥१२॥
सन्देहो नात्र कर्तव्यो विलम्बं मा कृथाधुना ॥

सूत उवाच ॥

इत्युक्ते शम्भुना राजन् रावणो राक्षसाधिपः ॥१३॥
साष्टाङ्गं प्रणिपत्याथ प्रवद्धकरसम्पुटः ॥ किञ्चिन्नम्राननो भूत्वा स्थित्वा तत्पुरतो नृप ॥१४॥
स्तुतिं चक्रे कुरुश्रेष्ठ शङ्करं राक्षसाधिपः ॥
नमो भूतनाथाय भक्तप्रियाय नमः पार्वतीशाय पञ्चाननाय ॥
नमो नन्दिवाहाय चर्माम्बराय नमः शूलहस्ताय भस्मप्रियाय ॥१५॥
नमो वामदेवाय भस्मप्रियाय नमः सर्पभूषाय गङ्गाधराय ॥
नमो भालनेत्राय कालान्तकाय नमः कामरूपाय कामान्तकाय ॥१६॥
नमः कैलासपतये सामगानप्रियाय च ॥ नमस्त्रिपुरसंहर्त्रे स्कन्दपित्रे नमो नमः ॥
इति स्तुत्वा दशग्रीवः शङ्करं भरतर्षभ ॥१८॥
वरं वव्रे यथाकामं रावणो राक्षसाधिपः ॥ वरं ददासि चेन्मह्यं वरार्हो यदि चाप्यहम् ॥१९॥
देहि प्राणसमं लिङ्गं मृगशृङ्गमयं शिव ॥ इत्युक्त्वा पुरतः शम्भोर्दण्डवत् प्रणनाम सः ॥२०॥
तच्छुत्वा स महादेवश्चिन्तामाप महत्तराम् ॥ चिन्तायुक्तो महादेवः सम्पुटं गृह्य सत्वरम् ॥२१॥
सम्पुटान्तःस्थितं लिङ्गं सम्प्रगृह्य त्रिलोचनः ॥ पुनः सम्पूज्य तल्लिङ्गमावाह्येशानमन्त्रतः ॥२२॥
निक्षिप्य सम्पुटे भूयो गन्धपुष्पाक्षतादिभिः ॥ सम्पूज्य विधिवल्लिङ्गं पिधायोपरि सम्पुटम् ॥२३॥
दोरेण बध्वा सुदृढं भूयो वस्त्रे पिधाय तम् ॥ पुनर्दोरेण संवेष्ट्य सद्योजातादि मन्त्रकैः ॥२४॥
आवाह्य सम्पुटे चाधः सद्योजातं परात्परम् ॥ तथाचोपरिभागस्थे सम्पुटे दोरसंयुते ॥२५॥
वामदेवं तथावाह्य अघोरं वसने नृप ॥ दोरे तत्पुरुषं शम्भुमुपरिस्थे कुरूद्वह ॥२६॥
आवाह्य लिङ्गे त्वीशानं पञ्चब्रह्मात्मकं शिवः ॥ ददौ दशाननकरे भविष्यत्कार्यगौरवात् ॥२७॥
दशाननमुवाचेदं लिङ्गं दत्वा सदाशिवः ॥ दशानन निबोधेदं वाक्यं राक्षसपुङ्गव ॥२८॥
पादचारेण गन्तव्यं लिङ्गं धृत्वा पुरीं स्वकाम् ॥ न निधेयं त्वया पुत्र भूमौ पथि कथञ्चन ॥२९॥
यत्रैतत् स्थाप्यते लिङ्गं तत्रैवास्ते न संशयः ॥ इत्युक्त्वा भगवान् शम्भुस्तत्रैवादर्शनं गतः ॥३०॥

सूत उवाच ॥

दशाननोऽपि राजेन्द्र लिङ्गं प्राप्य मुदा हरात् ॥ लिङ्गं धृत्वा करे राजन् कैलासान्निर्ययौ क्षणात्

।।३१।।

वेगेन महता युक्तो पादचारेण रावणः ॥ दक्षिणां दिशमुद्दिश्य सप्तकोटीश्वरं ययौ ॥३२॥

तत्र दृष्ट्वा महल्लिङ्गं सप्तकोटीश्वरं नृप ॥ माध्याह्निकं कर्म कुर्वन् तत्रोवास तदा नृप ॥३३॥

ततो देवगणाः सर्वे कैलासे रावणं नृप ॥ मृगयित्वा न दृष्ट्वा ते शम्भोरन्तिकमागमन् ॥३४॥

अपृच्छन् देवताः शम्भुं प्रवृत्तिं रावणस्य तु ॥ तानुवाच महादेवो रावणो राक्षसाधिपः ॥३५॥

लिङ्गं गृहीत्वा त्रिदशाः दक्षिणाभिमुखो ययौ ॥ पादचारेण वै याति गृहीत्वा लिङ्गमुत्तमम् ॥३६॥

तद्यतध्वं सुरश्रेष्ठा यथा स्थास्यति भूतले ॥ तल्लिङ्गरत्नं दुष्टात्मा मा विलम्बत देवताः ॥३७॥

इति श्रुत्वा ततो देवा नमस्कृत्वा महेश्वरम् ॥ कैलासान्निर्ययुर्वेगान्मार्गयन्तो दशाननम् ॥३८॥

न दृष्ट्वा रावणं क्वापि संम्लानमुखपङ्कजाः ॥ दुःखेन महता युक्ताः सागरं प्रतिपेदिरे ॥३९॥

पश्चिमस्योदधेस्तीरे विविशुस्तत्र देवताः ॥ तदुपायं विचिन्वन्तो दर्शने रावणस्य हि ॥४०॥

एतस्मिन्नन्तरे काले नारदस्तत्र चागतः ॥ दृष्ट्वा मुनिर्देवगणान् पप्रच्छेन्द्रं तदा नृप ॥४१॥

पुरुहूत किमर्थं त्वं स्थितवानत्र दुःखितः ॥ सर्वैर्देवगणैः सार्धं तव चिन्तां वदाधुना ॥४२॥

इन्द्र उवाच ॥

श्रूयतां मुनिशार्दूल मम चिन्तां वदामि ते ॥ दशाननो लिङ्गरत्नं तपसा तोष्य शङ्करम् ॥४३॥

लब्ध्वा शम्भोः सकाशात्तु लङ्कां प्रति गतोऽधुना ॥ तं मार्गयन्तः कैलासाद्वयं सर्वे समागताः

।।४४।।

सर्वान् देशानतिक्रम्य न दृष्ट्वा क्वापि रावणम् ॥ दुःखेन महता युक्ता वयं चात्र समागताः ॥४५॥

तस्य प्रवृत्तिं जानासि कथ्यतां यदि नो द्विज ॥

सूत उवाच ॥

तच्छ्रुत्वा नारदो वाक्यं इन्द्रस्य भरतर्षभ ॥४६॥

पुरन्दरं पुनः प्राह वाक्यं विनयपूर्वकम् ॥

नारद उवाच ॥

रावणस्य वदाम्यद्य प्रवृत्तिं श्रुणु वासव ॥४७॥

त्यज चिन्तां महाबाहो दृष्टो लङ्काधिपो मया ॥ सप्तकोटीश्वरं नाम लिङ्गं वै दक्षिणापथे ॥४८॥

आस्ते तमर्चयन् भक्त्या तत्रायं दशकन्धरः ॥ मध्याह्नसमये दृष्टो मया तत्र सुरेश्वर ॥४९॥

उपायं तस्य वक्ष्यामि शृणु विघ्नार्थमप्युत ॥ लिङ्गप्रदानसमये रावणं चेदमुक्तवान् ॥५०॥

न निधेयं त्वया लिङ्गं भूमौ पथि कथञ्चन ॥ यत्रेदं क्षिप्यसे लिङ्गं स्थिरं तत्र न संशयः ॥५१॥
इति श्रुतं मया पूर्वं तद्यतस्व सुरेश्वर ॥ देवैः सहातिशीघ्रेण कुरु विघ्नं शचीपते ॥५२॥
यथा निक्षिपते भूमौ मृगशृङ्गं दशाननः ॥ तथा कुरुष्व देवेश ततो दुःखाद्विमोक्ष्यसे ॥५३॥
नारदस्य वचः श्रुत्वा सर्वे देवाः सवासवाः ॥ हर्षेण महता युक्ताः सम्भाष्य च परस्परम् ॥५४॥
ब्रह्मणा विष्णुना सार्धं सप्तकोटीश्वरं ययुः ॥ तत्र दृष्ट्वा दशग्रीवं हृष्टा ह्यासन् दिवौकसः ॥५५॥
रावणोऽपि सुरान् दृष्ट्वा जगर्ज जलदो यथा ॥ तान् तृणीकृत्य लङ्केशो गोकर्णाभिमुखो ययौ ॥५६॥
तमन्वयुर्देवगणा विष्ण्वाद्या भरतर्षभ ॥ चिन्तयन्तो ह्युपायं ते लिङ्गस्य स्थापने भुवि ॥५७॥
गोकर्णे भरतश्रेष्ठ गोशृङ्गे पर्वतेऽविशन् ॥ ततो विष्णुश्चिरं दध्यौ लिङ्गस्य स्थापने भुवि ॥५८॥
उपायं भरतश्रेष्ठ ज्ञातवानचिराद्धरिः ॥ तस्य व्रतमिदं चास्ति त्रैलोक्ये विश्रुतं महत् ॥५९॥
सन्ध्यामुपास्ते तत्काले नातिक्रमति शत्रुहा ॥ इत्येवं चिन्तयित्वाऽसौ भास्करं तिमिरापहम् ॥६०॥
प्राच्छादयदमेयात्मा चक्रेण गरुडध्वजः ॥ ततो गजास्यमाहूय वचनं चेदमब्रवीत् ॥६१॥
गजानन महाबाहो वचनान्मम साम्प्रतम् ॥ वटुरूपधरस्त्वं हि याहि रावणसन्निधिम् ॥६२॥
रावणो राक्षसवरो मृगशृङ्गमयं शिवम् ॥ सन्ध्यां कर्तुं गृहीत्वा तु पितृस्थालीं समेष्यति ॥६३॥
यदि यास्यसि चेत् त्वं वै अधुना रावणान्तिकम् ॥ स दास्यति महल्लिङ्गं त्वत्करे गणनायक
॥६४॥
लिङ्गं तस्माद्गृहीत्वा तु तं ब्रूहि वचनं त्विदम् ॥ दशानन महाबाहो त्वल्लिङ्गं च धराम्यहम् ॥६५॥
मय्यस्ति शक्तिर्यावच्च तावत् कालं धराम्यहम् ॥ नो चेल्लिङ्गं क्षिपाम्येव त्रिः समाहूय वै भुवि
॥६६॥
कर्तुं नार्हसि कोपं त्वं मय्येवं ब्रूहि विघ्नराट् ॥ तथेति दत्वा लिङ्गं तु त्वत्करे गणनायक ॥६७॥
सन्ध्यार्घ्यनियमं कर्तुं ततो यास्यति रावणः ॥ तदा त्वं त्रिः समाहूय रावणं गणनायक ॥६८॥
मृगशृङ्गं स्थापयस्व तत्र श्लेष्मातके वने ॥ ततस्त्वं कीर्तिमतुलामवाप्स्यसि न संशयः ॥६९॥
इत्युक्त्वा गणनाथं तु सान्त्वयित्वा जनार्दनः ॥ प्रेषयामास राजेन्द्र विघ्नार्थं रावणस्य हि ॥७०॥
गजास्यो बहुरूपं तु धृत्वा प्रायाद्धरेर्गिरः ॥ रावणस्यान्तिके राजन् शनैस्तत्र चचार ह ॥७१॥
रावणोऽथ पितृस्थालीं गत्वा तत्र ददर्श ह ॥ भास्करं कुरुशार्दूल पुष्करे हृतरश्मिकम् ॥७२॥
अस्तङ्गतोर्क इत्येवं मन्यमानो निशाचरः ॥ कथं सन्ध्यामुपासिष्ये धृत्वा लिङ्गं करेऽधुना ॥७३॥
इत्येवं चिन्तयानस्तु दिशो दश विलोकयन् ॥ ततोऽपश्यद्गणाध्यक्षं वटुरूपधरं नृपः ॥७४॥

तं दृष्ट्वा रावणो मोहाद्गजाननमुवाच ह ॥

रावण उवाच ॥

मुनिपुत्र नमस्तेऽस्तु शृणुष्व वचनं मम ॥७५॥

लिङ्गमेतद्धि कैलासादानीतं रावणोऽस्म्यहम् ॥ गृहाण त्वं मत्प्रसादाद्वाञ्छितं लभसे फलम् ॥७६॥

यावत् सन्ध्यार्घ्यनियमं कृत्वा यास्यामि तेऽन्तिकम् ॥ तावद् गृहाण मल्लिङ्गमादास्येऽहं पुनर्वटो ॥७७॥

इत्युक्तो गणनाथस्तु रावणेन तमब्रवीत् ॥

विनायक उवाच ॥

वोढुं ममास्ति चेच्छक्तिः करिष्ये वचनं तव ॥७८॥

अशक्यं चेत् क्षिपाम्येतद्भूमौ मा क्रुध रावण ॥ त्रिः समाहूय वचसा लिङ्गमेतन्न संशयः ॥७९॥

इत्युक्तो गणनाथेन तथेति दशकन्धरः ॥ दत्वा तस्य करे लिङ्गं सन्ध्योपासनमारभत् ॥८०॥

कृत्वा जजाप गायत्रीं पापस्थाल्यां कुरूद्वह ॥ जपध्यानविधानेन स्थिते तस्मिन्निशाचरे ॥८१॥

एतस्मिन्नन्तरे काले विष्ण्वाद्या देवतागणाः ॥ परस्परमथामन्त्र्य विलम्बनं भवेदिति ॥८२॥

भारं समस्तलोकस्य चिक्षिपुर्लिङ्गमूर्धनि ॥ धृत्वा राजन् गणाध्यक्षो हस्ते लिङ्गं समाह्वयत् ॥८३॥

दशाननं त्रिवारं तु शीघ्रमागम्यतामिति ॥ महद्भारमभूल्लिङ्गं न वोढास्मि कथञ्चन ॥८४॥

इत्युक्त्वा भूतले लिङ्गं स्थापयामास विघ्नराट् ॥

सूत उवाच ॥

वैवस्वतेन्तरे राजन् त्रयोविंशतिमे शुभे ॥८५॥

त्रेतायुगे त्वीश्वरेब्दे शरत्काले नृपोत्तम ॥ ऊर्जशुक्लप्रतिपदि व्यतीपाते रवेर्दिने ॥८६॥

तुलामासे मीनलग्ने विशाखायां प्रतिष्ठितम् ॥ ततो हरिः स्वकं चक्रमुपसंहृतवान् रवेः ॥८७॥

ततो देवगणाः सर्वे हर्षेण महता युताः ॥ लिङ्गस्योपरि राजेन्द्र पुष्पवृष्टिं ववर्षिरे ॥८८॥

वीणावेणुमृदङ्गांश्च वादयन्तः सुरोत्तमाः ॥ गिरौ ताम्रतले तत्र ननृतुर्गीतनिस्वनैः ॥८९॥

शम्भोर्लिङ्गस्थापनं ये पठन्ति शृण्वन्ति चानन्यमनसो मनुष्याः ॥

ते चेह भोगाननुभूय चेप्सितान् प्रयान्ति चान्ते पदमीश्वरस्य ॥९०॥

इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे महाबलेश्वरप्रतिष्ठापनं नाम षट्पञ्चाशोऽध्यायः ॥५६॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ५७ ॥  NEXT>>  श्लोक संख्या–५३

॥ कलकलेश्वर–महागणपति–संपुटेश्वरः(सज्जेश्वरः)–गुणेश्वरः(गुणवन्तेश्वरः)–मृडेश्वरः(मुरुडेश्वरः)–दोरेश्वरः(धारेश्वरः)स्थापनं–पन्चलिंगमहिमानुवर्णनं च ॥

## कलकलेश्वरः

शतानीक उवाच ॥

ततः किमकरोत् ब्रह्मन् रावणो राक्षसेश्वरः ॥ लिङ्गे प्रतिष्ठिते भूम्यां गजास्येन शिवात्मके ॥१॥
तन्मे विस्तरतो ब्रूहि सूत पौराणिकोत्तम ॥ यदा हरिः स्वकं चक्रमुपसंहृतवान् रवेः ॥२॥
तदा ददर्श चाकाशे भास्करं दीप्ततेजसम् ॥ भूम्यां प्रतिष्ठितं लिङ्गं गजास्येन ददर्श ह ॥३॥
कोपेन महताविष्टो लज्जया च दशाननः ॥ ज्ञात्वाऽत्मवञ्चनं राजन् कृतं देवैर्दशाननः ॥४॥
प्रतिकर्तास्मि तेषां वै इति मत्वा पराक्रमी ॥ दत्वार्घ्यं जपकर्मादि समाप्य नियमं नृप ॥५॥
पितृस्थाल्यां दशग्रीवस्ततो लिङ्गान्तिकं ययौ ॥ गत्वा प्रतिष्ठितं लिङ्गं दृष्ट्वा राजन्निशाचरः ॥६॥
लिङ्गं बलादुद्धरिष्ये इति मत्वा तदाऽसुरः ॥ दोर्भ्यां लिङ्गं प्रगृह्याशु जानुभ्यामवनिं गतः ॥७॥
चकर्ष सर्वबलतो रावणो राक्षसाधिपः ॥ तदा चचाल पृथिवी सशैलवनकानना ॥८॥
यदा प्रतिष्ठितमभूद्गजास्येन भुवि नृप ॥ तदैव तल्लिङ्गरत्नं सप्तपातालमाक्रमत् ॥९॥
कूर्मपृष्ठावधिगतं ततो राक्षसपुङ्गवः ॥ न शशाकोद्धर्तुमेतत् जानुभ्यामपतद्भुवि ॥१०॥
वमन् रुधिरमत्यन्तं त्रिदशा ददृशुश्च तम् ॥ पतितं मूर्छितं दृष्ट्वा जहसू ऋषिभिः सह ॥११॥
ततः शब्दः कलकलस्तत्रात्यन्तमभून्नृप ॥ ततो ववर्ष पर्जन्यः पुष्पवृष्टिं गिरौ तदा ॥१२॥
तत्र देवैः सऋषिभिः स्थापितं लिङ्गमुत्तमम् ॥ कलकलेश्वरं नाम त्रिषु लोकेषु विश्रुतम् ॥१३॥
देवर्षिभिः पूजितं तत् पुण्यं साक्षात् शिवात्मकम् ॥ तस्य दर्शनमात्रेण नृणां भरतसत्तम ॥१४॥
ब्रह्महत्यादिपापानि नाशमायान्ति तत्क्षणात् ॥

---

## वैवाहिकगिरिः

तस्य लिङ्गस्य सविधे उदीच्यां दिशि संस्थितः ॥१५॥
वैवाहिको नाम गिरिः सर्वसिद्धनिषेवितः ॥ तस्य दर्शनमात्रेण त्रिवर्गं लभते नरः ॥१६॥

तत्र गत्वा नरो राजन् दक्षिणाशां विलोकयन् ॥ प्रदक्षिणीकृत्य तं च त्रिवारं यस्तु भारत ॥१७॥
स्थित्वा तस्य तले लिङ्गं प्रणम्य प्रणतेन्द्रियः ॥ अष्टाक्षरं जपेन्मन्त्रं सऋषिछन्ददैवतम् ॥१८॥
उच्चैः शब्दं प्रकुर्वीत हरिरित्यथवा हरः ॥ तच्छ्रुत्वाऽऽकाशगङ्गा वै देवी त्रिपथगामिनी ॥१९॥
अभिषिञ्चति राजेन्द्र साद्यापि कुरुनन्दन ॥ कृतत्रेतद्वापरेषु विपरीतं कलौ युगे ॥२०॥
एवं करोति चेद्राजन्नमृतत्वं स गच्छति ॥ ष्ठ स्र

---

## महागणपतिः

लब्धसंज्ञो मुहूर्ताद्वै रावणो लोककण्टकः ॥२१॥
हृष्टान् दिवौकसो दृष्ट्वा लज्जयोत्थाय वेगवान् ॥ गणेशनिकटे गत्वा कोपेन महतावृतः ॥२२॥
मुष्टिं बध्वा दृढं सोऽथ ताडयामास मस्तके ॥ एवं सन्ताडितो मूर्ध्नि रावणेन गजाननः ॥२३॥
आग्नेय्यां दिशि लिङ्गस्य पृष्ठतः स्थितवान्नृप ॥ पश्चिमाभिमुखो भूत्वा चत्वारिंशत् पदे नृप ॥२४॥
बहुरूपी गणाध्यक्षः सर्वसिद्धिप्रदायकः ॥

---

## संपुटेश्वरः(सज्जेश्वरः)

रावणोऽपि कुरुश्रेष्ठ ताडयित्वा गजाननम् ॥२५॥
कोपेन महता युक्तो लिङ्गस्यान्तिकमागतः ॥ वसनं लिङ्गरत्नस्य सम्पुटौ रत्ननिर्मितौ ॥२६॥
तथा सूत्रं नृपश्रेष्ठ सोऽपश्यद्दशकन्धरः ॥ लिङ्गस्य पुरतो राजन् तान्यादाय पृथक्पृथक् ॥२७॥
लिङ्गस्य सम्पुटं चाद्यं सद्योजातात्मकं परम् ॥ गृहीत्वा दशकण्ठस्तं उदीच्यां दिशि चाक्षिपत्
॥२८॥
तेन प्रक्षिप्तमात्रेण सम्पुटो रत्ननिर्मितः ॥ सार्धद्वियोजने राजन् पपात भुवि दीप्तिमान् ॥२९॥
सद्योजातात्मकं लिङ्गं बभूव स तु तत्क्षणात् ॥ तस्य दर्शनमात्रेण वाञ्छितार्थो भवेद्ध्रुवम् ॥३०॥
सम्पुटेश्वरनाम्ना तु त्रैलोक्ये विश्रुतं त्वभूत् ॥

---

## गुणेश्वरः(गुणवन्तेश्वरः)

रावणोपि तथान्यं तु सम्पुटं गुणसंयुतम् ॥३१॥
लिङ्गस्याच्छादकं राजन् वामदेवात्मकं शुभम् ॥ आदाय प्राक्षिपत् तं वै दक्षिणस्यां दिशि नृप
॥३२॥

तेन प्रक्षिप्तमात्रं तु सम्पुटं गुणसंयुतम् ॥ त्रियोजनमिते देशे गोकर्णादपतद्भुवि ॥३३॥
गुणेश्वराभिधं लिङ्गं वामदेवात्मकं परम् ॥ तेन नाम्ना ख्यातमभूत् त्रैलोक्ये नृपसत्तम ॥३४॥
तस्य दर्शनमात्रेण आजन्मचरितं महत् ॥ पापं प्रशममायाति तत्क्षणान्नात्र संशयः ॥३५॥
यं यं कामयते कामं तं तमाप्नोति पूजकः ॥

---

## मृडेश्वरः(मुरुडेश्वरः)

रावणोऽपि ततः कोपात् प्रगृह्य वसनं तु तत् ॥३६॥
तं पिण्डीकृत्य स तदा लज्जाऽमर्षसमन्वितः ॥ याम्यां दिशि प्रचिक्षेप स तदा वस्त्रपिण्डकम्
॥३७॥
अघोररूपं तद्रम्यं पपात भुवि तत्क्षणात् ॥ सार्धत्रियोजने देशे गोकर्णाद्राजसत्तम ॥३८॥
अघोरात्मकमेतद्धि स्यान्मृडेश्वरनामकम् ॥ तन्नाम्ना ख्यातमभवत् त्रिषु लोकेषु पार्थिव ॥३९॥
तस्य दर्शनमात्रेण सर्वान् कामानवाप्नुयात् ॥

---

## दोरेश्वरः(धारेश्वरः)

ततो दोरं गृहीत्वा तत्पुरुषात्मकमुत्तमम् ॥४०॥
पश्यत्सु सर्वदेवेषु प्राक्षिपद्दशकन्धरः ॥ याम्यां दिशं प्रति नृप स दोरं दीपयद्दिशः ॥४१॥
सार्धयोजनके देशे पपात भुवि भूमिप ॥ ततो बभूव तल्लिङ्गं परं तत्पुरुषात्मकम् ॥४२॥
दोरेश्वराभिधानेन सर्वपापहरं त्वभूत् ॥ तस्य दर्शनमात्रेण संसाराब्धिं तरेज्जनः ॥४३॥

---

## पन्चलिंगमहिमा

मृगशृङ्गमयं लिङ्गमीशानात्मकमुच्यते ॥ सम्पुटेशं गुणेशञ्च मृडेशं दोरनामकम् ॥४४॥
एतानि पञ्चलिङ्गानि पञ्चब्रह्मात्मिकानि वै ॥ एकस्मिन् दिवसे यस्तु पूजयेन्मनुजो नृप ॥४५॥
स पञ्चपातकैर्घोरैराजन्मचरितैरपि ॥ मुच्यते नात्र सन्देहो ब्रह्मलोकं स यास्यति ॥४६॥
प्रभाते यः समुत्थाय नित्यं स्मरति मानवः ॥ एतानि पञ्चलिङ्गानि स मुक्तो नात्र संशयः ॥४७॥
सप्तजन्मकृतैः पापैर्ज्ञानतोऽज्ञानतोपि वा ॥ ब्रह्महत्यादिकैर्वापि संयुक्तोऽप्युपपातकैः ॥४८॥
नित्यं त्रिकालस्मरणान्मुच्यते नात्र संशयः ॥ भुक्त्वा भोगान् बहुविधानिहलोके सुखावहान् ॥४९॥
अन्ते सायुज्यमाप्नोति शिवस्य भरतर्षभ ॥

सूत उवाच ॥

ततो दशाननो राजन् तदा व्यर्थमनोरथः ॥५०॥
किञ्चिन्नम्राननो भूत्वा गोकर्णान्निर्ययौ नृप ॥ लङ्कामुद्दिश्य तद्रक्षः शतशृङ्गस्य मूर्धनि ॥५१॥
गुहां प्रविश्य स तदा प्रविश्य लवणाम्बुधिम् ॥ विवेश स्वपुरीं लङ्कां वञ्चितो देवतागणैः ॥५२॥
गत्वा स्वभवनं राजन् यथापूर्वमतिष्ठत ॥
ये मानुषाः पञ्चलिङ्गोद्भवं वै शृण्वन्ति गायन्ति च श्रावयन्ति ॥
ते चेह भोगाननुभूय चान्ते व्रजन्ति शम्भोः पदमव्ययं ध्रुवम् ॥५३॥

इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे सद्योजातादिलिङ्गस्थापनवर्णनं नाम सप्तपञ्चाशोऽध्यायः ॥५७॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ५८ ॥  NEXT>>  श्लोक संख्या–११०

## ॥ वायुकैलासगमनं ईश्वरगोकर्णागमनं पुनःकैलासप्रवेशः – विष्णु षण्मुख वीरभद्रादीनां गोकर्णक्षेत्रे वासः ॥

### परमेश्वरेण गोकर्णे आत्मलिंगपूजनम्

शतानीक उवाच ॥
रावणे तु गते ब्रह्मन् लङ्कां भग्नमनोरथे ॥ किमकुर्वंस्तदा देवास्तन्मे विस्तरतो वद ॥१॥
सूत उवाच ॥
शृणु राजन् प्रवक्ष्यामि दशास्ये स्वपुरीं गते ॥ यत्र यत्र प्रचिक्षिप्तं लिङ्गस्याच्छादनादिकम् ॥२॥
रावणेन क्रुधा सर्वं तत्र तत्राव्रजन् सुराः ॥ तत्तत्स्थाने स्थितं लिङ्गमपश्यन् देवतागणाः ॥३॥
क्रमेण तानि लिङ्गानि सम्पुटेशादिकानि तु ॥ पञ्चब्रह्मात्मकान्येवं देवा विस्मयमाययुः ॥४॥
मृगशृङ्गस्य सविधे सर्वेदेवाः सवासवाः ॥ विविशुः परितो राजन् पश्यन्तो लिङ्गमुत्तमम् ॥५॥
महासत्वं महेशस्य शक्रोऽथ स्वगुरोर्गिरः ॥ विश्वकर्माणमाहूय इदं प्राह वचः स्फुटम् ॥६॥
इन्द्र उवाच ॥
विश्वकर्मन् महाप्राज्ञ गण्डकीं याहि सत्वरम् ॥ तत्र गत्वाऽज्ञया मेद्य पञ्चपीठानि चानय ॥७॥
श्रुत्वा देवपतेर्वाक्यं विश्वकर्मा नृपोत्तम ॥ स गत्वा तत्र हर्षेण पीठान्यत्युत्तमानि तु ॥८॥
श्लक्ष्णानि पञ्च राजेन्द्र कारयित्वाऽतिवेगतः ॥ मृगशृङ्गादिलिङ्गेषु योजयित्वा विधानतः ॥९॥

ततो ब्रह्मादयो देवा मुनिभिः सह भारत ॥ मृगशृङ्गादिलिङ्गानां पञ्चानां मूर्ध्नि तत्क्षणात् ॥१०॥
हर्षेण महता युक्ता ववर्षुः  पुष्पवर्षणम् ॥ देवदुन्दुभयो नेदुर्गन्धर्वा ललितं जगुः ॥११॥
उर्वश्यप्सरसङ्घाश्च ननृतुस्तत्र भारत ॥ ततो विष्ण्वादयो देवा भविष्यत्कार्यगौरवात् ॥१२॥
अन्योन्यमालोच्य मनसि हर्षेण महता युताः ॥ नभस्वन्तं समाहूय वचनं चाह केशवः ॥१३॥

विष्णुरुवाच ॥

समीरण महाबुद्धे शृणु मे परमं वचः ॥ कैलासे सह पार्वत्या पार्षदैः सह शङ्करः ॥१४॥
चिन्तयानो हृदा लिङ्गं रक्षसाऽपहृतं स्वकम् ॥ आस्ते तत्र महादेवो याहि तं वचनान्मम ॥१५॥
सर्वं कथय वृत्तान्तं शङ्कराय महात्मने ॥ इत्युक्तो विष्णुना वायुर्गत्वा चेश्वरसन्निधिम् ॥१६॥
दृष्ट्वा शम्भुं नमस्कृत्य कृताञ्जलिरुवाच ह ॥ शङ्करं भरतश्रेष्ठ मृगशृङ्गस्य संस्थितिम् ॥१७॥
सम्पुटेशादिलिङ्गानामुद्भवं च यथाक्रमम् ॥

पवन उवाच ॥

कैलासान्निर्गतो देव रावणो राक्षसाधिपः ॥१८॥
सप्तकोटीश्वरं गत्वा माध्याह्नं कर्म चाकरोत् ॥ ततो देवाश्चिन्तयन्तो गोकर्णं क्षेत्रमागमन् ॥१९॥
रावणोऽपि समागच्छद्गोकर्णं क्षेत्रमुत्तमम् ॥ ततो विष्णुः स्वचक्रेण छादयामास भास्करम् ॥२०॥
अस्तङ्गतोऽर्क इत्येवं चिन्तयानस्तदाऽसुरः ॥ सन्ध्याकर्म कथं कुर्वे गृहीत्वा शङ्करं करे ॥२१॥
इति चिन्ताकुले तस्मिन् गजास्यो विष्णुवाक्यतः ॥ वटुरूपधरो भूत्वा तत्रागाद्विघ्नराट् स्वयम् ॥
२२॥
तं दृष्ट्वा रावणः सोऽथ समाहूय गजाननम् ॥ लिङ्गं तस्य करे दत्वा सन्ध्याकर्म समारभत् ॥२३॥
ततस्तत्र गजास्येन स्थापितं लिङ्गमुत्तमम् ॥ विष्णुः सुदर्शनं चक्रमुपसंहृतवान् तदा ॥२४॥
रावणोऽपि रविं दृष्ट्वा क्रोधाकुलितमानसः ॥ मायां देवकृतां मत्वा ययौ देवस्य सन्निधिम् ॥२५॥
मृगशृङ्गं गृहीत्वा तु चकर्ष बलवत्तरः ॥ पपात भूम्यां रक्तौघं वमन् राक्षसपुङ्गवः ॥२६॥
ततः क्रोधेन महता ताडयित्वा गजाननम् ॥ गृहीत्वा सम्पुटं सोऽथ क्षिप्तवानुत्तरादिशम् ॥२७॥
सम्पुटेशाभिधं लिङ्गं बभूव सुमहोज्वलम् ॥ उर्ध्वसम्पुटमादाय सोक्षिपद्दक्षिणादिशि ॥२८॥
गुणेश्वराभिधं लिङ्गं बभूव सुमनोहरम् ॥ ततो दोरं समादाय दक्षिणस्यां व्यचिक्षिपत् ॥२९॥
दोरेश्वराभिधानेन ख्यातमासीन्महेश्वर ॥ तद्वस्त्रमपि देवेश दक्षिणस्यामुदक्षिपत् ॥३०॥
मृडेश्वराभिधानेन ख्यातमासीज्जगद्गुरो ॥ सिन्धुं प्रविश्य रक्षेन्द्रो स्वां पुरीं प्रययौ क्षणात् ॥३१॥

मृगशृङ्गसमीपे तु विष्ण्वाद्या देवताः स्थिताः ॥ ततो विष्णुः प्रसन्नात्मा मामाहूय तवान्तिकम् ॥
३२॥
प्रेषयामास संहृष्टश्चागतोऽहं तवान्तिकम् ॥ कथितः सर्ववृत्तान्तो यास्येऽनुज्ञां प्रदेहि मे ॥३३॥

सूत उवाच ॥

इति वायूदितं श्रुत्वा दत्वाऽनुज्ञां च वायवे ॥ देवीं दृष्ट्वा स्ववामस्थां पार्वतीमिदमब्रवीत् ॥३४॥
मत्कराद्गलितं लिङ्गं पुनः करगतं मम ॥ गोकर्णे तु मम क्षेत्रे प्रतिष्ठितमभूद्भुवि ॥३५॥
तस्माद्यास्यामि गोकर्णं अद्यैव वरवर्णिनि ॥ इत्युदीर्य महादेवः कुन्देन्दुधवलं शुभम् ॥३६॥
आरुह्य वृषभं शीघ्रं पार्वत्या प्रियया सह ॥ षण्मुखेन समं राजन् वीरभद्रादिभिः सह ॥३७॥
कैलासात् स ययौ वेगाद्गोकर्णं प्रति शङ्करः ॥

---

## शालूकिनीप्रशंसा

शालूकिनीं समासाद्य पार्वतीमिदमब्रवीत् ॥३८॥
इयं शालूकिनी देवी सर्वपापहरा शुभा ॥ आद्यगङ्गा पुण्यनदी स्नातानां भुक्तिमुक्तिदा ॥३९॥
नदानां सरिताञ्चैव आद्या सेयं प्रकीर्तिता ॥ सीम्न्यसौ वर्तते यस्मात् प्रथमां सरितं विदुः ॥४०॥
अश्वयुज्यसिते पक्षे अष्टम्यामरुणोदये ॥ आविर्भवति शाल्मल्यां गङ्गा पूर्णकलान्विता ॥४१॥
अस्मिन् कालेऽत्र यः स्नाति तस्य पुण्यफलं प्रिये ॥ अशक्यं हि मया वक्तुं ब्रह्मणापि न शक्यते ॥
४२॥
गोकर्णक्षेत्रसीमेयं कौबेर्यां दिशि पार्वति ॥ {

---

इत्युक्त्वा गिरिजां देवो तीर्त्वा शालूकिनीं तदा ॥४३॥
लिङ्गस्य सन्निधिं गत्वा दृष्ट्वा तत्र सुरान् विभुः ॥ वृषभादवरुह्याशु तदा गिरिजया समम् ॥४४॥
प्रमथैः सह राजेन्द्र लिङ्गरत्नं ददर्श ह ॥ भूम्यां प्रतिष्ठितं तत्र रुद्रयोन्यविदूरतः ॥४५॥
ननाम दण्डवद्भूमौ पार्वत्या सह पार्षदैः ॥ स्तुवन् लिङ्गं महासत्वं शङ्करो भरतर्षभ ॥४६॥
नमस्ते राजलिङ्गाय लिङ्गरत्नाय ते नमः ॥ नमस्ते रावणभुजगर्वसर्वस्वहारिणे ॥४७॥
नमोऽस्मद्भागधेयाय नमस्ते त्रिगुणात्मने ॥ दन्तावलाननकृतप्रतिष्ठाय महात्मने ॥४८॥
नमो वेदशिरोवेद्यज्योतिरानन्दमूर्तये ॥ नमस्त्रिशिरसे तुभ्यं भवरोगभयच्छिदे ॥४९॥
गोकर्णक्षेत्रनाथाय महबल नमो नमः ॥ इति नत्वा मुदा शंभुर्लिङ्गस्यान्तिकमाययौ ॥५०॥

रावणस्याङ्गुलिहतिं दृष्ट्वा शम्भुः शुशोच ह ॥ लिङ्गरत्न महेशान क्षमस्व करुणानिधे ॥५१॥
मयापराधो हि कृतो रावणस्य करेऽर्पणात् ॥ इत्युक्त्वा भगवानीशः स्तोतुं समुपचक्रमे ॥५२॥

ईश्वर उवाच ॥

ध्यायामि मङ्गलमनन्तसुखं निरीहं विश्वातिगं परमतत्वमनादिभूतम् ॥
सारातिसारममलं परमात्मतत्वं श्रीमन्महाबलमहं करुणावतंसम् ॥५३॥
ध्यायामि चिद्घनमनन्तमुदारभासं ब्रह्मादिभिश्च मुनिभिर्मुदितं वरेण्यम् ॥
विश्वैकवन्द्यमजरं निजबोधरूपं श्रीमन्महाबलमहं करुणावतंसम् ॥५४॥
ध्यायामि वेदगदितं निगमैः सुपूज्यं वेदान्तवासिनमजं सुकृतैकसारम् ॥
भक्तानुकम्पिनमजस्रमनन्तकीर्तिं श्रीमन्महाबलमहं कुरुणावतंसम् ॥५५॥
ध्यायामि कल्मषहरं कृतकालरूपं मायात्मकं सकललोकहृदेकवासम् ॥
लङ्केशचण्डभुजदण्डमदापहारं श्रीमन्महाबलमहं करुणावतंसम् ॥५६॥
ध्यायामि पश्चिममहार्णवतीरवासं भक्तैकपालनपरं सुकृतावतारम् ॥
श्रद्धावतां सुमहतां हृदये वसन्तं श्रीमन्महाबलमहं करुणावतंसम् ॥ ५७॥

इति स्तुत्वा स भगवान् लिङ्गरत्नं कुरूद्वह ॥ दृष्ट्वा विष्णुमुखान् देवान् जगाद वचनं तदा ॥५८॥
दिष्ट्या विष्णुमुखा देवा गजास्येन प्रतिष्ठितम् ॥ लिङ्गरत्नं मम भुवि गोकर्णे विष्णुयुक्तिभिः ॥५९॥
विष्णोऽद्य मत्करगतं लिङ्गरत्नं न संशयः ॥ गोकर्णं जन्मभूमिर्हि चात्रस्थं मत्करे स्थितम् ॥६०॥
तस्मात् प्रीतिरभून्मेद्य त्वत्तः कमललोचन ॥ इत्युदीर्य स लिङ्गस्य अभिधानमथाकरोत् ॥६१॥
त्रिदशा रावणो नाम राक्षसो बलवत्तरः ॥ सर्वलोकं स्वयं जिग्ये स्वबलेन पराक्रमी ॥६२॥
तं जित्वा स्वबलेनाद्य लिङ्गरत्न मतिष्ठत ॥ तस्मान्‍ महाबल इति त्रैलोक्ये विश्रुतं भवेत् ॥६३॥
इत्युक्त्वा शङ्करः प्रीत्या गणनाथान्तिकं ययौ ॥ मूर्धानं तस्य चाघ्राय दृष्ट्वा तन्मस्तके व्रणं ॥६४॥
उवाच वचन पुत्रं गजास्यं वटुरूपिणम् ॥ रावणस्य कराघातात् पुत्र खिन्नोसि साम्प्रतम् ॥६५॥
मा कुरुष्व पुनः खेदं शृणु मे परमं वचः ॥ लिङ्गरत्नं प्रतिष्ठाप्य महत्पुण्यं त्वया कृतम् ॥६६॥
नवरत्नैः कृतं लिङ्गं स्वर्णरौप्यविनिर्मितम् ॥ अथवा दारुपाषाणमृण्मयेन च निर्मितम् ॥६७॥
बाणलिङ्गं विशेषेण रसलिङ्गमथापि वा ॥ स्वस्य वित्तानुसारेण यः करोति नरो भुवि ॥६८॥
क्षेत्रे मम स्थापनञ्च दुर्गास्थापनमेव च ॥ आदित्यञ्च तथा विष्णुं तव मूर्तिं गजानन ॥६९॥
गोकर्णे रामसेतौ च पम्पायां श्रीगुरौ तथा ॥ केदारे च तथा काश्यां तथा पुष्पगिरौ तथा ॥७०॥

स्थापनं लिङ्गदानञ्च रुद्राक्षञ्च यथाविधि ॥ तस्य पुण्यफलं वक्तुं नालं वर्षशतैरपि ॥७१॥

विष्णुना ब्रह्मणा चैव किमन्यैर्बहुभाषणैः ॥ पूजां कृत्वा प्रथमतः तव पुत्र गजानन ॥७२॥

ततो महाबलस्यैव पूजनं यः समाचरेत् ॥ वाञ्छितार्थं स लभते मत्प्रसादान्न संशयः ॥७३॥

यः पूजयति मल्लिङ्गमकृत्वा तव पूजनम् ॥ वाञ्छितार्थफलं तस्य न कदाचिद्भविष्यति ॥७४॥

इत्युक्त्वा स्वात्मजं शम्भुः सर्वदेवगणैः सह ॥ पूजयित्वा स्वतनयं विघ्नेशं विधिपूर्वकम् ॥७५॥

ततो महाबलं राजन् पूजयामास शङ्करः ॥ पुनर्देवानुवाचेदं शङ्करो भक्तवत्सलः ॥७६॥

रुद्र उवाच ॥

कार्तिके पुण्यमासे तु लिङ्गरत्नं प्रतिष्ठितम् ॥ तस्मादहं कार्तिके तु प्रार्वत्या सह पार्षदैः ॥७७॥

चराचरेण जगता विशेषेण वसामि वै ॥ भवन्तोऽत्रैव तिष्ठन्तु आज्ञया मम वै सुराः ॥७८॥

अस्मिन् काले नरो यस्तु अत्रागत्य समाहितः ॥ प्रातः स्नात्वा कोटितीर्थे लिङ्गरत्नमिहार्चति ॥७९॥

ददाति किञ्चित् स नरः कर्मबन्धाद्विमुच्यते ॥ यद्दत्तं यद्धुतं जप्तं कृतं कर्म सुरोत्तमाः ॥८०॥

तदनन्तफलं चास्ते नराणां मत्प्रसादतः ॥ तस्माद्गोकर्णयात्रायां विष्णुयुक्कार्तिको वरः ॥८१॥

माघे मास्यसिते पक्षे या भवेच्च चतुर्दशी ॥ तस्यां निशीथसमये लिङ्गरत्नं महाबलम् ॥८२॥

एकेन बिल्वपत्रेण अणुमात्रजलेन वा ॥ द्रोणपुष्पेण गन्धेन यः पूजति नरोत्तमः ॥८३॥

तस्य पुण्यफलं वक्तुं ब्रह्मणापि न शक्यते ॥ गोकर्णं बिल्वपत्रञ्च लिङ्गरत्नं महाबलः ॥८४॥

शिवरात्रिस्तथा देवा दुर्लभं हि चतुष्टयम् ॥ तस्मिन् काले च यद्दत्तं एकं कोटिर्भविष्यति ॥८५॥

इदं मम प्रियं क्षेत्रं सर्वेषां हृद्यमेव हि ॥ अत्रागत्य नरो यस्तु लिङ्गस्थापनमाचरेत् ॥८६॥

वापीकूपतटाकान् वा प्रपां वा भक्तिभावतः ॥ तेषां मय्येव वासः स्यान्नात्र कार्या विचारणा ॥
८७॥

ततो देवा ऋषिगणा गन्धर्वाः सिद्धचारणाः ॥ महाबलमिति प्राहुर्देवं त्रिभुवनेश्वरम् ॥८८॥

देवाश्च ऋषिभिः सार्धं पूजयन्ति महाबलम् ॥ यथा कैलासशिखरे यथा मन्दरमूर्धनि ॥८९॥

तथात्र नियतं वासं करोम्येव न संशयः ॥

सूत उवाच ॥

इत्युक्त्वा भगवानीशः ऋषिदेवगणैः सह ॥९०॥

पार्वत्या सह पुत्राभ्यां पार्षदैश्च तथा नृप ॥ गोकर्णान्निर्गतो राजन् कौबेरीं ककुभं प्रति ॥९१॥

सार्धद्वियोजने देशे सम्पुटेशं महाद्भुतम् ॥ लिङ्गं दृष्ट्वा स्तुवन् भूम्यां नमस्कृत्य कृताञ्जलिः ॥९२॥

स्तुतिं चकार सहसा सम्पुटेशस्य सन्निधौ ॥ नमस्ते सम्पुटोत्थाय सद्योजातात्मकाय च ९३॥
नमस्ते ज्ञानगम्याय परमात्मस्वरूपिणे ॥ एवं स्तुत्वा पुनर्नत्वा ततः सम्पूज्य भक्तितः ॥९४॥
स्वांशं तत्र निधायाथ सम्पुटेशे कुरूद्वह ॥ ततस्तस्मान्महादेवो दक्षिणाशां ययौ तदा ॥९५॥
तत्र गत्वा महालिङ्गमपिधानगुणोद्भवम् ॥ दृष्ट्वा नत्वा मुदा तं वै स्तुतिं चक्रे महेश्वरः ॥९६॥
नमस्ते वामदेवाय गुणोत्थाय नमो नमः ॥ नमस्ते शान्तरूपाय रक्षोदर्पापहारिणे ॥९७॥
इति स्तुत्वा गुणेशं तु पूजयित्वा महेश्वरः ॥ ततस्तस्माद्ययौ शम्भुर्मृडेशं द्रष्टुमादरात् ॥९८॥
तत्र दृष्ट्वा महल्लिङ्गं वस्त्रपिण्डसमुद्भवम् ॥ नत्वा देवगणैः सार्धं स्तुतिं चक्रे समाहितः ॥९९॥
अघोराय नमस्तेस्तु नमस्ते वसनोद्भव ॥ नमो वेदान्तवेद्याय मृडेशाय नमो नमः ॥१००॥
इति स्तुत्वा समभ्यर्च्य मृडेशं परमेश्वरः ॥ ततो दोरेशमासाद्य दृष्ट्वा लिङ्गं महाद्भुतम् ॥१०१॥
नत्वा तं पूजयित्वा तु स्तुत्वा देवर्षिभिः सह ॥ पुरुषाय नमस्तेस्तु नमस्ते तत्वरूपिणे ॥१०२॥
नमो निगमवेद्याय दोरेशाय नमो नमः ॥ प्रणम्य भूयो देवेशं देवैः सार्धं महेश्वरः ॥१०३॥
पुनर्गोकर्णमासाद्य शङ्करो भरतर्षभ ॥ ततः सम्पूज्य विधिवल्लिङ्गरत्नं महाबलम् ॥१०४॥
ततो देवानुवाचेदं शङ्करो भक्तवत्सलः ॥ एकस्मिन्नेव दिवसे पञ्चलिङ्गार्चनं कृतम् ॥१०५॥
एवं यः कुरुते भूम्यामद्य प्रभृति यो नरः ॥ ब्रह्महत्यादिपापेभ्यो मत्प्रसादाद्विमुच्यते ॥१०६॥

सूत उवाच ॥

इत्युक्त्वा भगवान् देवो प्रमथैः सह दैवतैः ॥ ययौ कैलासशिखरं पार्वत्या प्रियया समम् ॥१०७॥
ततो देवाः सुरगणा गन्धर्वाः सिद्धचारणाः ॥ महाबलमिति प्राह लिंङ्गं त्रिभुवनेश्वरम् ॥१०८॥
तदा प्रभृति गोकर्णे वासं चक्रुर्दिवौकसः ॥ रुद्रेण मनसा ध्यातः शतशृङ्गगमो द्विज ॥१०९॥
स्वक्षेत्रं तदृढीकर्तुं लोककान्तेन शम्भुना ॥ तथैवाभून्नृपवर नान्यथा भवति प्रभो ॥११०॥

इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे वायुकैलासगमन ईश्वरगोकर्णागमन पुनःकैलासप्रवेशोनाम अष्टपञ्चाशोऽध्यायः ॥५८॥

सूत उवाच ॥

विष्णुना स्वस्य शृङ्गन्तु शालिग्रामे प्रतिष्ठितम् ॥ ब्रह्मणा स्वस्य लिङ्गन्तु पुष्करे स्थापितं ह्यभूत् ॥१॥

स्वे स्वे स्थाने स्वमात्मानं दृढीकृत्य महेश्वराः ॥ विज्वरा वीतरागाश्च सुखेनासन्नृपोत्तम ॥२॥

क्षिप्रं सिद्धिकरं नृणां गोकर्णं नात्र संशयः ॥ शालग्रामे पुष्करे च चिरात् सिद्धिर्भविष्यति ॥३॥

तस्मात् तेषु प्रधानोऽभूद्गोकर्णं कुरुपुङ्गव ॥ देवं महाबलं राजन् पूजयन्ति सुरासुराः ॥४॥

धर्मार्थकाममोक्षार्थं भक्त्या पूतेन चेतसा ॥ पञ्चामृतेन गव्येन शुद्धतोयेन चैव हि ॥५॥

श्रीगन्धैश्चन्दनैर्दिव्यैस्तथा वस्त्रैर्मनोहरैः ॥ रत्नैर्माणिक्यमुख्यैश्च सुवर्णाभरणैरपि ॥६॥

गुग्गुलादिमहाधूपैर्माल्यैर्दिव्यैर्मनोहरैः ॥ प्रशस्तैरपि नैवेद्यैर्ब्राह्मणानां च तर्पणैः ॥७॥

पुराणादिभिरप्यन्यैर्गाथाभिश्च महाबलम् ॥ सम्पूज्य वाञ्छितार्थांस्ते लभन्तेऽनिशमप्युत ॥८॥

तस्मात् पूज्यतमं लिङ्गमन्यन्नास्ति जगत्रये ॥ अवापुः पूजनात् सिद्धिं देवासुरमहोरगाः ॥९॥

मनुष्याश्च महाभाग नात्र कार्या विचारणा ॥ गोकर्णसदृशं क्षेत्रं नास्ति नास्ति जगत्रये ॥१०॥

महाबलसमं लिङ्गं न भूतं न भविष्यति ॥ यथा कैलासशिखरे यथा मन्दरमूर्धनि ॥११॥

निवासो निश्चितः शम्भोस्तथा गोकर्णमण्डले ॥ कृते महाबलः श्वेतस्त्रेतायामतिलोहितः ॥१२॥

द्वापरे पीतवर्णश्च कलौ श्यामो भविष्यति ॥ आक्रान्तसप्तपातालकुहरोऽयं महाबलः ॥१३॥

घोरे कलियुगे प्राप्ते मृदुतामुपयास्यति ॥ दृष्ट्वा वा दिव्यलिङ्गं च श्रुत्वा वा सागरध्वनिम् ॥१४॥

कोटितीर्थे नरः स्नात्वा पुनर्जन्म न विन्दति ॥ पञ्चक्रोशपरीमाणं गोकर्णक्षेत्रमण्डलम् ॥१५॥

सर्वाण्यश्मानि लिङ्गानि तीर्थाण्यम्भांसि सर्वशः ॥ सार्धयोजनविस्तीर्णमर्धयोजनमायतम् ॥१६॥

क्षेत्ररूपेण तिष्ठन्तं शिवं पश्यन्ति सूरयः ॥ नाग्निना न शशाङ्केन न ताराग्रहनायकैः ॥१७॥

तमो विशीर्यते सम्यग् यथा सवितृदर्शनात् ॥ तथा च नेतरैस्तीर्थैर्नानाक्षेत्रैर्मनोरमैः ॥१८॥

सद्यः पापविशुद्धिः स्याद्यथा गोकर्णदर्शनात् ॥ अपि पापशतं कृत्वा ब्रह्महत्यादिमानवः ॥१९॥

सकृत्प्रविश्य गोकर्णं नरो मुच्येत पातकैः ॥ अत्रैकेन दिनेनापि यत्कृतं कर्म चोत्तमम् ॥२०॥

तदन्यत्राब्दलक्षेण तपो भवति सम्भृतम् ॥ अत्रेन्द्रब्रह्मविष्ण्वादिदेवानां प्रीतिकाम्यया ॥२१॥

महाबलाभिधानेन शिवः सन्निहितः स्वयम् ॥ इन्द्रो ब्रह्मा मुकुन्दश्च विश्वेदेवा मरुद्गणाः ॥२२॥

आदित्या वसवो रुद्राः शशाङ्कश्च सतारकः ॥ एते विमानगतयः सहिताः पार्षदैः स्वकैः ॥२३॥

पूर्वद्वारि निषेवन्ते देवदेवं महाबलम् ॥ कालो मृत्युर्यमः साक्षाच्चित्रगुप्तश्च पालकः ॥२४॥

पितृभिः सह रुद्रैश्च दक्षिणद्वारमाश्रिताः ॥ सेवन्ते नृपशार्दूल नित्यं देवं महाबलम् ॥२५॥
विभावसुश्चित्ररथश्चित्रसेनो महाबलः ॥ सह गन्धर्ववर्गेण गायन्ति परमेश्वरम् ॥२६॥
रम्भा कृतस्थला मेना पूर्वचित्तिस्तिलोत्तमा ॥ नृत्यन्ति पुरतः शम्भोरुर्वश्याद्याः सुरस्त्रियः ॥२७॥
वसिष्ठः काश्यपः कण्वो विश्वामित्रो महातपाः ॥ जैमिनिश्च भरद्वाजो बलिश्च क्रतुरङ्गिराः ॥२८॥
गौतमो जमदग्निश्च भार्गवोऽत्रिः पराशरः ॥ व्यासः सत्यवतीपुत्रः शुकेन सह कौरव ॥२९॥
एते चान्ये च राजेन्द्र सर्वे ब्रह्मर्षयोऽमलाः ॥ देवं महाबलं भक्त्या उत्तरद्वारमाश्रिताः ॥३०॥
सेवन्ते ह्यनिशं राजन्नात्र कार्या विचारणा ॥ नारदो वालखिल्याश्च मरीच्याद्याः प्रजेश्वराः ॥३१॥
सनकाद्या महात्मान उपरिष्टादुपासते ॥ तथान्ये मुनयोऽसंख्या जटिला वल्कलाम्बराः ॥३२॥
दण्डिनो व्रतिनो मुण्डा स्नातका ब्रह्मचारिणः ॥ सेवन्ते परया भक्त्या देवदेवं महाबलम् ॥३३॥
एवं देवाः सगन्धर्वाः पितरः सिद्धचारणाः ॥ विद्याधराः किम्पुरुषाः किन्नरा गुह्यकाः खगाः ॥३४॥
नागाः पिशाचा वेताला दैतेयाश्च महाबलाः ॥ नानाविभवसम्पन्ना नानावाहनभूषणाः ॥३५॥
विमानैः सूर्यसङ्काशैरग्निवर्णैः शशिप्रभैः ॥ आगत्य मृगशृङ्गस्य निकटं भरतर्षभ ॥३६॥
प्रस्तुवन्ति प्रगायन्ति पठन्ति प्रणमन्ति च ॥ प्रनृत्यन्ति प्रहृष्यन्ति गोकर्णे पृथिवीपते ॥३७॥
लभन्तेऽभीप्सितान् कामान्रमन्ते च यथासुखम् ॥ तत्र स्थानानि देवानां सर्वेषां सन्ति पार्थिव ॥३८॥
विष्णोश्च देवदेवस्य ब्रह्मणः परमेष्ठिनः ॥ कार्तिकेयस्य दुर्गाया गजवक्त्रस्य चानघ ॥३९॥
धर्मस्य क्षेत्रपालस्य ऋषीणां च महामते ॥ अन्यानि शिवलिङ्गानि विद्यन्ते कोटिशः प्रभो ॥४०॥
असंख्येयानि तीर्थानि विद्यन्ते तत्र भारत ॥ गोकर्णं कोटितीर्थं च तीर्थानां मुख्यतां गतौ ॥४१॥
सर्वेषां शिवलिङ्गानां सार्वभौमो महाबलः ॥ पश्चिमाम्बुधितीरस्थं गोकर्णं क्षेत्रमुत्तमम् ॥४२॥
ब्रह्महत्यादिपापानि दहन्तीति किमद्भुतम् ॥ ये मातृपितृहन्तारो ये वा भूतद्रुहः शठाः ॥४३॥
गोघ्नाश्चैव कृतघ्नाश्च परदाररताश्च ये ॥ ये दुर्वृत्ता दुराचारा दुःशीलाः स्तेयिनश्च ये ॥४४॥
ते सर्वे प्राप्य गोकर्णं स्नात्वा तीर्थजलेषु वै ॥ सम्पूज्य च महादेवं प्रयान्ति शिवमन्दिरम् ॥४५॥
तत्र पुण्यासु तिथिषु पुण्यर्क्षे पुण्यवासरे ॥ येऽर्चयन्ति महालिङ्गं ते रुद्राः स्युर्न संशयः ॥४६॥
यदा कदाचिद्गोकर्णं यो वा को वापि मानवः ॥ प्रविश्य पूजयेदीशं स गच्छेत् परमं पदम् ॥४७॥
रवीन्दुसौम्यवारेषु यदा दर्शो भविष्यति ॥ तदा जलनिधौ स्नानं दानं च पितृतर्पणम् ॥४८॥
शिवपूजा जपो होमो व्रतचर्या द्विजार्चनम् ॥ यत्किञ्चिद्वा कृतं कर्म तदनन्तफलप्रदम् ॥४९॥

व्यतीपातादियोगेषु रविसङ्क्रमणेषु च ॥ महाप्रदोषवेलासु शिवपूजा विमुक्तिदा ॥५०॥

## गोकर्णे बाणलिङ्गादि स्थापनवर्णनम्

शौनक उवाच ॥

सूत सूत महाप्राज्ञ पुराणार्थविशारद ॥ लिङ्गस्थापनजं पुण्यं लिङ्गदानस्य चैव हि ॥५१॥
तथा रुद्राक्षदानस्य माहात्म्यं वक्तुमर्हसि ॥

सूत उवाच ॥

श्रूयतामभिधास्यामि सहैभिर्मुनिपुङ्गवैः ॥५२॥
शिवस्थापनजं पुण्यं विष्णुस्थापनजं तथा ॥५३॥
दुर्गास्थापनजं पुण्यं तथा गणपतेरपि ॥ आदित्यस्थापने चैव स्कन्दस्य स्थापने तथा ॥५४॥
यत्पुण्यं समवख्यातं तत्सर्वं कथयामि च ॥ गोकर्णे तु शिवक्षेत्रे लिङ्गस्थापनमाचरेत् ॥५५॥
तस्य वै पुनरावृत्तिर्न कदाचिद्भवेद् ध्रुवम् ॥ क्षेत्राणामुत्तमं राजन् गोकर्णं नात्र संशयः ॥५६॥
तस्माद्राजन् शिवक्षेत्रे गोकर्णे यो नरोत्तमः ॥ यथाविधि कुरुश्रेष्ठ शिवविष्णुगणेश्वरान् ॥५७॥
आदित्यस्कन्ददुर्गाणां स्थापयेद्विग्रहं पुमान् ॥ त्रैलोक्यं स्थापितं तेन कुलकोटिं समुद्धरेत् ॥५८॥
सपुत्रपौत्रः सगणः सर्वसम्पत्समन्वितः ॥ भुक्त्वा भोगानशेषांस्तु ऐहिकामुष्मिकान् तथा ॥५९॥
तदन्ते ब्रह्मनिर्वाणं व्रजत्येव न संशयः ॥ इन्द्रनीलमयं लिङ्गं तथा वज्रेण निर्मितम् ॥६०॥
प्रवालेन कृतं लिङ्गं वैडूर्यरचितं तथा ॥ माणिक्येन कृतं लिङ्गं पुष्यरागमयं तथा ॥६१॥
गोमेदेन कृतं लिङ्गं तथा मरकतेन च ॥ मौक्तिकेन कृतं लिङ्गं चन्द्रकान्तमयं तथा ॥६२॥
स्फटिकेन कृतं लिङ्गं सुवर्णेनैव वेष्टितम् ॥ गोकर्णे यः शिवक्षेत्रे स्थापयेद्वै समाहितः ॥६३॥
दानं वा पूजनं वापि तथा लिङ्गस्य दर्शनम् ॥ तदनन्तफलं प्रोक्तं नात्र कार्या विचारणा ॥६४॥
कोटिब्रह्माण्डदानेन यत्पुण्यं लभते नरः ॥ तत्पुण्यं समवाप्नोति लिङ्गस्थापनतो नृप ॥६५॥
निर्धनो रजतं लिङ्गं ताम्रं कांस्यमयं तथा ॥ शिलालिङ्गं बाणलिङ्गं नर्मदालिङ्गमेव च ॥६६॥
रसलिङ्गं पिष्टलिङ्गं तादृशेनैव वेष्टितम् ॥ कृत्वा स्थापनमात्रेण निःस्वोपि सुगतिं व्रजेत् ॥६७॥
ऐहिकामुष्मिकान् भोगाननुभूय क्रमात्ततः ॥ एषु लिङ्गेषु सर्वेषु बाणलिङ्गं विशिष्यते ॥६८॥
सर्वदेवमयं लिङ्गं बाणलिङ्गं कुरूद्वह ॥ रक्तं श्वेतं तथा पीतं कृष्णं वा स्थापयेन्नरः ॥६९॥
गोकर्णे नृपशार्दूल तस्य पुण्यफलं शृणु ॥ अश्वमेधादिकान् यज्ञानिष्ट्वा विपुलदक्षिणान् ॥७०॥
तत्फलं लभते मर्त्यः कुलकोटिं समुद्धरेत् ॥ त्रैलोक्यस्थापनं तेन कृतमेव न संशयः ॥७१॥

गङ्गादिसर्वतीर्थेषु स्नानदानफलं लभेत् ॥ चतुःसागरपर्यन्तामिमां भूमिं सदक्षिणाम् ॥७२॥
दत्वा राजन् ब्राह्मणाय यत् फलं लभते नरः ॥ तत् फलं समवाप्नोति ब्रह्मज्ञानं स विन्दति ॥७३॥
सपुत्रपौत्रः सगणो भुक्त्वा भोगानशेषतः ॥ देहान्ते शिवसायुज्यं लभते मनुजोत्तमः ॥७४॥
रुद्राक्षं शिवलिङ्गं च पूजयित्वा विधानतः ॥ सर्वोपस्करसंयुक्तं दिव्यवस्त्रेण वेष्टितम् ॥७५॥
आहूय विप्रं सर्वज्ञं वस्त्रालङ्कारभूषणैः ॥ समभ्यर्च्य तु यो मर्त्यो भक्त्या तस्मै ददाति च ॥७६॥
स सर्वभोगान् सम्प्राप्य वैराग्येन च संयुतः ॥ देहान्ते शिवसायुज्यं लभते नात्र संशयः ॥७७॥
वापीकूपतटाकान् वा यः करोति शिवालयम् ॥ शिवक्षेत्रे कुरुश्रेष्ठ गोकर्णे स नरोत्तमः ॥७८॥
सर्वान् पितॄन् समुद्धृत्य भुक्त्वा भोगाननेकशः ॥ अन्ते शैवं पदं राजन् लभते नात्र संशयः ॥७९॥

---

## हर्यश्वकथोपक्रमः

सूत उवाच ॥

वैवस्वतेऽन्तरे राजन् हर्यश्वो नाम भूपतिः ॥ ब्रह्महत्यापीडितः सन् बभ्राम जगतीतले ॥८०॥
ततो गोकर्णमासाद्य तत्र तेपे महत्तपः ॥ महाबलादिलिङ्गानां पञ्चानां पूजनान्नृप ॥८१॥
ब्रह्महत्याविनिर्मुक्तो निर्वाणमगमद्वशी ॥ यत्पृष्टं कथितुं राजन् तत्सर्वं कथितं मया ॥८२॥
इतः परं महाभाग किमन्यच्छ्रोतुमिच्छसि ॥ य इदं पुण्यमाख्यानं लिङ्गस्थापनसंज्ञितम् ॥८३॥
शृणोति सततं राजन् स नरो मुक्तिभाग्भवेत् ॥

इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे बाणलिङ्गादिस्थापनवर्णनं नाम एकोनषष्टितमोऽध्यायः ॥५९॥

अध्यायाः अकारादि <<BACK ॥ अध्यायः ६० ॥ NEXT>> श्लोक संख्या–८८

॥ पञ्चलिङ्गमाहात्म्ये हर्यश्व कथा–पर्णादाश्रमं–हर्यश्वाश्रमम् ॥

<– हर्यश्वकथा

शतानीक उवाच ॥

सूत सर्वार्थतत्वज्ञ कथं मुक्तिमुपागतः ॥ ब्रह्महत्यादिपापेभ्यो पञ्चलिङ्गप्रपूजनात् ॥१॥

हर्यश्वो भरतश्रेष्ठः कथं पातकवानभूत् ॥ कस्य पुत्रो महाराजो हर्यश्वो राजसत्तमः ॥२॥
एतत् सर्वमशेषेण ब्रूहि मे सूतनन्दन ॥

सूत उवाच ॥

श्रूयतामभिधास्यामि यत् पृष्टं भवताऽधुना ॥३॥
वैवस्वतेन्तरे राजन् राजा सूर्यकुलोद्भवः ॥ पिङ्गाश्वस्य सुतो धीमान् हर्यश्व इति विश्रुतः ॥४॥
धर्मेण पालयन्नास्ते प्रजाः पुत्रानिवौरसान् ॥ अयोध्यायां नृपश्रेष्ठो मन्त्रिभिः सह पार्षदैः ॥५॥
ततः कालेन महता मृगयामगमद्वशी ॥ चतुरङ्गबलैः सार्धं हयमारुह्य देशतः ॥६॥
गत्वाऽरण्यं महाघोरं चचार नृपपुङ्गवः ॥ तत्र विध्यन् कुरुश्रेष्ठ सिंहव्याघ्रवराहकान् ॥७॥
शशान् बहुमृगान् हत्वा हर्यश्वः पार्थिवस्तदा ॥ श्रान्तोऽभून्नितरां तत्र मध्याह्ने क्षुत्पिपासितः ॥८॥
चतुरङ्गबलं क्वापि न दृष्ट्वा पार्थिवर्षभः ॥ तुरगादवरुह्याशु वृक्षच्छायामुपाविशत् ॥९॥
मुहूर्तं तत्र विश्रान्तस्ततस्तत्र समागतः ॥ द्विजः कश्चिन्महाभागः पिङ्गलो नाम भारत ॥१०॥
दूरादायान्तमालोक्य हर्यश्वो द्विजपुङ्गवम् ॥ अभ्युत्थायाभिवन्द्याथ पप्रच्छ कुशलं तदा ॥११॥

हर्यश्व उवाच ॥

कुत आगम्यते विप्र भवता तद्वदस्व मे ॥ एवमुक्तो नृपतिना तं प्रत्याह द्विजोत्तमः ॥१२॥

पिङ्गलउवाच ॥

अहं कण्वस्य तनयः पिङ्गलो नाम विश्रुतः ॥ समित्पुष्पार्थमायातो निर्जने गहने वने ॥१३॥
कस्त्वं महान् महाभाग दुर्मना इव लक्ष्यसे ॥ इति विप्रवचः श्रुत्वा तमुवाच नृपोत्तमः ॥१४॥

हर्यश्व उवाच ॥

अयोध्याधिपतिः श्रीमान् सूर्यवंशसमुद्भवः ॥ पिङ्गाश्व इति राजाभूत्तस्य पुत्रोस्म्यहं द्विज ॥१५॥
हर्यश्व इति विख्यातो हयमारुह्य कामगम् ॥ चतुरङ्गबलैः सार्धं मृगयार्थमिदं वनम् ॥१६॥
आगतोऽस्मि महाभाग हत्वा घोरमृगानहम् ॥ मध्याह्नसमये प्राप्ते श्रान्तोऽहं नितरां मुने ॥१७॥
क्षुत्तृड्भ्यां पीडितश्चाहं क्वापि यातं बलं मम ॥ तद्वृत्तान्तं न जानेऽहं जलं चापि न दृश्यते ॥१८॥
तस्माद्वृक्षमुपाश्रित्य अर्दितो निर्जने वने ॥ इति राज्ञो वचः श्रुत्वा पिङ्गलस्तमुवाच ह ॥१९॥
दृष्टं मया तव बलं क्रोशार्धे नृपसत्तम ॥ वर्तते तत्र कासारं निर्मलं तद्द्विजाश्रयम् ॥२०॥
लसत्कुमुदकल्हारकमलैरपि शोभितम् ॥ मृगपक्षिगणाकीर्णं किन्नरोरगसेवितम् ॥२१॥
चतुरङ्गबलं सर्वं तत्रास्ते तव पार्थिव ॥ दर्शयिष्याम्यहं सैन्यं गच्छावस्तत्र वै नृप ॥२२॥

ब्राह्मणेनैवमुक्तस्तु राजातीव प्रहृष्टवान् ॥ ययौ तेन समं राजा कासारे यत्र स्वं बलम् ॥२३॥
गत्वा सरोवरं राजा स्नात्वा तत्र पपौ जलम् ॥ ददर्श तत्सरस्तीरे सैन्यं चातीव हर्षितः ॥२४॥
मृगयित्वा नृपं सर्वे सैनिकाः सर्वतो दिशम् ॥ न दृष्ट्वा क्वापि राजानं स्थितास्तत्रातिदुःखिताः ॥२५॥
तदा तेऽपि नृपं दृष्ट्वा सैनिकाः सहसोत्थिताः ॥ प्रणिपत्य नृपं सर्वे हृष्टास्तत्रैव तस्थिरे ॥२६॥
एतस्मिन्नन्तरे राजन् कुरङ्गमिथुनं तदा ॥ जलपानार्थमायातं तृषया परिपीडितम् ॥२७॥
आस्थितः सरसस्तीरे दृष्ट्वा तद्राजसत्तमः ॥ जघानैकेन बाणेन कुरङ्गमिथुनं तदा ॥२८॥
ताडिते मृगयुग्मे तु हर्यश्वेन कुरूद्वह ॥ त्यक्त्वा तन्मृगरूपं तु तृणको मुनिपुङ्गवः ॥२९॥
स्वकं वपुः समास्थाय भार्यया चाह तं नृपम् ॥

तृणक उवाच ॥

कृतापराधिनं लोके शिक्षां कुर्वन्ति भूमिपाः ॥३०॥
अपराधं विना राजन् मां वृथा हतवानसि ॥ स्त्रीरतिं च प्रकुर्वाणं जलपानसमुद्यतम् ॥३१॥
भुञ्जानं जपपूजादि कुर्वाणं तपसि स्थितम् ॥ न कुर्वन्ति वधं सन्तः वधार्हं चापि पार्थिव ॥३२॥
यस्मात्वमीदृशं कर्म कृतवानसि गर्हितम् ॥ तस्माद्गृहाण मच्छापं दारुणं पार्थिवाधम ॥३३॥
स्त्रीहत्यया तथा ब्रह्महत्यया पीडितो भृशम् ॥ कृत्वा पापानि बहुशो सम्भ्रान्तो भव नित्यशः ॥३४॥
इति तद्वचनं श्रुत्वा हर्यश्वो भयविह्वलः ॥ प्रणम्य शिरसा भूमौ तृणकं प्राह दुःखितः ॥३५॥

राजोवाच ॥

मया मोहादिदं कर्म कृतं ब्रह्मन् विगर्हितम् ॥ अपराधं क्षमस्व त्वं मत्कृतं ब्राह्मणर्षभ ॥३६॥
अपराधिष्वपि ब्रह्मन् दयां कुर्वन्ति साधवः ॥ इति राज्ञो दीनवचस्तच्छ्रुत्वा तृणको मुनिः ॥३७॥
शान्तकोपस्तदा प्राह शापस्यान्तं नृपोत्तम ॥ मम शापोऽन्यथा न स्यात् तथापि शृणु मद्वचः ॥३८॥
गुरुणा तव राजेन्द्र शापस्यान्तो भवेद्ध्रुवम् ॥ इत्युक्त्वा तृणकस्तत्र पञ्चत्वमगमत् तदा ॥३९॥
सपत्नीकं ततो विप्रं चितिमारोप्य सत्वरम् ॥ दग्ध्वा तत्र स्वयं स्नात्वा हर्यश्वो राजसत्तमः ॥४०॥
चतुरङ्गबलैः सार्धं अयोध्यामगमत्तदा ॥ हननान्मृगयुग्मस्य तेन प्राप्ता नृपेण वै ॥४१॥
ब्रह्महत्या च स्त्रीहत्या हर्यश्वेन कुरूद्वह ॥ स तया पीडितो नित्यं दुःखेन स्थितवान् पुरे ॥४२॥
ततः किञ्चिद् गते काले भ्रान्तोऽभूद्राजसत्तमः ॥ रात्रौ निर्गत्य चैकाकी मन्दिरात् स्वपुरे नृप ॥४३।

।

प्रगृह्य निशितं खड्गं सुप्तान् स्वे स्वे गृहे जनान् ॥ दिने दिने जघानासौ खड्गेन निशितेन सः ॥४४॥

ब्रह्मक्षत्रियविट्शूद्रस्त्रीबालादीन् तथाऽहनत् ॥ ततः पापजनैः सार्धं चौर्यवृत्तिरतो भवत् ॥४५॥

पुरे रम्यस्त्रियो नित्यं विप्रादीनां नृपाधमः ॥ बलात्कारेण बुभुजे हर्यश्वः पापबुद्धिमान् ॥४६॥

एतस्मिन्नन्तरे काले पौरा दुःखेन चातुराः ॥ मिलित्वाऽलोच्य ते सर्वे वसिष्ठाय न्यवेदयन् ॥४७॥

राज्ञा कृतं महद्दुःखं तदा सर्वं प्रजा नृप ॥ तेषां वचः समाकर्ण्य वसिष्ठो नृपचेष्टितम् ॥४८॥

मुहूर्तं मनसा ध्यात्वा किं कर्तव्यमिति प्रभो ॥ अहूय तस्य तनयं द्युमत्सेनाभिधं नृप ॥४९॥

मन्त्रिभिः सह पौरैश्च मन्त्रयित्वा नृपासने ॥ निवेश्य विधिवद्राजन्नभिषेकमथाकरोत् ॥५०॥

ततो वसिष्ठो राजानं सान्त्वयित्वा च भारत ॥ हर्यश्वं बहुयत्नेन मन्त्रिभिः सह पार्षदैः ॥५१॥

कान्तिमत्या स्त्रिया साध्व्या सहितं पार्थिवं मुनिः ॥ पुरस्कृत्य पुरादाशु ययौ भरतसत्तम ॥५२॥

राज्ञा कृताघशान्त्यर्थं तीर्थयात्रां गतस्तदा ॥ तत्तत्क्षेत्रस्थतीर्थेषु गङ्गादिषु नदीष्वपि ॥५३॥

स्नापयामास विधिवद्राजानं प्रियया समम् ॥ तथापि ब्रह्महत्यादि पापानि न शमं ययुः ॥५४॥

निःशेषं भूपतेस्तस्य ततश्चिन्तां गतो मुनिः ॥

---

## पर्णादाश्रमम्

एतस्मिन्नन्तरे काले पर्णादो मुनिसत्तमः ॥५५॥

गोकर्णादागतस्तत्र वसिष्ठं ददृशे नृप ॥ उवाच श्लक्ष्णया वाचा नमस्कृत्य मुनिं तदा ॥५६॥

पर्णाद उवाच ॥

कुतश्चिन्तापरो ब्रह्मन् तद्वदस्व मुने मम ॥ पर्णादस्य वचः श्रुत्वा वसिष्ठो वाक्यमब्रवीत् ॥५७॥

राज्ञा कृतानि पापानि अज्ञानाद्भरतर्षभ ॥ ब्रह्महत्यादि चानेन तीर्थयात्रा ततः कृता ॥५८॥

तथापि तस्य पापानि न विनाशं प्रपेदिरे ॥ सैषैव चिन्ता मनसि ततः किञ्चिन्न विद्यते ॥५९॥

वसिष्ठेनीरितं श्रुत्वा पर्णादः पुनरब्रवीत् ॥ अहमेवं पुरा ब्रह्मन् बाल्ये वयसि सुव्रत ॥६०॥

कृत्वा पापानि बहुशो ब्रह्महत्यादिकान्यपि ॥ अज्ञानान्मुनिशार्दूल तस्माद्दुःखमवाप्तवान् ॥६१॥

ततः कतिपयाहेन पूर्वपुण्यवशेन वै ॥ आगतं सङ्गमाश्रित्य मुनिनां कुरुसत्तम ॥६२॥

तस्मात् ज्ञानं मया लब्धं मुनिभिर्बोधिते तदा ॥ गोकर्णक्षेत्रमासाद्य कृत्वाश्रमपदं शुभम् ॥६३॥

वैवाहिकादेः सविधे किञ्चिदुत्तरतो दिशि ॥ शरपातमिते देशे तीर्थं कृत्वा सुनिर्मलम् ॥६४॥
शिवलिङ्गं प्रतिष्ठाप्य तपस्तप्तं मया मुने ॥ द्वादशाब्दं मया ब्रह्मन् ततो नारदवाक्यतः ॥६५॥
प्रत्यहं पञ्चलिङ्गानां पूजनं तु मया कृतम् ॥ महाबलं मृडेशञ्च गुणेशं दोरनामकम् ॥६६॥
सम्पुटेशं मुनिश्रेष्ठ आनर्च प्रतिवासरम् ॥ एवं संवत्सरे पूर्णे दुष्कृतानि ममानघ ॥६७॥
सर्वाणि विलयं प्रापुर्यथा सूर्योदये तमः ॥ त्वमप्येवं मुनिश्रेष्ठ साम्प्रतं राजसत्तमम् ॥६८॥
गोकर्णं प्रापयस्वाशु मयोक्तं कारयस्व च ॥ राज्ञा कृतानि पापानि नाशं यास्यन्ति नान्यथा ॥६९॥
एवमुक्त्वा वसिष्ठं तु पर्णादोऽगाद् यथेच्छया ॥

---

## हर्यश्वाश्रमम्

<– हर्यश्वकथा

शतानीक उवाच ॥

श्रुत्वा पर्णादवचनं वसिष्ठो हृष्टमानसः ॥७०॥
राज्ञा समं कुरुश्रेष्ठ गोकर्णं क्षेत्रमागमत् ॥ ततो राजानमाहेदं सिद्धाश्रममिदं नृप ॥७१॥
गोकर्णं क्षेत्रप्रवरं सर्वपापप्रणाशनम् ॥ अत्र त्वं वस भद्रन्ते भार्यया सह पार्थिव ॥७२॥
क्षेत्रं प्रविश्य च स्नात्वा सर्वतीर्थेष्वहं नृप ॥ त्वामुद्दिश्यार्चयित्वा तु लिङ्गरत्नं महाबलम् ॥७३॥
तीर्थान्यादाय सर्वाणि आगमिष्ये तवान्तिकम् ॥ अहं तीर्थाभिषेकं ते कारयिष्ये विधानतः ॥७४॥
ततः क्षेत्रं प्रवेष्टुं त्वं भविष्यसि शुचिर्नृप ॥ इत्युक्त्वा नृपतिं ब्रह्मन् क्षेत्रस्यान्तरगान्मुनिः ॥७५॥
कोटितीर्थादिषु स्नात्वा तीर्थाण्यादाय सर्वशः ॥ महाबलं पूजयित्वा राजान्तिकमुपागमत् ॥७६॥
ततो निवेश्य राजानमासने भार्यया सह ॥ स्नापयामास विधिवत् वसिष्ठस्तीर्थवारिभिः ॥७७॥
शैवीं पञ्चाक्षरीं तस्मै उपदेशं चकार ह ॥ प्रोवाच नृपशार्दूलं वसिष्ठो मुनिपुङ्गवः ॥७८॥
इमं मन्त्रं जपन् राजन् तपः कुरु महामते ॥ विमुक्तः सर्वपापेभ्यः सर्वाभीष्टमवाप्स्यसि ॥७९॥
एवं प्रबोधयित्वा तं वसिष्ठः स्वाश्रमं ययौ ॥ ततो राजा कुरुश्रेष्ठ हर्यश्वो भार्ययान्वितः ॥८०॥
हर्षेण महता युक्तो कृत्वाश्रमपदं शुभम् ॥ लिङ्गं संस्थाप्य विधिवत् तीर्थं कृत्वा महत्तरम् ॥८१॥

जपन् पञ्चाक्षरीं विद्यां तपस्तेपे सुदुश्चरम् ॥ पञ्चलिङ्गार्चनं कुर्वन् प्रत्यहं वत्सरावधि ॥८२॥
महाबलादि राजेन्द्र ततः पापाद्विमुक्तवान् ॥ ततो हृष्टो महाराजा हर्यश्वो भार्ययान्वितः ॥८३॥

गोकर्णात् प्रययौ राजा स्वां पुरीं समलङ्कृताम् ॥ तत्र स्वपुत्रसहितो यथापूर्वमतिष्ठत ॥८४॥

सूत उवाच ॥

हर्यश्वस्याश्रमं पुण्यं सर्वसिद्धनिषेवितम् ॥ दर्शनात् सर्वपापघ्नं भुक्तिमुक्तिप्रदं नृणाम् ॥८५॥

एतत्ते पञ्चलिङ्गानां माहात्म्यं वर्णितं मया ॥ गुह्यं भरतशार्दूल किमन्यच्छ्रोतुमिच्छसि ॥८६॥

माहात्म्यमेतत् परमं पवित्रं शृण्वन्ति ये भक्तियुताः पठन्ति ॥

ते ब्रह्महत्यादि समस्तपापं निर्धूय मुक्तिं भुवि भारताग्र्याम् ॥८७॥

कलत्रपुत्रैः सहबन्धुवर्गैर् भुक्त्वेहभोगानमरैरलभ्यान् ॥

सुज्ञानमासाद्य भजन्ति चान्ते निर्वाणलक्ष्मीं सुकृतैकलभ्याम् ॥८८॥

इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे पञ्चलिङ्गमाहात्म्यवर्णनं नाम षष्टितमोऽध्यायः ॥६०॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ६१ ॥  NEXT>>  श्लोक संख्या–६६

## ॥ कोटितीर्थ माहात्म्यं –उपक्रमः ॥

### ॥ विष्णुवर्मकथोपक्रमः ॥

शौनक उवाच ॥

सर्वेषामपि तीर्थानां कोटितीर्थं विशिष्यते ॥ ब्रह्महत्यादिपापानि नश्यन्ति स्नानमात्रतः ॥१॥

इति पूर्वं त्वया प्रोक्तं तन्मे विस्तरतो वद ॥

सूत उवाच ॥

शृणु विप्र प्रवक्ष्यामि सम्यक्पृष्टं त्वयाऽनघ ॥२॥

कोटितीर्थस्य माहात्म्यं श्रुतमात्राघनाशनम् ॥ अपि पापशतं कृत्वा ब्रह्महत्यादि मानवः ॥३॥

कोटितीर्थे स्नानमात्रान्नरो मुच्येत पातकैः ॥ कोटितीर्थं नाम मुने कोटिद्रवसमन्वितम् ॥४॥

तस्मिन् स्नातो महापापैर्मुच्यते नात्र संशयः ॥ (कोटितीर्थस्य उत्पत्तिः)

---

विष्णुवर्मकथा

अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।।५।।
यच्छुत्वा सर्वपापानि विलयं यान्ति तत्क्षणात् ।। अवन्तीविषये राजा विष्णुवर्मेति चाभवत् ।।६।।
पुरा कृतयुगे सोपि स्वराज्यं प्रतिपालयन् ।। सदा मद्यपशीलोऽसौ गीतवाद्यानुमोदकः ।।७।।
सुगन्धद्रव्यपुष्पाणि न समर्प्य द्विजातये ।। देवेभ्योपि सुदुर्बुद्धिः सदोन्मत्तो नृपाधमः ।।८।।
स्वयं धारयते नित्यं वेश्याभिश्चैव धार्यते ।। प्रत्यहं सुन्दरीं श्यामां सुकेशीं सुस्तनीं मुदा ।।९।।
रमयेच्च दिवारात्रं परेद्युस्तां त्यजेदसौ ।। सुकेशी सुन्दरी स्निग्धा नारी यत्र वसेत् क्वचित् ।।१०।।
तामानयित्वा मौल्येन बलात्कारेण वा द्विज ।। रमयेच्च यथासौख्यं प्रातस्तां प्रत्यहं त्यजेत् ।।११।।
गुरुपत्नीं भ्रातृपत्नीं सखपत्नीं तथैव च ।। शरणागतपत्नीं च शूद्रपत्नीं तथैव च ।।१२।।
वेश्यासक्तो वसेन्नित्यं विधवासङ्गमाचरत् ।। दासीं वा रमयेन्नित्यं रजकीं वापि दोषकृत् ।।१३।।
रजस्वलां वा दुष्टोसौ रमयेच्च निरन्तरम् ।। ब्रह्मद्वेषी कृतघ्नश्च देवब्राह्मणनिन्दकः ।।१४।।
देवब्रह्मणद्रव्याणि बलादपहरेदसौ ।। ब्रह्मद्वेष्यैः कृतघ्नैश्च सखित्वं तस्य दुर्मतेः ।।१५।।
प्रजाक्षोभकरो नित्यं सदा दुर्मन्त्रिसङ्गतः ।। सुमन्त्रिणः परित्यक्ता वृद्धाश्चैव पुरोविदः ।।१६।।
तेन चाकृतपापानि न सन्ति धरणीतले ।। एवं पातकिनस्तस्य वत्सराणां शतं ययौ ।।१७।।
नार्यस्तेनानुभूतास्ता निश्वसन्त्यः पदे पदे ।। शपन्त्यो रोदनं कुर्युः कति भीत्या पलायिताः ।।१८।।
अन्तर्गृहं गताः काश्चिन्न मुक्तिं प्रतिपेदिरे ।। अतीवपापसन्दोहात् राजयक्ष्माऽभवत्ततः ।।१९।।
अतीते दशमे मासि व्याधिरुत्कृष्टतां गता ।। न भिषङ् न च वा बन्धुर्न माता जनकोपि वा ।।२०।।
न दैवं न च वा राज्यं शक्तास्ते तन्निवारितुम् ।। हा मातस्तात हा भाव हा भिषक्शालकागज ।।२१।।
रक्ष मां पाप कर्माणं दानैरपि धनैरपि ।। त्रिभिर्घ्रस्रैस्त्रिभिः पक्षैस्त्रिभिर्मासैस्तथैव च ।।२२।।
त्रिभिरब्दैः पुण्यपापैरिहैव फलमश्नुते ।। तस्मिन्नेवं विधे राज्ञि राजयक्ष्मव्यथातुरे ।।२३।।
दैवयोगात् तदा प्राप्तः सनको ब्रह्मनन्दनः ।। तत्पुरं प्रविवेशासौ ब्रह्मज्ञानपरायणः ।।२४।।
दान्तो जितेन्द्रियः शान्तो ह्यक्षमालाधरो मुनिः ।। तत्पुरं सम्प्रविष्टे तु सनके योगवित्तमे ।।२५।।
नृपभार्या पुण्यशीला तद्वृत्तान्तं निशम्य च ।। स योगी यत्र चास्ते वै तत्रागत्य पतिव्रता ।।२६।।
पादयोः पतिता तस्य इदमूचे पतिव्रता ।। स्वामिन्ननाथां मां पाहि पतिदानान् महामुने ।।२७।।
इत्युक्त्वा सा तदा देवी निन्ये तं राजमन्दिरम् ।। तमागतमभिप्रेक्ष्य विष्णुवर्मा महामतिः ।।२८।।
अभ्युत्थायासनं दत्वा मधुपर्कादिभिर्नृपः ।। पूजयामास विधिवत् सुखासीनं महामुनिम् ।।२९।।

तमूचे योगिनं राजा सनकं विनयान्वितः ॥ कृतार्थोऽस्मि महाभाग भवद्दर्शनमात्रतः ॥३०॥
अद्य मे सफलं जन्म जीवितं च सुजीवितम् ॥ अद्य मे पितरस्तुष्टा भवदागमनेन वै ॥३१॥
अनाथं पापकर्माणं विमुखं पुण्यकर्मणः ॥ दुराचाररतं कामलोलुपं त्राहि मां मुने ॥३२॥
जन्मान्तरार्जितात् पुण्यक्लेशात् प्राप्तं महात्मनः ॥ भवतो दर्शनं जातमलभ्यं पापकर्मिणाम् ॥३३॥
इत्युक्तस्तेन योगीन्द्रश्चिरं दध्यौ समाहितः ॥ मुहूर्तं ध्यानमास्थाय ज्ञात्वा तत्कर्म पापिनः ॥३४॥
उवाच मधुरं वाक्यं राजानं व्याधितं तदा ॥ राजन् वक्ष्यामि ते कर्म कृतं शृणु पुरातनम् ॥३५॥
यत्र वृन्दावनं नास्ति शालिग्रामशिलार्चनम् ॥ यत्र वेदध्वनिर्नास्ति पुराणपठनं तथा ॥३६॥
यत्र शास्त्रविवादो वा नास्ति सज्जनसङ्गतिः ॥ तत्र स्युः सकला रोगा दुर्भिक्षं भयमेव च ॥३७॥
यत्र निष्ठुरवचनं सदा क्रोधो वसेन्नृप ॥ यत्राशुभतरा वाणी तत्र स्युः सकला रुजः ॥३८॥
मलिङ्गनां मञ्चराणां धारणं यत्र भूमिप ॥ स्वाचारस्य परित्यागः परधर्मपरिग्रहः ॥३९॥
स्नानसन्ध्यादिकं कर्म यत्र नास्ति महीपते ॥ औपासनं वैश्वदेवो तत्र स्युः सकला रुजः ॥४०॥
यत्र गोपूजनं नास्ति यत्राश्वत्थस्य पूजनम् ॥ देवब्रह्मणपूजा वा नास्ति यज्ञक्रिया तथा ॥४१॥
यत्र दानक्रिया नास्ति तत्र स्युः सकला रुजः ॥ गोषु विप्रेषु नारीषु वेदेषु परवस्तुषु ॥४२॥
द्रोहं न कारयेद्विद्वान् कृत्वा चेन्नरकी भवेत् ॥ विश्वासघातिनश्चापि कृतघ्नस्यापि मायिनः ॥४३॥
परस्त्रीसङ्गिनश्चापि निष्कृतिर्नास्ति कुत्रचित् ॥ पूर्वजन्मकृतं पापमिह जन्मनि वा तथा ॥४४॥
तत्सर्वं व्याधिरूपेण पीड्यते तं नराधमम् ॥ त्वं तु पूर्वभवे जातो वेश्यायां शूद्रपूरुषात् ॥४५॥
धर्मध्वज इति ख्यातो लुब्धकः प्राणिहिंसकः ॥ पापकर्मरतो नित्यं देवब्राह्मणहिंसकः ॥४६॥
देशाद्देशमनुप्राप्तः कामपीडातुरः सदा ॥ चौर्यबुद्धिरतः क्रूरः सरस्तीरमुपास्थितः ॥४७॥
स्थिते त्वयि नृपश्रेष्ठ कस्यचित् द्विजवल्लभा ॥ भर्त्रा सहैव शनकैर्गङ्गास्नानार्थमागता ॥४८॥
विलोकयन्ती भर्तारं न पश्यन्ती दिशश्च सा ॥ साक्षात् कन्दर्पदर्पोयमथ वा जह्नुकन्यका ॥४९॥
सुदती सुन्दरी श्यामा सुकेशी सुस्तनी सती ॥ तां विलोक्य तदा त्वं तु स्नातो गङ्गाजले शुभे
॥५०॥
स्नानदानादिकं कर्म चक्रे विप्रस्तया सह ॥ तत्सर्वं दृष्टवान् त्वं तु मदविह्वलतो भृशम् ॥५१॥
ततः स्वभवनं यातः स विप्रो भार्यया सह ॥ गते तस्मिन् द्विजाग्रे तु त्वया तत्पदमीप्स्तितम्
॥५२॥
अनुसृत्य ततः पश्चाद्रात्रौ वेलाञ्च दृष्टवान् ॥ अर्धरात्रौ व्यतीतायां कुड्ये बिलमकारि च ॥५३॥

तद्बिलद्वारमार्गेण गतस्त्वं विप्रभामिनीम् ॥ निद्रालुं स्वामिना सार्धं स्पृष्टवान् करमूलतः ॥५४॥
त्वत्करस्पर्शमात्रेण बुबोध द्विजवल्लभा ॥ कुड्ये द्वारं तदालोक्य चोरोऽयमिति चाब्रवीत् ॥५५॥
बिलद्वारं पुनर्गत्वा निर्गतस्त्वं पुनर्बहिः ॥ पुरचाराः समागत्य बध्वा त्वां राजसन्निधिम् ॥५६॥
निन्युर्विशङ्किताः सर्वे राज्ञे चोरं व्यजिज्ञपन् ॥ राजाऽसौ धर्मशास्त्रज्ञश्छित्वा हस्तौ सपादकौ ॥५७॥
निर्वापयामास पुराद् बहिर्गिरौ न्यपातयत् ॥ तेन दुःखेन महता मृतस्त्वं पर्वतोपरि ॥५८॥
पूर्वजन्मार्जितेनैव दोषेण महता नृप ॥ जातेयञ्चेदृशी बुद्धिर्बहुपापरता सदा ॥५९॥
प्रातस्नानान्माघमासे पार्थिवत्वमवाप्तवान् ॥ द्विजस्य स्नानसन्ध्यादिदर्शनान्नृपसत्तम ॥६०॥
ममेह दर्शनं जातमलभ्यं पापकर्मिणाम् ॥ तस्मात् पूर्वार्जितं पापमिहजन्मार्जितं तथा ॥६१॥
रोगपीडाकरं नित्यं भवत्येव न संशयः ॥ पापं निरयभोगाय पुण्यं स्वर्गाय पार्थिव ॥६२॥
पापेन क्लिश्यते जन्तुर्यमदूतैर्भयङ्करैः ॥ कुम्भीपाकादिषु नृप नरकेषु बहुष्वपि ॥६३॥
ताड्यमानो यमभटैर्यातनामनुभूय च ॥ मृगादियोनिमासाद्य चान्ते गोयोनिमाश्रितः ॥६४॥
पश्चान्मनुष्ययोनौ तु जायते पापकृन्नरः ॥ एतत्ते कथितं सर्वं पूर्वजन्मार्जितं त्वया ॥६५॥
इतः परं त्वं भूपाल किमन्यच्छ्रोतुमिच्छसि ॥

इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे कोटितीर्थमहिमानुवर्णनं नाम एकषष्टितमोऽध्यायः ॥६१॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ६२ ॥  NEXT>>  श्लोक संख्या–९२

## ॥ कोटितीर्थमाहात्म्ये– नरकवर्णनम् ॥

### ॥ विष्णुवर्माणं प्रति सनकेन नरकवर्णनम् ॥

विष्णुवर्मोवाच ॥

मुने पापरता मर्त्याः कृत्वा पापान्यनेकशः ॥ देहान्ते नरकं यान्तीत्येवं त्वत्तः श्रुतं मया ॥१॥
येन येन तु पापेन यं यं नरकमाप्नुयुः ॥ पापिनां च गतिं चैव नरकस्य च विस्तरम् ॥२॥
नरके क्लिश्यमानानां जन्तूनां च स्थितिं विभो ॥ श्रोतुमिच्छामि तत्वेन ब्रूहि तन्मे मुनीश्वर ॥३॥

सनक उवाच ॥

श्रूयतामभिधास्यामि यत् पृष्टोऽहं त्वयानघ ॥ पापिनां चैव गमनं यातनां चैव संस्थितिम् ॥४॥

तत्र ये क्रूरकर्माणः पापिनो दानवर्जिताः ॥ ते घोरेण पथा यान्ति दक्षिणेन यमालयम् ॥५॥
षडशीतिसहस्राणि योजनानामतीत्य यत् ॥ वैवस्वतपुरं ज्ञेयं नानारूपमवस्थितम् ॥६॥
समीपमिव चाभाति नराणां पुण्यकर्मणाम् ॥ पापिनामपि दूरस्थं पथा रौद्रेण गच्छताम् ॥७॥
तीव्रकण्टकयुक्तेन शर्करासिकतेन च ॥ क्षुरधारानिभैस्तीव्रैः पाषाणैश्च क्वचित् पथि ॥८॥
क्वचित् पङ्केन महता कुक्कुरैश्चापि घातकैः ॥ लोहसन्धिनिभैर्दर्भैः सञ्छिन्नेन पथा क्वचित् ॥९॥
तटप्रपातविषमैः पर्वतैर्वृक्षसङ्कुलैः ॥ प्रतप्तदावयुक्तेन यान्ति मार्गेण दुःखिताः ॥१०॥
क्वचिद्विषमगर्तैश्च क्वचिल्लोहप्रपीडनैः ॥ सुतप्तवालुकाभिश्च पथि तीक्ष्णैश्च शङ्कुभिः ॥११॥
अनेकशाखाचित्रैश्च व्याप्तं वनशतैरपि ॥ कष्टेन तरसा मार्गमनालम्बेन गच्छति ॥१२॥
क्वचित्तप्तशिलाभिश्च क्वचिद् व्याप्तं हिमेन च ॥ क्वचिदुष्णाम्बुना व्याप्तं क्वचित् कारिषवह्निना ॥१३॥
सिंहैर्वृकैश्च शार्दूलैर् दशग्रीवैश्च दारुणैः ॥ क्वचिन्महाजलूकाभिः क्वचिच्चाजगरैर्वृतम् ॥१४॥
मक्षिकाभिर्महाक्रूरैः क्वचित् सर्पैर्विषोल्बणैः ॥ मत्तमातङ्गयूथैश्च बलोन्मत्तैः प्रमाथिभिः ॥१५॥
पन्थानमुल्लिखद्भिश्च तीक्ष्णशृङ्गैर्महावृषैः ॥ महाशृङ्गैश्च महिषैः क्वचिन्मार्गैः समावृतम् ॥१६॥
शाकिनीडाकिनीभिश्च विकरालैश्च राक्षसैः ॥ व्याधिभिश्च महाघोरैः पीड्यमानैर्व्रजन्ति च ॥१७॥
दुःखेन रोदमानाश्च महावायुप्रपीडनैः ॥ महद्भिश्च शिलावर्षैः पीड्यमाना व्रजन्ति च ॥१८॥
महता पांसुवर्षेण पीड्यमाना महापथि ॥ महामेघवरैर्घोरैर्वित्रास्यन्ते मुहुर्मुहुः ॥१९॥
निशितायुधवर्षेण पीड्यमाना व्रजन्ति च ॥ महाक्षाराम्बुधाराभिः सिच्यमाना पुनः पुनः ॥२०॥
महता शीतमरुता तथा वृष्ट्यातितीव्रया ॥ समन्तात् ताड्यमानाश्च क्लिश्यन्ति च रुदन्ति च ॥२१॥
इत्थं रूपेण मार्गेण पाथेयरहितेन च ॥ निरालम्बेन मार्गेण निर्जनेन समन्ततः ॥२२॥
तमोरूपेण कष्टेन सर्वदुःखाश्रयेण च ॥ नीयन्ते देहिनो राजन् मार्गे पापरता नराः ॥२३॥
यमदूतैर्महाघोरैस्तदाज्ञाकारिभिर्बलात् ॥ एकाकिनः पराधीना बन्धुमित्रविवर्जिताः ॥२४॥
शोचन्तः स्वानि कर्माणि रुदन्ति च मुहुर्मुहुः ॥ प्रेतभूता विवस्त्राश्च शुष्ककाष्ठोष्ठतालुकाः ॥२५॥
कृशाङ्गा भयभीताश्च दह्यमाना क्षुधाग्निना ॥ बद्धा शृङ्खलया केचिदाकृष्यन्ते यमानुगैः ॥२६॥
उरस्यधोमुखाश्चान्ये कृष्यमाणाः सुदुःखिताः ॥ केशपाशेन बद्धेन कृष्यन्ते पापिनो जनाः ॥२७॥
ललाटे चाङ्कुशेनान्ये प्रेताः क्लिश्यन्ति दुःखिताः ॥ प्रबद्धाः शृङ्खलाभिश्च हस्तयोश्च सकीलकाः ॥२८॥

ग्रीवां पाशेन कृष्यन्तः प्रयान्त्यन्ये सुदुःखिताः ॥ जिह्वायां रज्जुमाबध्य कृष्यन्ते यमकिङ्करैः ॥२९॥
कट्यामप्यर्धचन्द्रेण नप्रमाणा इतस्ततः ॥ शिश्ने सवृषणे बध्वा नीयन्तेन्ये च दुर्जनाः ॥३०॥
खिन्नाः कपोलयो रज्वाऽकृष्यन्त्यन्ये तथोष्ठयोः ॥ विभिन्नाश्चोदरे चान्ये तथा शृङ्खलया नराः ॥३१॥
कृष्यन्तः कर्णयोश्चान्ये भिन्नाश्च चुबुके परे ॥ विच्छिन्नवृषणाश्चान्ये छिन्नसर्वाङ्गसन्धयः ॥३२॥
प्रभिद्यमाना कुन्तैश्च भिद्यमानाश्च सायकैः ॥ इतस्ततः प्रधावन्ति क्रन्दमाना निराश्रयाः ॥३३॥
मुद्गरैर्लोहदण्डैश्च हन्यमाना मुहुर्मुहुः ॥ क्रकचैर्विविधैर्घोरैर् ज्वलिताग्निसमप्रभैः ॥३४॥
भिण्डिवालैश्च भिद्यन्तः स्रवन्तः पूयशोणितम् ॥ सक्षताः कृमिदष्टाश्च व्यथ्यन्ते विवशा नराः ॥३५॥
याचमानाश्च सलिलमन्नं चापि बुभुक्षिताः ॥ छायां प्रार्थयमानाश्च शीतार्ताश्चानलं पुनः ॥३६॥
दानहीनाः प्रयान्त्येवं पाथेयरहिते पथि ॥ एवं पथाऽतिकष्टेन गताः प्रेतपुरं यदा ॥३७॥
विज्ञापितास्तदा दूतैर् निवेद्यन्ते यमाग्रतः ॥ ततस्ते पापकर्माणस्तं पश्यन्ति भयानकम् ॥३८॥
सूर्यात्मजं नृपश्रेष्ठ विपरीतात्मबुद्धयः ॥ दंष्ट्राकरालवदनं भ्रुकुटीकुटिलाननम् ॥३९॥
ऊर्ध्वकेशं महाश्मश्रुं प्रस्फुरच्चाधरोत्तरम् ॥ अष्टादशभुजं क्रुद्धं नीलाञ्जनचयोपमम् ॥४०॥
सर्वायुधोद्यतकरं कालदण्डेन तर्जनम् ॥ महामहिषमारूढं दीप्तानलसमप्रभम् ॥४१॥
रक्तमाल्याम्बरधरं महामेरुमिवोत्थितम् ॥ प्रलयाम्बुधिनिर्घोषं पिबन्तमिव सागरम् ॥४२॥
ग्रसन्तमिव त्रैलोक्यमुद्गिरन्तमिवानलम् ॥ मृत्युञ्च तत्समीपस्थं कालानलसमप्रभम् ॥ ४३॥
कालं चाञ्जनसङ्काशं कृतान्तञ्च भयानकम् ॥ मारी चोग्रा महामारी कालरात्रिश्च दारुणा ॥४४॥
विविधा व्याधयस्तत्र नानारूपा भयावहाः ॥ शक्तिशूलाङ्कुशधरा पाशचक्रासिधारिणः ॥४५॥
वज्रदण्डधरा रौद्राः क्रूरबाणधनुर्धराः ॥ अनुख्यातमहावीर्याः क्रूराश्चाञ्जनवत् प्रभाः ॥४६॥
सर्वायुधोद्यतकरा यमदूता भयानकाः ॥ अनेन परिवारेण संवृतं घोरदर्शिनम् ॥४७॥
यमं पश्यन्ति पापिष्ठाश्चित्रगुप्तं च भीषणम् ॥ निर्भर्त्स्यति स वाक्येन यमस्तान् पापकारिणः ॥४८॥
चित्रगुप्तश्च भगवान् धर्मवाक्यैः प्रबोधयेत् ॥ भो भो दुष्कृतकर्माणः परद्रव्यापहारिणः ॥४९॥
गर्विता रूपवयसा परदारविमर्शकाः ॥ यः स्वयं क्रियते कर्म तद्भुक्ते च स्वयं नरः ॥५०॥
तत्किमर्थोपभोगार्थं भवद्भिर्दुष्कृतं कृतम् ॥ इदानीं किं प्रतप्यध्वं दह्यमानाः स्वकर्मभिः ॥५१॥
भुञ्जध्वं स्वानि कर्माणि नात्र दोषोऽस्ति कस्यचित् ॥ एवं बहुविधैर्वाक्यैरुपालब्धा यमेन ते ॥५२॥

शोचन्तः स्वानि कर्माणि तूष्णीं तत्रैव संस्थिताः ॥ इति धर्मं समादिश्य नराणां धर्मराट् पुनः ॥५३॥
तत्पापपङ्कशुध्यर्थं इदं वचनमब्रवीत् ॥ भो भो चण्ड महाचण्ड गृहीत्वेमान्नराधमान् ॥५४॥
विशोधयध्वं पापेभ्यः क्रमेण नरकाग्निषु ॥ ततः शीघ्रं समुत्थाय ते दूता सौरिवाक्यतः ॥५५॥
यमस्य पश्यतस्ते तु नरान् सङ्गृह्य पादयोः ॥ भ्रामयित्वाऽतिवेगेन प्रक्षिप्योर्ध्वं प्रगृह्य च ॥५६॥
सर्वसत्वेन महता सम्यक्तप्तशिलातले ॥ आस्फालयन्ति तरसा पादेनैव महाद्रुमम् ॥५७॥
ततस्ते रक्तस्रोतांसि स्रवन्ते झर्झरीकृताः ॥ निःसंज्ञा निर्विचेष्टाश्च जायन्ते पापिनो नराः ॥५८॥
ततश्च वायुना स्पृष्टाः शनैराश्वासिताः पुनः ॥ ततः पापविशुध्यर्थं क्षिप्यन्ते नरकार्णवे ॥५९॥
अष्टाविंशतिरेवात्र स्थिता नरककोटयः ॥ सप्तमस्यातलस्यान्ते घोरे तमसि संस्थिताः ॥६०॥
घोराख्या प्रथमा कोटी सुघोरा तदधःस्थिता ॥ अतिघोरा महाघोरा घोररूपा च पञ्चमी ॥६१॥
षष्ठञ्च इतराख्यातं सप्तमी च भयानका ॥ अष्टमी कालरात्रिश्च नवमी च भयोत्कटा ॥६२॥
दशमी च ततश्चण्डा महाचण्डा ततः परम् ॥ चण्डकोलाहला चान्या प्रचण्डा नरनायका ॥६३॥
कराला विकराला च वज्रा विंशतिका स्मृता ॥ त्रिकोणा पञ्चकोणा च सुदीर्घा परिवर्तुला ॥६४॥
सप्तभौमाष्टभौमा च दीप्ता मायाऽतिकाष्टमी ॥ इत्येता नामतः प्रोक्ताः क्रमाद्विंशति कोटयः ॥६५॥
अष्टाविंशतिरेवैताः पापिनां यातनाप्रदाः ॥ प्रत्येकं सर्वकोटीनां पञ्च पञ्चैव नायकाः ॥६६॥
नामतस्तान्निभोध त्वं मयोक्ता नृपसत्तम ॥ रौरवः प्रथमस्तेषां रुदन्ते यत्र देहिनः ॥६७॥
महारौरव संज्ञस्तु द्वितीयो राजसत्तम ॥ तमः शीतस्तथा चोष्णः पञ्चाद्या नायकाः स्मृताः ॥६८॥
सुघोरः सुतमस्तीक्ष्णः पद्मसंज्ञी वनाशठः ॥ महामायोऽतिलोमश्च सुभीमश्च कटाकटः ॥६९॥
तीव्रवेगः करालश्च विकरालः प्रकम्पनः ॥ महापद्मः सुपद्मश्च कालसूत्रः प्रतर्दनः ॥७०॥
सूचीमुखः सुनेमिश्च चादकः सुप्रदीपकः ॥ कुम्भीपाकः सुपाकश्च रूपशातीवदारुणः ॥७१॥
अङ्गारराशिर्भवनो स्त्रीपूयहृदमेव च ॥ विण्मयस्तुण्डशकुनिर्महासंवर्तकः क्रतुः ॥७२॥
सप्तजन्तुः पङ्कलेपः मारीमांसोद्रवस्तिषु ॥ उच्छ्वासा मरुदुच्छ्वासा सुदीर्घा कूटशाल्मली ॥७३॥
दुरष्टंसुमहानादः प्रयासुः सुप्रभावतम् ॥ ऋक्षमेषस्तु शाल्मल्यः सिंहव्याघ्र मृगाननः ॥७४॥
सूकरश्वानमहिषीवृषमेषखराननाः ॥ ग्रहकुम्भीरनक्रास्या सर्पक्रूराश्च वायसाः ॥७५॥
गृध्रोलूकजलूकाश्च शार्दूलकपिकर्कटाः ॥ गडुकः पूतिवक्त्रश्च रक्ताक्षः पूतिमृत्तिकाः ॥७६॥
कणधूमस्तुषाग्निश्च क्रमेणाग्निमयस्तथा ॥ अमेयश्चाप्रतिष्ठश्च रुधिराशनभोजनाः ॥७७॥

लालाभक्ष्यात्मभक्ष्यश्च सर्वभक्षः सुदारुणः ॥ सुशङ्कुस्तु विशालश्च निकटः कण्डुकस्तथा ॥७८॥
मरीषकः कटायश्च कण्टा वैतरणीनदी ॥ सुतप्तो लोहशङ्कुश्च तीक्ष्णजङ्घः प्रमारणः ॥७९॥
असिकालवनं घोरं अस्थिभङ्गप्रपीडनम् ॥ नीलमंसिक्षुराग्राणि रूढश्चाश्वप्रतर्दनः ॥८०॥
महापूजी सुपूजी च तप्तलोहमयी शिला ॥ पर्वतश्च सुराधारस्तथा च मलपर्वतः ॥८१॥
मूत्रविष्ठान्धकूपश्च पूयरूपश्च सातनम् ॥ मुसलोलूखलं यन्त्रं शिलाशकटलाङ्गलाः ॥८२॥
कालपत्रासिगहना महाबलकमण्डलः ॥ हनोहनोतिभङ्गश्च तप्तशूलमयोगुडः ॥८३॥
बहुदुःखं महादुःखं शशलं शमलं मलम् ॥ हालाहलोपिरूपश्च भीमरूपश्च मानगः ॥८४॥
एकपादो द्विपादश्च तीव्रश्चापि चिरन्तमः ॥ अष्टाविंशतिरित्येते क्रमशः पञ्चिकाः स्मृताः ॥८५॥
कोटिनामानुपूर्व्येण पञ्च पञ्चैव नायकाः ॥ चत्वारिंशत् शताधिकं महामशकमण्टपम् ॥८६॥
येषु पापाः प्रपच्यन्ते नराः कर्मानुरूपतः ॥ यातनाभिर्विचित्राभिरकर्म प्रेक्षितं भृशम् ॥८७॥
ततः पापक्षयं यावत् शोध्यन्ते नरकाग्निषु ॥ एवं क्लिश्यन्ति शुद्धाश्च सावशेषेण कर्मणा ॥८८॥
ततः क्षितिं समासाद्य जायन्ते नित्यशः पुनः ॥ नानायोनिमतिक्रम्य जायन्ते पशुयोनिषु ॥८९॥
क्रमाद्गोयोनिमासाद्य जायन्ते मानवाः पुनः ॥ इत्येवं कथितो भूप नरकस्य च विस्तरः ॥९०॥
तेषां गतिश्च कथिता यातना च नृपोत्तम ॥ यत्पृष्टं भवता राजन् तत्सर्वं कथितं मया ॥९१॥
इतः परं नरश्रेष्ठ किमन्यच्छ्रोतुमिच्छसि ॥

इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे कोटितीर्थमाहात्म्ये नरकगमन नरकवर्णनं नाम द्विषष्टितमोऽध्यायः ॥६२॥

अध्यायाः अकारादि <<BACK ॥ अध्यायः ६३ ॥ NEXT>> श्लोक संख्या–१२५

॥ कोटितीर्थमाहात्म्ये– नरकयातन वर्णनम् ॥

॥ विष्णुवर्माणं प्रति सनकेन नरकयातनवर्णनम् ॥

राजोवाच ॥

यद्यत् पापं समाधाय यं यं नरकमाप्नुयुः ॥ तदहं श्रोतुमिच्छामि तद्वदस्व महामुने ॥१॥

सनक उवाच ॥

शृणु राजन् प्रवक्ष्यामि यत् पृष्टं भवताऽधुना ॥ पञ्चानां महतां भूप पापानां तादृशामपि ॥२॥

## ब्रह्णघ्नः नरकम्

ब्रह्महा व्याघ्रशूलं तु तपनं चाप्रतर्दनम् ॥ तपने तप्यमानश्च शूले व्याघ्रैश्च भक्षितः ॥३॥
तप्तायः पिण्डवह्नीनो रुदन् बहुविधं नरः ॥ हा हतोस्मि हतोस्मीति रक्ष रक्षेति भाषते ॥४॥
ततस्तस्मात् समाकृष्य कुम्भीपाके क्षिपन्ति तम् ॥ तत्र वर्षसहस्राणि दह्यमानो महाग्निना ॥५॥
नरकेषु च सर्वेषु भुक्त्वा भोगाननेकशः ॥ ततः स निर्जनेऽरण्ये भवति ब्रह्मराक्षसः ॥६॥
तत्र पञ्चयुगं स्थित्वा चण्डालो जायते हि सः ॥

---

## सुरापस्य नरकम्

सुरापस्य गतिं वक्ष्ये नरकं च शृणु प्रभो ॥७॥
सुरापी मलमूत्रं च पिबेद्वर्षायुतं नृप ॥ तप्तायःपिण्डं तद्वक्त्रे क्षिपन्ति यमकिङ्कराः ॥८॥
सूचीपूरितनेत्रस्तु नखसन्धिषु शङ्कुभिः ॥ पीड्यमानो लुठन्नास्ते ह्यङ्गारशयने युगम् ॥९॥
तत्र तप्तसुरां पीत्वा हा हतेति रुदन् बहु ॥ चतुर्युगाष्टकं सोपि पिशाचत्वमवाप्स्यते ॥१०॥
अनुभूय च सर्वाणि हीनजन्मनि जायते ॥ पौल्कसीं योनिमासाद्य स व्यालो भवति ध्रुवम् ॥११॥

---

## स्वर्णस्तेयिनः नरकम्

वक्ष्यामि ते सुवर्णस्य स्तेयिनस्तु गतिं शृणु ॥ निष्कत्रयमितं राजन् सुवर्णं यो हरेन्नरः ॥१२॥
स्तेयी तु स तु विज्ञेयः सर्वकर्मबहिष्कृतः ॥ प्रायश्चित्तविहीनस्य वक्ष्ये तस्य च यातनाम् ॥१३॥
मूषावस्थं तथा कूपं मूषिकैः परिवारितम् ॥ हिमोत्कटं शूलयन्त्रं श्वभक्षं मांसभक्षणम् ॥१४॥
क्रकचैस्त्वर्धमानस्तु ताड्यमानश्च चर्मभिः ॥ स्थावरादिषु सञ्जातस्तत्र तिष्ठेद् युगाष्टकम् ॥१५॥
ततः किरातयोनौ तु जायते नात्र संशयः ॥

---

## गुरुदाररतस्य नरकम्

पापिनां नरकं वक्ष्ये गुरुदाराभिगामिनाम् ॥१६॥
ज्येष्ठा माता भ्रातृपत्नी यज्ञपत्नी नृपोत्तम ॥ अध्यापकस्य या पत्नी श्वशुरी मातुली तथा ॥१७॥
पितृमातृष्वसा चैव माता गुरुसुता नृप ॥ गुरुतल्पसमानानामेतेषां शृणु पातकम् ॥१८॥
प्रायश्चित्तं न तस्याहुस्तस्य पापं वदामि ते ॥ तस्योक्तं कालसूत्रञ्च महारौरवरौरवौ ॥१९॥
क्रन्दन् युगशतं राजन् हा हतोस्मीति निश्चलम् ॥ असिपत्रवनं प्राप्य ताड्यमानो यमानुगैः ॥२०॥
पच्यमानः कालसूत्रे पञ्चाशद्युगमावसेत् ॥ विच्छिद्य वृषणं तस्य तदञ्जलौ क्षिपन्ति च ॥२१॥

संवेष्ट्य तैलवस्त्रेण दह्यते यमकिङ्करैः ॥ अनुभूय च तान् घोरान् राक्षसो भवति ध्रुवम् ॥२२॥
ततः परं श्वानयोनौ चण्डालेषु ततः परम् ॥ तथोलूकस्ततः काकस्ततो गर्दभयोनिषु ॥२३॥
एवं जन्मशतं प्राप्य षण्डो भवति भारत ॥ ज्येष्ठस्य पत्नीगमने याति वैतरणीं नदीम् ॥२४॥
ततो विण्मूत्रपानं तु कृत्वा युगसहस्रकम् ॥ तदन्ते निर्जले देशे भवति ब्रह्मराक्षसः ॥२५॥
अन्यस्त्रीगमनं कृत्वा नरकाननुभूय च ॥ तप्ततैलमनुद्दिष्टं युगानामेकविंशतिः ॥२६॥
रजस्वलाः स्त्रियो राजन् यो गच्छेत् काममोहितः ॥ रक्तकूपे निमग्नश्च वसेद्युगशतं नरः ॥२७॥
जात्यन्धो जायते सोपि निर्वीर्यो व्रणशिश्नकः ॥ अल्पायुरनपत्यश्च दरिद्रो व्याधिपीडितः ॥२८॥
किरातीम्लेञ्छीचण्डालीवेलुपामद्यपादयः ॥ एतासां गमने राजन् महाघोराः प्रकीर्तिताः ॥२९॥
तथापि तस्य वक्ष्यामि शिरोधः शोषणं नृप ॥ मरुत्प्रपतनं चापि त्वचा मांसं तु भोजनम् ॥३०॥
वह्निज्वाला प्रवेशञ्च पञ्चाशद्युगमावसेत् ॥ परस्त्रीमात्रगमने विश्वस्ता गमने तथा ॥३१॥
कण्टकोपरि संवेश्य तस्योपरि च कण्टकान् ॥ शिलाभारैः पीड्यमानो रुदन् युगशतं वसेत् ॥३२॥
श्वानयोनिं समासाद्य क्रमान्मानुष्यमाप्नुयात् ॥ यौवने हीयमानश्च हीनाङ्गश्च व्रणी भवेत् ॥३३॥

---

## महापातकिनां संसर्गिणः नरकम्

एतेषां सह वासस्तु पापिनां यस्य जायते ॥ संवत्सरं तु पतितः स भवेत् पातकी नरः ॥३४॥
तस्य यन्नरकं प्रोक्तं तद्भवेत्तस्य पार्थिव ॥

---

## ब्रह्महत्यासमपातकानि

पङ्क्तिभेदी वृथापाकी नित्यं ब्राह्मणनिन्दकः ॥३५॥
आदेशी वेदविक्रेता पञ्चैते ब्रह्मघातकाः ॥ कुम्भीपाके महाघोरे दह्यमाना युगाद्युगम् ॥३६॥
ततो भूमिं समासाद्य सूकरत्वमावाप्नुयुः ॥ ब्राह्मणं यः समाहूय दास्यामीति धनादिकम् ॥३७॥
पश्चान्नास्तीति चेद्ब्रूयात् तमाहुर्ब्रह्मघातकम् ॥ असिपत्रवने राजञ्छिद्यमानो युगं वसेत् ॥३८॥
ब्राह्मणान् द्वेष्टि यो मर्त्यो स चण्डालो भवेद्ध्रुवम् ॥ येन धर्मान् परिज्ञाय तमेव द्वेष्टि यो नरः ॥३९॥
करोति वाऽप्युदासीनं तमाहुर्ब्रह्मघातकम् ॥ श्वानयोनिशतं गत्वा रासभेष्वभिजायते ॥४०॥
वृषभाणां गवां राजन् ब्राह्मणानां च योषिताम् ॥ आहारस्य तु विघ्नं यः करोति स तु पातकी ॥४१॥

नरकं तस्य विज्ञेयं महाशूलं भयानकम् ॥ म्लेच्छयोनिमनुप्राप्य मृगाणां हिंसको भवेत् ॥४२॥
स्नानदानतपःपूजाजपेषु निरतस्य च ॥ विघ्नकृन्नरके घोरे भ्रमत्येव न संशयः ॥४३॥
ज्योतिषं व्यवहारं च प्रायश्चित्तं चिकित्सकम् ॥ विना शास्त्रेण यो ब्रूयात्तमाहुर्ब्रह्मघातकम् ॥४४॥
नरकं तस्य विज्ञेयं मूषिकागणसंयुतम् ॥ भक्ष्यमाणस्तु तैर्याति खरयोनिं नृपोत्तम ॥४५॥
ऐश्वर्यमदमत्तानां मूकानां बधिरात्मनाम् ॥ आक्षेपकारिणाञ्चैव निर्घृणानां नृपोत्तम ॥४६॥
असत्यनिरतानाञ्च निन्दकानां बहुश्रुतान् ॥ अधर्मस्यानुमन्तॄणां ब्राह्मणे गर्ववादिनाम् ॥४७॥
एतेषां पातकानां च शृणु वक्ष्यामि यातनाः ॥ माहाक्रूरैः श्वभिर्नित्यं भक्ष्यमाणो युगायुतम् ॥४८॥
तस्मान्निर्गत्य शनकैः पक्षियोनिं वृजन्ति ते ॥ अन्योद्वेगकरो द्वेषी तथा ते चान्यसूचकः ॥४९॥
मूत्रपात्रमिति ख्यातं तस्यैव नरकं विदुः ॥

---

## सुरापानसमपातकानि

गणान्नभुक्सुरापी स्याद्विष्टाकूपे युगं वसेत् ॥५०॥
गणिकान्नभुक् च यो राजन् तप्तशूले युगं वसेत् ॥ स मत्स्यो जायते मर्त्यो बहुदुःखसमन्वितः ॥५१॥
पतितान्नं च यो भुङ्क्ते शूद्रतस्करकामिनाम् ॥ अतितप्तशिलायां तु स्थित्वा पञ्चशतं युगम् ॥५२॥
पश्चाद्भवति चण्डालो वैणिकश्च ततः परः ॥ औपासनपरित्यागी देवलान्नस्य भोजकः ॥५३॥
सूतकान्नभुजो ये च आरोप्य यमकिङ्कराः ॥ शिलायामभितप्तायां दहन्ति युगमावधि ॥५४॥
पश्चान्मूका भवन्त्येव बधिरा नृपपुङ्गव ॥ यः शूद्रेण समाहूतो भोजनं कुरुते द्विजः ॥५५॥
अनुज्ञातस्तु शूद्रेण सुरापी स हि विश्रुतः ॥ रक्तकूपे महाघोरे रुदन् पञ्चयुगं वसेत् ॥५६॥
भोजने वर्तमाने तु शूद्रं पतितमेव वा ॥ सूतकिनं तथा दृष्ट्वा भुङ्क्ते यदि स पातकी ॥५७॥
अस्थिच्छेदं स्नायुबन्धं जिह्वाच्छेदं च कुर्वते ॥ युगानां पञ्च पञ्चाशद्दह्यमानकरो भवेत् ॥५८॥
श्वानं तु पतितं दृष्ट्वा उरुक्यां शवमेव वा ॥ भुङ्क्ते यदि स पापी स्यात् रौरवं नरकं व्रजेत् ॥५९॥
उच्छिष्ठेन तु यो विप्रो भोजनं कुरुते यदि ॥ दहन्ति सर्वगात्राणि यमदूता नृपोत्तम ॥६०॥
स्नेहाल्लोभात् तथाऽलस्यात् सहभोजनकृन्नरः ॥ पित्तपानं समाप्नोति नरकं श्लेष्मकर्दमम् ॥६१॥
भुक्त्वा युगशतं राजन् श्वानयोनिषु जायते ॥ बहुभाषी नरो यस्तु भोजने समुपस्थिते ॥६२॥
क्रकचच्छेदनं तस्य युगानामेकसप्ततिः ॥ गृञ्जनं लशुनं राजन् पलण्डुं श्यामकर्दमम् ॥६३॥

भुक्त्वा नरः पतेद्घोरे रौरवे कालसूत्रके ॥ मात्रा पित्रा दुहित्रा वा भ्रात्रा पुत्रेण बन्धुना ॥६४॥
भुङ्क्ते यदि स पापी स्यात् ऊर्ध्वं वै मौञ्जिबन्धनात् ॥ वृषलीपतिना स्पृष्टं निन्दकानां तु कुत्सितम् ॥६५॥
सूतक्यन्नं यतेरन्नं भुक्त्वा चान्द्रायणं चरेत् ॥ एवं बहुविधं पापं सुरापानसमं नृप ॥६६॥

## स्वर्णस्तेयसमपातकानि

हेमस्तेयसमं पापं प्रवक्ष्यामि समासतः ॥ कस्तूरीं चन्दनं वासः कर्पूरञ्च मणिं तथा ॥६७॥
एतान् वा यो हरेत् पापी काष्ठयन्त्रं कबन्धकम् ॥ कृमिभक्ष्यं महानागं युगानामेकविंशतिः ॥६८॥
अनुभूय क्रमेणैव राक्षसा प्रभवन्ति हि ॥ ब्रह्महत्यादिपापानां कथञ्चिन्निष्कृतिर्भवेत् ॥६९॥
विश्वासघातकानां च कृतघ्नानां नरेश्वर ॥ शूद्रस्त्रीसङ्गिनां चैव नेहामुत्र च निष्कृतिः ॥७०॥
शूद्रान्नपुष्टदेहानां वेदशास्त्रविनिन्दताम् ॥ शिवनिन्दापराणां च विष्णुनिन्दापरात्मनाम् ॥७१॥
सत्कथानिन्दकानां च गुरुनिन्दापरात्मनाम् ॥ बौद्धालयं प्रविष्टस्य तच्छास्त्रं प्रश्रुतस्य च ॥७२॥
स्त्रीशूद्रैः पूजितं लिङ्गं विष्णुं वा पूजकस्य च ॥ एतेषां निष्कृतिर्नास्ति प्रायश्चित्तादिकल्पनैः ॥७३॥
मा ददस्वेति यो ब्रूयाद् गव्यग्नौ ब्राह्मणेषु च ॥ श्वानयोनिशतं गत्वा चण्डालेष्वभिजायते ॥७४॥
परस्त्रीद्रव्यहर्तारः सदा निष्ठुरभाषणः ॥ परासूयपरा नित्यं ते वै निरयगामिनः ॥७५॥
निरुच्छ्वासे महाघोरे नरके युगपञ्चकम् ॥ नरकं वह्निवृष्टिश्च युगानामेकविंशतिः ॥७६॥
श्वमांसभोजनं भुक्त्वा वसेयुस्तत्र पार्थिव ॥ काकजन्मशतं प्राप्य ततस्तुरगजन्मसु ॥७७॥
तदन्ते मत्स्ययोनौ च जायते राजसत्तम ॥ ताम्रं कांस्यं तथा सीसं त्रपूणां हरणे नृप ॥७८॥
वह्निज्वालेति विख्याते दह्यमानो युगं वसेत् ॥ नारङ्गजम्बीरफलं हेमस्तेय समं स्मृतम् ॥७९॥
शिलावृष्टिसमाख्याते नरके कल्पपञ्चकम् ॥ हा हेति क्रन्दमानः सन् पश्चात् पैशाच्यमश्नुते ॥८०॥
गृहक्षेत्राणि धान्यानि फलानि रसवन्ति च ॥ गोमहिष्यतुरङ्गांश्च अनड्वानजमेषकौ ॥८१॥
एतेषां हरणे वक्ष्ये नरकं शृणु पार्थिव ॥ शिलायामभितप्तायामारोप्य यमकिङ्कराः ॥८२॥
तप्तशङ्कुयुतायां च तप्तायःपिण्डभक्षणम् ॥ अधःशिरःशोषणं च मरुत्प्रपतनं तथा ॥८३॥
एतेषु नरकेष्वेवं वसेद्युगशतं क्रमात् ॥ दरिद्रो व्याधितो मूर्खो भवतीह न संशयः ॥८४॥
परैरङ्गीकृतं द्रव्यं तृणमप्यटवीं गतम् ॥ न स्पृशेत् पुरुषव्याघ्र हरेद्वा स तु पातकी ॥८५॥

## सङ्कीर्णपातकानि

पितृयज्ञपरित्यागी ह्यकाले कर्मको नृप ॥ तेषां नरकमत्युग्रं मातापितृविरोधिनः ॥८६॥
अङ्गारशयने घोरे नरके युगपञ्चकम् ॥ अनुभूय क्रमेणैव वायसो भवति ध्रुवम् ॥८७॥
अन्यान्नमन्ते भूपाल स्त्रियश्च पुरुषाधमान् ॥ तासां च नरकं वक्ष्ये शृणुष्व नृपपुङ्गव ॥८८॥
पुरुषास्तप्तताम्राद्यास्तप्तायःशयनेऽबलाः ॥ आलिङ्ग्यते दृढं दोर्भ्यामन्योन्यं तास्तु तान्प्रति ॥८९॥
तप्तशोणितकूपेषु मज्जन्ते युगपञ्चकम् ॥ वन्ध्या नपुंसका योनौ जायते पौल्कसादिषु ॥९०॥
ब्राह्मणान् ये निरीक्षन्ते कोपदृष्ट्या नराधमाः ॥ तप्तसूचीसहस्त्रैस्तु तेषां चक्षुः प्रपूर्यते ॥९१॥
असत्यनिरतानां च मर्यादालङ्घिनां तथा ॥ परान्नलोलुपानां च जिह्वां छिन्दन्ति नित्यशः ॥९२॥
त्यक्तवेदोक्तधर्माणः अनुष्ठानविवर्जिताः ॥ गजदन्तैर्भिद्यमाना निवसन्ति युगान् बहु ॥९३॥
विप्रग्रामेषु चादत्ते दुरात्मा ह्यधिकं करम् ॥ विप्रग्रामकरादाने योऽनुमन्ताऽतिपापकृत् ॥९४॥
तत्सहस्त्रं तथा भुङ्क्ते नरकान् कल्पपञ्चसु ॥ श्वविष्ठाभोजिनो नित्यं नरा ह्यातिथ्यवर्जिताः ॥९५॥
अयोनौ च वियोनौ च पशुयोनौ च भारत ॥ सित्क्वा रेतो महापापी रेतोभोजनमश्नुते ॥९६॥
स्नायुच्छेदं स्नायुबन्धमस्थिच्छेदं च तस्य वै ॥ अनुभूय क्रमेणैव धूमपानं युगायुतम् ॥९७॥
नरकान्निर्गतो भूत्वा वेश्यापुत्रोभिजायते ॥ उपवासदिने राजन् दन्तधावनकृन्नरः ॥९८॥
सुघोरं नरकं याति व्याघ्रभक्षं चतुर्युगम् ॥ उपवासविहीनस्य चैकादश्यां शुभे दिने ॥९९॥
नरकं तस्य विज्ञेयं युगानां पञ्चसप्ततिः ॥ स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम् ॥१००॥
स कोटिकुलसंयुक्तः कल्पान्ते नरके वसेत् ॥ विप्राणां क्षेत्रहरणे योऽनुमन्ता च कुत्सितः ॥१०१॥
उलूखले तं निक्षिप्य मुसलैः प्रहरन्ति च ॥ शिलायामभितप्तायां दहन्ति युगपञ्चकम् ॥१०२॥
अरण्ये निर्जने देशे भवन्ति ब्रह्मराक्षसाः ॥ विष्णुद्रव्यापहर्तारो रुद्रद्रव्यापहारकाः ॥१०३॥
अनाथधनहर्तारो ह्यारामे पुष्पचोरकाः ॥ ब्रह्महत्यासमं प्रोक्तं शयनं कण्टकोपरि ॥१०४॥
युगानामयुतं स्थित्वा व्याघ्रयोनौ भवन्ति हि ॥ जले देवालये दर्भे यज्ञभूमौ गवां क्षये ॥१०५॥
द्विजाग्नितुलसीदेवसन्निधौ कृष्णभूमिषु ॥ वल्मीकेश्वत्थसविधे उद्यानोच्छिष्टभूमिषु ॥१०६॥
स्त्रीसन्निधौ महीकूपे नोत्सृजेद्देहजं मलम् ॥ आत्महन्तुर्यथा पापं भ्रूणघ्नस्य यथा तथा ॥१०७॥
एतान् सर्वान् समाप्नोति नरकं युगपञ्चकम् ॥ अनुभूय क्रमेणैव काकयोनौ प्रजायते ॥१०८॥
कूटसाक्षीं वदेद्यस्तु धनबन्धुषु लोभतः ॥ स याति नरकान् घोरान् यावदाचन्द्रतारकम् ॥१०९॥
इह पुत्राश्च पौत्राश्च विनश्यन्ति परत्र च ॥ साक्ष्यां यस्तु मृषावादी स गच्छेद्रौरवं नृप ॥११०॥
परिघैः पट्टिशैः शूलैर्भिद्यते यमकिङ्करैः ॥ ये चातिपापिनो नित्यं ये च मिथ्यापवादिनः ॥१११॥

तेषां मुखे जलूकास्तु पूर्यन्ते पन्नगोत्तमाः ॥ ऋतौ नाभिगमेद्यस्तु स्वस्त्रियं मनुजेश्वरः ॥११२॥
स याति नरकं घोरं ब्रह्महत्यां च विन्दति ॥ संक्रान्त्यष्टमीपातेषु भूतवैधृतिपर्वसु ॥११३॥
गुरुदेवान्तिके चाहिन सन्ध्ययोर्जन्मऋक्षके ॥ व्रते पितृदिने विद्वान्न गच्छेत् स्वस्त्रियं ऋतौ ॥११४॥
यदि गच्छेत् स पापी स्यात् मोहाद्वा रौरवं व्रजेत् ॥ जातस्तत्र दुराचारो मूर्खो व्याधित एव वा ॥११५॥
अल्पायुश्च कुलघ्नश्च ब्रह्मद्वेषी सदा भवेत् ॥ अनाचाररतां दृष्ट्वा यः शक्तो न निवारयेत् ॥११६॥
तत्पापार्धमवाप्नोति यतोऽपेक्षापरायणः ॥ पापिनां पापगणनं यः करोति नराधमः ॥११७॥
अस्ति चेत् समपापी स्यान्नास्ति चेत् द्विगुणी भवेत् ॥ अपहृत्य परस्यार्थं यः परेभ्यः प्रयच्छति ॥११८॥
स याति नरकं घोरं यस्यार्थस्तस्य तत्फलम् ॥ परनिन्दां प्रशंसां च आत्मनश्च करोति यः ॥११९॥
आस्ये तस्यायसं पिण्डं प्रक्षिपन्ति यमानुगाः ॥ भोज्ये कलहकर्तारः पुराणादिविवर्जिताः ॥१२०॥
नामत्रयविहीनाश्च ते वै निरयगामिनः ॥ घोरं तु नरकं ज्ञात्वा पातकं न स्मरेत् सुधीः ॥१२१॥
तस्मात् पापं महाराज स्वप्नेपि नाचरेत् क्वचित् ॥ इत्येषा कथिता राजन्नरकस्थस्य यातना ॥१२२॥
इतः परं महीपाल किमन्यत् ते वदाम्यहम् ॥

सूत उवाच ॥

सनकोक्तां समाकर्ण्य नरकस्थस्य यातनाम् ॥१२३॥
पापिनां च गतिं श्रुत्वा नरकस्य विनिस्मृतिम् ॥ राजासौ विह्वलो भूत्वा वेपमानो भयातुरः ॥१२४॥
शिरस्यञ्जलिमादाय पुनः प्रोवाच योगिनम् ॥
इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे नरकयातनवर्णनं नाम त्रिषष्टितमोऽध्यायः ॥६३॥

अध्यायाः अकारादि <<BACK ॥ अध्यायः ६४ ॥ NEXT>> श्लोक संख्या–८३

॥ कोटितीर्थमाहात्म्ये– गर्भवासादि कथनम् ॥

विष्णुवर्माणं प्रति सनकेन बोधनम्

नरकभोगानन्तरगतिः

विष्णुवर्मोवाच ॥

भुक्त्वा नरकभोगांस्तु जनाः पापरता मुने ॥ यां यां योनिं प्रपद्यन्ते कथं वा मुनिसत्तम ॥१॥
गर्भे कथं वा वर्तेरन् जायन्ते वा कथं नराः ॥ तत् सर्वं वद तत्वेन आस्ते यदि कृपा तव ॥२॥

सनक उवाच ॥

शृणु राजन् प्रवक्ष्यामि यदुक्तं भवताधुना ॥ गर्भस्थानां पापिनां तु बहिस्थानां तथा स्थितिम् ॥३॥
नरकेषु चिरं मग्ना जन्तवो बहुदुःखिनः ॥ शोचन्तः स्वकृतं कर्म नरकाननुभूय च ॥४॥
क्रमात्तु दैवगत्या हि निविशन्ति महीतलम् ॥

---

## स्थावरजन्मप्राणिजन्मनोः दुःखानि

स्थावरत्वे नियुज्यन्ते महामोहवशं गताः ॥५॥
दावाग्निना विनिर्दग्धा छिद्यन्ते पापकर्मभिः ॥ पतन्ति हि महावातैः शुष्यन्ते चण्डरश्मिभिः ॥६॥
फलार्थं वा गृहार्थं वा छिद्यन्ते मनुजैर्नृप ॥ एवं क्लेशवहा राजन् चिरं तिष्ठन्ति भूतले ॥७॥
ततः कृमित्वमासाद्य सदा दुःखोपभोगिनः ॥ क्षणार्धं जीविनस्ते हि क्षणार्धेन म्रियन्ति च ॥८॥
बलवद्भिश्च खाद्यन्ते अशक्ता आत्मरक्षणे ॥ शीतवातातपक्लेशसहाश्च क्षुधिता भृशम् ॥९॥
मलमूत्रादिमांसेषु सञ्चरन्तो म्रियन्ति च ॥ पक्षियोनिं ततः प्राप्य बलिष्ठैः पक्षिभिर्हताः ॥१०॥
म्रियन्ते केचिदण्डेषु बुद्धाः केचिद्गृहाङ्गणे ॥ भक्ष्यन्ते मनुजैः केचिद्बल्यर्थं निहताः परे ॥११॥
एवं क्लेशसमायुक्ता निधनं यान्ति पाण्डव ॥ पशुयोनिं ततो गत्वा क्लिश्यन्ते बहुधा नृप ॥१२॥
शृङ्गिणो दंष्ट्रिणः केचित् केचिद्वाहनरूपिणः ॥ केचिद्भारं वहन्त्यद्धा बद्धास्तिष्ठन्ति चापरे ॥१३॥
दुर्बलाः खादिताश्चान्यैरमेध्यं भोजिनो परे ॥ कांश्चिद्धत्वा च खादन्ति रमन्ते मातृभिः परे ॥१४॥
शीतवातातपव्याधिक्लिष्टाश्च तृणभोजिनः ॥ स्वजनैश्च परित्यक्ता बाध्यन्तेऽन्यजनैर्भृशम् ॥१५॥

---

## कर्मशेषेण मनुष्यजन्मप्राप्तिः

एवं भुक्त्वा महद्दुःखं प्राप्यन्ते पुण्ययोगतः ॥ मानुष्यं प्राप्नुवन्त्येते जन्तवः कुरुनन्दन ॥१६॥
उत्कृष्टमध्यनीचाश्च जायन्ते ते नृयोनिषु ॥ उत्कृष्टो ब्राह्मणः क्षत्ता मध्ये नीचस्तु विण्नृप ॥१७॥
शूद्रो नीचतमः प्रोक्तश्चित्रिणः शिल्पिकर्मिणः ॥ रजका स्वर्णकाराश्च कुम्भकाराश्च लोहकाः ॥१८॥
वैन्याः किरातवेणाद्याः कुविन्दा नटपुल्कसाः ॥ एवमाद्या नृपश्रेष्ठ जायन्ते कर्मशेषतः ॥१९॥
तथा पापावशेषेण जायन्ते रोगिणो भुवि ॥ अन्धाः कुब्जा जडा मूका हीनाङ्गाः कृशदेहिनः ॥२०॥

खञ्जाः काणाः स्थूलकायास्तथा क्लीबा भवन्ति हि ॥ केचित् पुण्यावशेषेण राजानो भाग्यशालिनः ॥२१॥
विद्यावन्तः पुण्यरतास्तथा वेदान्तवादिनः ॥ काव्यालङ्कारनिपुणाः शब्दशास्त्रविशारदाः ॥२२॥
धनधान्यसमृद्धाश्च पुराणाम्नायशिक्षकाः ॥ षडङ्गज्योतिषज्ञाश्च कर्मकाण्डरताः परे ॥२३॥
केचिद्यजन्ति च हरिं केचित् शिवपरायणाः ॥ तदन्ये मनुजा राजन् षण्डवेषपरायणाः ॥२४॥
वेश्यासक्ता हिंसकाश्च मधुमांसोपसेविनः ॥ नीचसेवापरा दृप्ताः पिशुनाः परपीडकाः ॥२५॥
एवं भूता दुरात्मानः पापिनो राजसत्तम ॥

---

## गर्भवासमारभ्य वार्धक्यपर्यन्तं दुःखानि

कामेन बाधिताः सर्वे नरास्तु पशुजातयः ॥२६॥
मैथुनं भावमाश्रित्य क्रीडन्ति च परस्परम् ॥ स्तनाश्रयं तु नारीणां प्रोषितं शुक्रवर्धनम् ॥२७॥
पुंसां बीजाश्रयं शुक्रं स्त्रीणां सङ्गेन वर्धते ॥ पुरुषः शुक्लवृध्या च नारी शोणितवर्धनात् ॥२८॥
शुक्रस्यपतने काले जीवांशः पुरुषस्य तु ॥ अन्तर्विशति स्त्रीगर्भे पुरुषात्तु नृपोत्तम ॥२९॥
मयूरमांसवद्राजन् मृदुत्वं प्रतिपद्यते ॥ चैतन्यमल्पमभवन्मांसादुपरि पार्थिव ॥३०॥
मलमूत्रादिशेषेण बाध्यते स तु गर्भगः ॥ पूर्णे पक्षद्वये पश्चान्मत्स्याकारं प्रपद्यते ॥३१॥
पूर्णे मासत्रये गर्भे हस्तपादेन युज्यते ॥ पञ्चमे मांसवृद्धिः स्यात् षष्ठे जीवप्रवेशनम् ॥३२॥
सप्तमे रोमवृद्धिः स्यादष्टमे गर्भपुष्टिता ॥ मलमूत्रादि पङ्केन लिप्तः क्लेशमवाप्नुयात् ॥३३॥
कट्वम्ललवणात्युष्णातीक्ष्णरूपेण तप्यते ॥ भ्रमन् वै क्लेशमापन्नो गर्भेऽस्मिन्नृपसत्तम ॥३४॥
पूर्वजन्मकृतं पापं स्मरन् शोकाद् रुदन् भृशम् ॥ समृद्धज्ञानसम्पन्नः स्वयमाश्वास्य वर्तते ॥३५॥
स गर्भवेदनां सोढुमशक्तः प्रलपन् बहु ॥ मलमूत्रादिसम्बद्धो निन्दन्नास्ते कुरूद्वह ॥३६॥
अहोऽहं पापधीर्नित्यं जन्मकोटिशतेषु च ॥ पुत्रमित्रकलत्रार्थमपहृत्य वसूनि च ॥३७॥
प्राप्तोऽहमीदृशं पापी कदा मोक्ष्य इति प्रभो ॥ परस्त्रीसङ्गमे नित्यं मोहितः पापमाचरम् ॥३८॥
तस्मात् प्राप्तं गर्भवासदुःखं मोक्षः कदा भवेत् ॥ एकोऽहं पापकर्माणि कृत्वा स्थाणुत्वमाप्तवान् ॥३९॥
तत्रापि दुःखबहुलं अनुभूतं पुरा मया ॥ मातृकुक्षौ दह्यमानो जरायुपरिवेष्टितः ॥ ४०॥
मया पुष्टास्तु पुत्राद्याः स्वकर्मवशवर्तिनः ॥ गतास्तेऽन्यत्र दाराद्या दहाम्येकोत्र दुःखितः ॥४१॥

अहो दुःखमहो दुःखमहो दुःखं हि देहिनाम् ॥ देहस्तु पापसञ्जातस्तस्मात् पापं न कारयेत् ॥४२॥
कायेन मनसा वाचा परपीडामकारिषम् ॥ अकृतं देवकार्यं तु पितृकार्यमथापि वा ॥४३॥
अग्निदेवातिथीन् विप्रानर्चितोस्मि कदाचन ॥ जपस्नानविहीनोऽहमसद्भिः सह सङ्गमात् ॥४४॥
सदा पापरतत्वाच्च प्राप्तोहं गर्भवेदनाम् ॥ अनिन्द्यान्निन्द्यमानोऽहं एवं प्राप्तं महद्भयम् ॥४५॥
एवं बहुविधं जंतुर्विलप्य स्वयमेव तु ॥ आत्मनाऽत्मानमाश्वास्य बुद्धिं धर्मे नियुज्यते ॥ ४६॥
धर्मं कृत्वा यथान्यायं सत्सङ्गेषु प्रवृत्य च ॥ कृत्वा देवाग्निपूजां च यास्येऽहं परमां गतिम् ॥४७॥
आराध्य च जगन्नाथं सर्वकामार्थदायकम् ॥ जगद्योनिमुदाराङ्गं विश्वयोनिं जगद्गुरुम् ॥४८॥
देवगन्धर्वनिचयैर्मुनिभिः सिद्धचारणैः ॥ अर्च्यमानं सदानन्दं सृष्टिस्थित्यन्तकारिणम् ॥४९॥
सर्वगं चाक्षरं नित्यं स्वप्रकाशं निरञ्जनम् ॥ पीतम्बरधरं देवं शङ्खचक्रगदाधरम् ॥५०॥
लक्ष्मीपतिं विशालाक्षं कालमेघोपशोभितम् ॥ गर्भाद्विनिर्गतोऽहं तमर्चयिष्ये जनार्दनम् ॥५१॥
अतिक्रमित्वा संसारं मुक्तिं यास्यामि निश्चितम् ॥ इति सञ्चिन्त्यमानस्तु देही गर्भगतो नृप ॥५२॥
प्रसूतिकालवायुश्च पुरःस्थित्वा विकर्षति ॥ तेनैव वायुना बद्धः प्राजापत्येन पाण्डव ॥५३॥
मातुश्च दुःखमतुलं कुर्वन् कर्मबलेन च ॥ आकृष्यमाणो निर्गच्छेद् योनियन्त्रप्रपीडितः ॥५४॥
निश्चेष्टं भुवि वेष्टन्तं रुदन्तं तु विलक्षणम् ॥ उज्जीवयति तं वायुर् बाह्यवर्ती नृपोत्तम ॥५५॥
नष्टस्मृतिः सदा दुःखमतुलं प्रतिपद्यते ॥ दैवाद्बालत्वमापन्नो जन्तुः क्लेशसमन्वितः ॥५६॥
स्वदेहमलमूत्रैश्च लिप्ताङ्गो दुःखकर्षितः ॥ आध्यात्मिकादिदुःखैश्च पीड्यमानो रुदन् वसेत् ॥५७॥
क्षुत्तृड्भ्यां पीडितो नित्यं मशकैर्यूकदंशकैः ॥ स्वपन् रुदंश्च बहुशो वर्तते चेटके नृप ॥५८॥
क्षुधया पीडिते बाले जननी बान्धवा अपि ॥ वदन्त्यौषधमन्येपि देयं देयमिति प्रभो ॥५९॥
एवं बाल्यमनुप्राप्तो ह्यन्याधीनतया नृप ॥ ततः कौमारमासाद्य क्रीडागोष्ठीपरायणः ॥६०॥
पितृभ्यां ताडितः सोऽथ गुरुणा ताडितो भवेत् ॥ ततो यौवनमासाद्य धनार्जनपरो भवेत् ॥६१॥
गृहं क्षेत्रादिकं कर्म नास्ति धान्यमथापि वा ॥ मम मूलधनं नास्ति वृष्टिश्चापि न वर्षति ॥६२॥
न लभ्यते वर्तनं च राजा त्रस्यति दुस्सहम् ॥ रिपवो मां च बाधन्ते कथमन्यत्र वर्तये ॥६३॥
समृद्धस्तु कथं च स्यां जीवनं कथमित्यपि ॥ व्यवसायाक्षमश्चाहं वर्धिष्ये तनयान् कथम् ॥६४॥
आध्यात्मिकादिदुःखानि ह्यनुभूय सुकर्शितः ॥ एवं चिन्ताकुलो जंतुर्यौवने राजसत्तम ॥६५॥
ततो वार्धक्यमापन्नः क्षीयमाणबलो भवेत् ॥ जरापलितदेहोऽसौ कम्पते सततं नृप ॥ ६६॥

श्वासखासादिसंयुक्तः पीडितो घूर्णलोचनः ॥ श्लेष्मैश्च व्याप्रुताङ्गः सन् पुत्रैर्निर्भत्स्यते सदा ॥६७॥
भार्या शुश्रूषते नैनं बान्धवोपि पराङ्मुखाः ॥ अहो कष्टमहो कष्टं वृद्धानां दुःखजीवनम् ॥६८॥
क्षुतृड्भ्यां पीडितो नित्यं याचतेऽन्नं जलं तु वा ॥ इत्येवं प्रलपन् जन्तुर्विवशः कर्मसंक्षयात्
॥६९॥
निश्चैतन्यो भवेच्छीघ्रं बान्धवैः परिवेष्टितः ॥ ततो यमभटैर्बद्धो भत्स्यमानो यमालयम् ॥७०॥
प्राप्यते घोरमार्गेण वृकराक्षसभक्षितः ॥ खड्गसूचीसमायुक्ते तप्तसैकतविस्तृते ॥७१॥
तप्तपाषाणसम्बाधे तप्तकर्दमसङ्कुले ॥ वह्निवृष्ट्या शस्त्रवृष्ट्या शिलावृष्ट्यान्विते पथि ॥७२॥
कृष्यमाणो यमभटैर्गच्छत्यन्तकसन्निधिम् ॥ एवं नरा मोहयुक्ताः संसारे घोरसागरे ॥७३॥
भ्रमन्ति बहुदुःखार्ता जायन्ते च म्रियन्ति च ॥

---

## पुण्यकृतां गतिवर्णनोपक्रमः

शिवविष्ण्वार्चनं यावन्न करोति विमूढधीः ॥७४॥
तावत् संसारदुःखौघैः क्लिश्यते नात्र संशयः ॥ तस्माच्छिवार्चनं कार्यं विष्णुपूजनमेव वा ॥७५॥
पुण्यतीर्थावगाहं च सत्पात्रे दानमेव च ॥ तस्माज्ज्ञानं समासाद्य लभते परमां गतिम् ॥७६॥
यत् पृष्टं भवता राजन् तत् सर्वं कथितं मया ॥ अतः परं महाभाग किमन्यच्छ्रोतुमिच्छसि ॥७७॥

विष्णुवर्मोवाच ॥

स्वामिन्नहं कृतार्थोऽस्मि महायोगिन्नमोस्तु ते ॥ कृपां कुरु मयि ब्रह्मन् धर्ममार्गपराङ्मुखे ॥७८॥
भवदुक्तं समाकर्ण्य वेपथुर्जायते मयि ॥ भयञ्च जायतेत्यर्थं तन्नुदस्व दयानिधे ॥७९॥
नरकस्य च विस्तारः पापिनां मार्ग एव वा ॥ नारकीयातना जन्मगर्भवासश्च देहिनाम् ॥८०॥
उक्तः संक्षेपतो ब्रह्मन् श्रुतस्ते वदतोऽनघ ॥ इदानीं श्रोतुमिच्छामि मार्गं सुकृतिनां विभो ॥८१॥
यद्यत् पुण्यं नराः कृत्वा यं यं भोगमवाप्नुयुः ॥ कथं सुकृतिनो यान्ति कं लोकं वद मे मुने
॥८२॥
इति राज्ञोदितं श्रुत्वा सनकः प्रत्युवाच ह ॥
इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे गर्भवासादिकथनंनाम चतुःषष्ठितमोऽध्यायः ॥६४॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ६५ ॥  NEXT>>  श्लोक संख्या–११२

॥ कोटितीर्थमाहात्म्ये– पुण्यलोकविस्तारः, उपसंहारश्च ॥

विष्णुवर्माणं प्रति सनकेन बोधनम्

सुकृतिनां गतिः

सनक उवाच ॥

शृणु राजन् प्रवक्ष्यामि मार्गं सुकृतिनां शुभम् ॥ तेषां स्वर्गादिभोगं च पुनर्जन्मादिकं च यत् ॥१॥
द्वादश्यां पौर्णमास्याञ्च एकादश्यां नृपोत्तम ॥ सोमसूर्योपरागे च सङ्क्रान्तावयने शुभे ॥२॥
सिद्धियोगे पुण्यदिने व्यतीपाते च वैधृतौ ॥ पुण्यक्षेत्रे पुण्यकाले माघे कार्तिकमाधवे ॥३॥
शन्यश्विन्यां बुधाश्विन्यां पुष्यर्क्षे नृपसत्तम ॥ स्नानं दानं जपो होमो हरिशङ्करपूजनम् ॥४॥
तथा विप्रार्चनं चैव यथाशास्त्रं करोति यः ॥ मातृतः पितृतश्चैव प्रियान् स्ववंशजानपि ॥५॥
उद्धृत्य देवगन्धर्वसेवितो दिव्यदेहवान् ॥ तप्तकाञ्चनसंवीतैः किङ्किणीजालभूषितैः ॥६॥
यानहंसादिसंयुक्तैर् नानामणिविकुट्टिभैः ॥ अप्सरोभिः सेव्यमानो भुञ्जन् भोगान् यथेप्सितान् ॥७॥
यमलोकं समासाद्य धर्मराजेन पूजितः ॥ तत्र भुक्त्वा बहुविधान् भोगान् सर्वान्यथेच्छया ॥८॥
ततः स्वर्लोकमासाद्य भुक्त्वा तत्रापि पार्थिव ॥ शिवलोकं समासाद्य शिववन्मोदते नरः ॥९॥
तिलतैलान्विताङ्गञ्च गोघृतेनापि पार्थिव ॥ हरिशङ्करयोरर्चां यः कुर्याद्भक्तिभावतः ॥१०॥
स मुक्तः सर्वपापेभ्यः सर्वयज्ञफलं लभेत् ॥ यद्यदिष्टतमं भोज्यं तत्तदीशाय दापयेत् ॥११॥
वैशाखे कार्तिके माघे दीपदानं द्विजार्चनम् ॥ यद्यदिष्टतमं भोज्यं तत्तद्विप्राय दापयेत् ॥१२॥
भोजिते ब्राह्मणे मिष्टं हरिस्तृप्यति वै ध्रुवम् ॥ स याति ब्रह्मसदनं सर्वमोहविवर्जितम् ॥१३॥
उष्णोदकेन यो राजन्नभ्यङ्गं कारयेद्द्विजान् ॥ स कोटिकुलमुद्धृत्य शिवलोके महीयते ॥१४॥
कर्मणा मनसा वाचा यो रक्षेदामयाविनम् ॥ स याति ब्रह्मसदनं पुनरावृत्तिवर्जितम् ॥१५॥
अन्येभ्यः प्रतिगृह्यापि स्वाङ्गमपि पयस्विनीम् ॥ यो ददाति च विप्राय स याति ब्रह्मणः पदम् ॥१६॥
यो मृत्युकाले सम्प्राप्ते गां ददाति पयस्विनीं ॥ गवा दर्शितमार्गेण स्वर्गलोके महीयते ॥१७॥

वस्त्रं ददाति यो राजन् ब्राह्मणाय सदक्षिणम् ॥ शिवलोकमवाप्नोति शतवंशसमन्वितः ॥१८॥
कौबेरं कम्बलाद्याति कञ्चुकात् सूर्यसन्निधिम् ॥ चित्राम्बरप्रदाता च स्वर्गलोकाधिपो भवेत् ॥१९॥
सुरक्तवस्त्रदश्चैव नृप मांजिष्ठदस्तथा ॥ नीलाम्बरप्रदाता च विष्णुलोकं स गच्छति ॥२०॥
यानदश्छत्रदश्चैव पादुकां च उपानहम् ॥ स्वर्गलोकमवाप्नोति सर्वभोगसमन्वितः ॥२१॥
गवाश्वमहिषान् राजन् यो ददाति सदक्षिणान् ॥ अपमृत्युञ्च जित्वा तु तथा मेषप्रदो नृप ॥२२॥
स्वर्गलोकं समासाद्य इन्द्रेण सह मोदते ॥ दारुणा निर्मितं पात्रं पूरितं गन्धवारिणा ॥२३॥
यो ददाति नरो गच्छेत् सुरलोकं सुधां पिबन् ॥ यो राजन् लोहपात्रं तु स्वादुपानप्रपूरितम् ॥२४॥
ददाति स पिबन् मार्गे सुधां वैकुण्ठभाग्भवेत् ॥ ताम्रपात्रं नृपश्रेष्ठ गन्धोदकसमन्वितम् ॥२५॥
ददाति वेदविदुषे सूर्यलोके महीयते ॥ राजतं राजशार्दूल पात्रं क्षीरसमन्वितम् ॥२६॥
वेदशास्त्रविदे दद्यादस्य पुण्यं वदामि ते ॥ पञ्चाशद्युगपर्यन्तं चन्द्रलोके सुखी वसेत् ॥२७॥
ततो भूमिं समासाद्य चक्रवर्ती भवेद्ध्रुवम् ॥ सुवर्णनिर्मितं पात्रं स्वादुपानप्रपूरितम् ॥२८॥
श्रोत्रियाय च यो दद्यात्तस्य पुण्यफलं शृणु ॥ यक्षकिन्नरगन्धर्वचारणाद्यैरभिष्टुतः ॥२९॥
सुधापानं प्रकुर्वाणः पथि स्वर्लोकमाप्नुयात् ॥ भूलोकं समनुप्राप्य सार्वभौमो भवेन्नरः ॥३०॥
इष्ट्वा दिव्यक्रतून् सर्वान् तथा जित्वा भुवस्थलम् ॥ दत्वा सर्वाणि दानानि विष्णुसायुज्यमश्नुते ॥३१॥
कांस्यपात्रं तु योदद्याद्वस्त्रदक्षिणसंयुतम् ॥ ददामि विष्णवेत्युक्त्वा वेदशास्त्रविदे नृप ॥३२॥
स कोटिकुलसंयुक्तः स्वर्गलोके महीयते ॥ नवं वै मृण्मयं पात्रं स्वादूदकसमन्वितम् ॥३३॥
दरिद्रोऽपि ददेद्यस्तु स्वर्गलोकं समश्नुते ॥ वृद्धाय दण्डं भेषज्यं रोगिणे नृपसत्तम ॥३४॥
यो ददाति नरो भक्त्या भाग्यवान् जायते भुवि ॥ हिरण्यं रजतं वापि निष्कमात्रं ददाति यः ॥३५॥
सीसं कांस्यं तथा ताम्रं पलत्रितयसंमितम् ॥ यो दद्याद्वेदविदुषे स्वर्गलोके चिरं वसेत् ॥३६॥
तदन्ते भुवमासाद्य वेदवेदाङ्गपारगः ॥ ब्रह्मज्ञानमवाप्याऽथ शिवसायुज्यमाप्नुयात् ॥३७॥
अयःपात्रं च काषायं पादुकां भैक्षमेव च ॥ कौपीनं कम्बलं चैव यतये यो ददाति च ॥३८॥
स स्वर्गभोगान् भुक्त्वेह जायते ज्ञानवान्नरः ॥ वैशाखे कार्तिके मासे आषाढे पीतमुत्तमम् ॥३९॥
वृषभं विसृजेद्यस्तु तस्य पुण्यफलं शृणु ॥ सर्वजन्मार्जितैः पापैः स मुक्तः शिवरूपभाक् ॥४०॥
कुलसप्ततिसंयुक्तो रुद्रेण सह मोदते ॥ पितरस्तस्य तृप्यन्ति देवाश्च नृपपुङ्गव ॥४१॥
नरकस्था दिवं यान्ति दिविस्था ब्रह्मणः पदम् ॥ तत्रस्था विष्णुलोकं च सत्यं सत्यं मयोदितम्

॥४२॥

शिवलिङ्गाकृतिं कृत्वा महिषं यः समुत्सृजेत् ॥ नारकी यातना तस्य नैव तत्र मयोदिता ॥४३॥

यमेन पूजितः सम्यक् शिवलोकं व्रजत्यसौ ॥ ताम्बूलं नित्यशो राजन् यो दद्याद्ब्राह्मणाय च ॥४४॥

तस्याहं तु कुरुश्रेष्ठ ददामि श्रियमुत्तमाम् ॥ क्षीरदानं शिशूनां तु स्वर्गलोकप्रदं शुभम् ॥४५॥

मधुतक्रघृतादीनि दधीनि ब्राह्मणाय च ॥ इक्षुक्षीरं गुडं दण्डं ब्राह्मणाय प्रयच्छति ॥४६॥

नालिकेरफलं दद्यात् चैत्रवैशाखमासयोः ॥ रम्भापक्वं पानसञ्च चूतपक्वं नृपोत्तम ॥४७॥

कौबेरं लोकमाप्नोति यमेन परिपूजितः ॥ युगानां त्रिशतं स्थित्वा ततो भूलोकमाप्नुयात् ॥४८॥

सर्वभोगमनुप्राप्य शिवसायुज्यमाप्नुयात् ॥ एलालवङ्गकर्पूरसहितं तुलसीदलम् ॥४९॥

मार्गशीर्षे नृपश्रेष्ठ मरीचं लवणं ददत् ॥ स सुखेन पथा याति स्वर्गलोकमनुत्तमम् ॥५०॥

माघमासं पुरस्कृत्य प्रपां कृत्वा चतुष्पथे ॥ सर्वेषामेव जन्तूनां शीतं पानीयमुत्तमम् ॥५१॥

यो ददाति सदानन्दी तस्य पुण्यमनन्तकम् ॥ शिबिकायां तमारोप्य देवदूताः प्रियंवदाः ॥५२॥

व्यजनानि प्रधुन्वन्तः प्रापयन्ति सुरालयम् ॥ तत्र कोटियुगं स्थित्वा द्विकोटिकुलसंयुतः ॥५३॥

विष्णुलोकमनुप्राप्य तत्रैव परिमुच्यते ॥ कस्तूरिकान्पूरयुतं श्रीगन्धं च द्विजातये ॥५४॥

यो ददाति च वैशाखे सोमलोके सुखी वसेत् ॥ जम्बूफलं कपित्थं च अपूपं भक्ष्यभोज्यकम् ॥५५॥

यो ददाति च वैशाखे ध्रुवलोकमवाप्नुयात् ॥ कृष्णधान्यं यवव्रीहितिलगोधूममुद्गकान् ॥५६॥

चणकं त्वाढकं शाकमूलं भोजनपात्रकम् ॥ सुरलोके चिरं स्थित्वा चक्रवर्तीह जायते ॥५७॥

मल्लिकाचम्पकादीनि पुष्पाणि सुरभीणि च ॥ यो ददाति द्विजेभ्यस्तु स भवेत् सर्वभोगभाक् ॥५८॥

शालिग्रामशिलां रम्यां यो ददाति सदक्षिणाम् ॥ तस्य पुण्यफलं वक्तुं नालं वर्षशतैरपि ॥५९॥

लोकपालादिलोकेषु भोगान् भुक्त्वा मनोरमान् ॥ तदन्ते विष्णुसायुज्यं लभन्त्येव न संशयः ॥६०॥

रत्नान्वितसुवर्णस्य प्रदानेन नृपोत्तम ॥ सर्वत्र सुलभो लोकः सर्वत्र सुखमश्नुते ॥ ६१॥

गवां तृणप्रदानेन सेवया पार्थिवोत्तम ॥ रुद्रलोकमवाप्याथ भूमौ गोधनवान् भवेत् ॥६२॥

सत्यवादी तथा मौनी मृदुभाषी क्षमान्वितः ॥ परोपकारनिरतः सर्वभूतहिते रतः ॥६३॥

परापवादविमुखो वीतरागो विमत्सरः ॥ परस्त्रीसङ्गविमुखो गोब्राह्मणहिते रतः ॥६४॥

न दृष्ट्वा ते यमपुरं गच्छन्ति ब्रह्मणः पदम् ॥ अनाथविप्रान् कृपणान् गतासून् यो दहेन्नृप ॥६५॥
पदे पदेऽश्वमेधस्य फलं प्राप्नोति वा नरः ॥ वृषस्य वृषणं स्पृष्ट्वा शृङ्गमध्ये महेश्वरम् ॥६६॥
दृष्टमात्रान्नरो याति कैलासे शिवमन्दिरम् ॥ एककालं द्विकालं वा त्रिकालं वापि नित्यशः ॥६७॥
शिवदर्शनमात्रेण सर्वपापैः प्रमुच्यते ॥ सर्वसस्यान्वितां भूमिं यो दद्द्ब्राह्मणाय हि ॥६८॥
गृहं मनोरमं कृत्वा भोज्यवृत्तिपुरस्सरम् ॥ यो ददेत् द्विजमुख्याय तस्य पुण्यमनन्तकम् ॥६९॥
भोगान् भुक्त्वा स्वर्गलोके यावदाचन्द्रतारकम् ॥ तदन्ते ब्रह्मसायुज्यं लभते नात्र संशयः ॥७०॥
इत्यादिदाननिरतान् नानाव्रतपरायणान् ॥ यमः सुकृतिनो दृष्ट्वा प्रत्युत्थायानुगैः सह ॥७१॥
कृताञ्जलिपुटस्तेषां सपर्यां कुरुते नृप ॥ धन्या यूयं महात्मानो दानव्रतपरायणाः ॥७२॥
शिवपूजापराश्चैव विष्णुपूजापरायणाः ॥ आत्मनां हितकर्तारो विमानं सूर्यवर्चसम् ॥७३॥
देवयोग्यं समारुह्य गच्छध्वं स्वर्गमद्य वै ॥ वदत्येवं यमस्तान् वै राजन् सुकृतिनः प्रति ॥७४॥
इति तेनाभ्यनुज्ञाताः स्वर्गलोकं प्रयान्ति ते ॥

---

## विष्णुवर्मकथोपसंहारः

सनक उवाच ॥

प्रोक्तः सुकृतिनां मार्गस्तेषां भोगश्च वर्णितः ॥७५॥
भूयोपि त्वं नृपश्रेष्ठ किमन्यच्छ्रोतुमिच्छसि ॥ सनकेनेरितं श्रुत्वा विष्णुवर्मातिहृष्टवान् ॥७६॥
पुनः प्रोवाच तमृषिं कृताञ्जलिपुटस्तदा ॥ स्वामिन्ननुगृहीतोस्मि भवता करुणानिधे ॥७७॥
त्वन्मुखान्निःसृतां वाक्यसुधां पीत्वाऽतिहृष्टवान् ॥ मयाऽकृतानि पापानि न विद्यन्ते हि कुत्रचित् ॥७८॥
तेषां मत्कृतपापानां निष्कृतिश्च कृता भवेत् ॥ मच्छरीरे स्थितो रोगः कथं नश्येत तद्वद ॥७९॥
भवत्प्रसादाद्योगीन्द्र निरोगी च भवाम्यहम् ॥ दानं होमोऽथ वा यात्रा पूजा वा तद्वदस्व मे ॥८०॥

सूत उवाच ॥

इति तद्भाषितं श्रुत्वा योगी वचनमब्रवीत् ॥ श्रूयतां भो नृपश्रेष्ठ येन त्वं नीरुजो भवेः ॥८१॥
भवता कृतपापानि ह्यसङ्ख्यानि नृपोत्तम ॥ एतत्पापविशुद्ध्यर्थं तव रोगनिवारणे ॥८२॥
न हि दानं न होमश्च न पूजा विद्यते क्वचित् ॥ पश्चिमाम्बुधितीरस्थे गोकर्णे क्षेत्रसत्तमे ॥८३॥
कोटितीर्थमिति ख्यातं विद्यते विमलं सरः ॥ कोटिद्रवयुतं पुण्यं मुनिवृन्दोपशोभितम् ॥८४॥
स्नानमात्रेण तत्तीर्थे महापातककोटयः ॥ नश्यन्त्येव न सन्देहो नात्र कार्या विचारणा ॥८५॥

दिनमेकं कोटितीर्थे स्नात्वा भक्तियुतो नृप ॥ प्रभातसमये राजन् पूजयेच्च महाबलम् ॥८६॥
ब्रह्महत्यादियुक्तो वा संयुक्तोप्युपपातकैः ॥ पूर्वं मयोक्तान्नरकान् नैव पश्येत् कदाचन ॥८७॥
पश्चिमाम्बुधितीरस्थं गोकर्णं क्षेत्रमुत्तमम् ॥ ब्रह्महत्यादिपापानि दहत्येव न संशयः ॥८८॥
महाबलाभिधानेन आस्ते तत्र वृषध्वजः ॥ पुरा तु विघसो नाम ब्राह्मणो मध्यदेशजः ॥८९॥
ब्रह्महत्यादिपापानि कृतवान् बहुशो नृप ॥ तेन चाकृतपापानि न सन्ति धरणीतले ॥९०॥
भ्रान्तो बभ्राम जगतीं भृगुवाक्यात् ततो द्विजः ॥ गोकर्णक्षेत्रमासाद्य माघमासे नृपोत्तम ॥९१॥
प्रातः स्नात्वा कोटितीर्थे पूजयित्वा महाबलम् ॥ ब्राह्मणान् भोजयामास निराहारो द्विजोत्तमः ॥९२॥
सर्वपापविनिर्मुक्तश्चान्ते स्वर्गमावाप्तवान् ॥ भो राजन् तव देहस्य यदि त्वं सुखमिच्छसि ॥९३॥
गोकर्णं क्षेत्रमासाद्य मासमेकं नरोत्तम ॥ प्रातः स्नात्वा कोटितीर्थे पूर्वोक्तं दानमाचर ॥९४॥
महाबलं पूजयेस्त्वं तव रोगो विनश्यति ॥ नश्यन्ति सर्वपापानि निरयान्नैव पश्यसि ॥९५॥
स्वस्थः स्वराज्यमासाद्य रञ्जयस्व स्वकाः प्रजाः ॥ धर्मेण मेदिनीं रक्ष वेदशास्त्ररतो भव ॥९६॥
देवान् द्विजान् समभ्यर्च्य स्वस्थो भव नृपोत्तम ॥ पुत्रैः पौत्रैश्च सहितो भुक्त्वा भोगाननेकशः ॥९७॥
देहान्ते सुरलोकं च प्राप्स्यसे नात्र संशयः ॥ सन्देहो नात्र कर्तव्यः सत्यं सत्यं वदाम्यहम् ॥९८॥
इत्युक्त्वा सनको योगी पूजितस्तेन भूभुजा ॥ यथाकामं जगामासौ योगी त्रैलोक्यपूजितः ॥९९॥
ततः स राजा मुदितो गते योगिनि भूमिप ॥ गोकर्णं च तदा गन्तुं सामात्यः सपुरोहितः ॥१००॥
हस्त्यश्वरथपादातिचतुरङ्गबलान्वितः ॥ गोकर्णाभिमुखो राजा प्रतस्थे ह्यतिलालसः ॥१०१॥
क्षिप्रं सम्प्राप्य गोकर्णं माघादौ क्षेत्रमुत्तमम् ॥ प्रातः स्नात्वा कोटितीर्थे पूजयित्वा महाबलम् ॥१०२॥
यथोक्तं योगिना तेन तथा च कृतवान्नृपः ॥ व्यतीत्य माघमासं सः गोकर्णे राजकुञ्जरः ॥१०३॥
सर्वतीर्थेषु च स्नात्वा सर्वलिङ्गानि पूज्य च ॥ निष्कल्मषश्च निरुजः स्वपुरं प्राप हृष्टधीः ॥१०४॥
यथा जीर्णत्वचं त्यक्त्वा राजते वायुभोजनः ॥ शुक्लपक्षे यथा चन्द्रो मेघमुक्तो यथा रविः ॥१०५॥
तथा बभौ नृपश्रेष्ठः सर्वरोगविवर्जितः ॥ प्रजाः शशास धर्मेण धर्मराज इवापरः ॥१०६॥
देवब्राह्मणपूजां च सदाऽसौ कुरुते नृपः ॥ सत्पात्रे दानशीलश्च ईजे सर्वान् महाक्रतून् ॥१०७॥
पौरा बभूवुः संहृष्टाः पुत्रपौत्रसमन्विताः ॥ भोगान् भुक्त्वा बहुविधान् भार्यया सह पार्थिवः

।।१०८।।

पुत्रपौत्रैः परिवृतो देवब्राह्मणसेवकः ॥ अन्ते विमानमारुह्य दिव्यस्त्रीगणसेवितः ॥१०९॥
गन्धर्वैर्गीयमानस्तु देवलोकं ययौ नृपः ॥ एतत्ते सर्वमाख्यातं भूपते परिपृच्छते ॥११०॥
कोटितीर्थस्य माहात्म्यं श्रुतमात्राघनाशनम् ॥ सर्वरोगहरं पुण्यं भूयः किं श्रोतुमिच्छसि ॥१११॥
य इह पठति नित्यं कोटितीर्थस्य पुण्यं सकलदुरितनाशं भाग्यदं तन्महात्म्यम् ॥
स खलु भुवि विशुद्धो भोगमिष्टं च लब्ध्वा तदनु शिवपुरं सः प्राप्नुयात् पुण्यलभ्यम् ॥११२॥
इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे पुण्यलोकविस्तार कोटितीर्थमाहात्म्यं नाम पञ्चषष्टितमोऽध्यायः ॥६५॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ६६ ॥  NEXT>>  श्लोक संख्या–४०

## ॥ क्षेत्रविधिः त्रयस्त्रिंशत्तीर्थनामानि स्नानविधि वर्णनम् ॥

### गोकर्णयात्राविधिः

शौनक उवाच ॥

आदौ प्राप्नोति गोकर्णं यात्रार्थं सूत नन्दन ॥ किं कार्यं पुरुषैः स्त्रीभिरेतन्नो वक्तुमर्हसि ॥१॥

सूत उवाच ॥

गोकर्णयात्राभिरतो नारी वा पुरुषोपि वा ॥ ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वाऽपि नरोत्तमः ॥२॥
उपोषितो मुण्डितश्च स्नात्वा श्राद्धं समाचरेत् ॥ यदा प्राप्नोति गोकर्णं यो वा को वाऽपि मानवः ॥३॥
मुण्डनं चोपवासं च स्नात्वा कुर्वीत मानवः ॥ गयायां भास्करक्षेत्रे चौले चैवोपनायने ॥४॥
श्रीशैले यज्ञदीक्षायां प्रायश्चित्तव्रतेषु च ॥ महागुरुमृतौ चैव महास्वामिमृतौ तथा ॥५॥
जीवत्पिता तु कुर्वीत वपनं श्राद्धमेव च ॥ संवत्सरे द्विमासोने पुनः क्षेत्रं विशेद्यदि ॥६॥
क्षौरोपोषणकादीनि कुर्यादेव न संशयः ॥ पश्चिमाम्बुधितीरस्थं गोकर्णं क्षेत्रमुत्तमम् ॥७॥
रुद्रेणाधिष्ठितं पुण्यं भास्करक्षेत्रमुच्यते ॥ पर्वताग्रे नदीतीरे ब्रह्मविष्णुशिवैः श्रिते ॥८॥
दुर्गादिबाहुलेयाद्यैस्तद्भास्करमितीर्यते ।। काशी पुष्पगिरिः काञ्ची निवृत्ताख्या अलम्पुरी ।९॥
श्रीशैलः श्रीविरूपाक्षः सेतुः केदार एव च ॥ गोकर्णं च दशैतानि भास्कराण्याहुरुत्तमाः ॥ १०॥

आदौ स्नात्वा कोटितीर्थे स्थापयेद्ब्रह्मदण्डकम् ॥ क्षौरं कृत्वा विधानेन स्नानं दशविधं चरेत् ॥११॥
भस्मगोमयमृद्वारिपञ्चगव्यं तथैव च ॥ मलापकर्षणं चैव स्नानं दशविधं स्मृतम् ॥१२॥
एवं स्नात्वा विधानेन श्राद्धं कृत्वा विधानतः ॥ ततः समुद्रे विधिवत् स्नानं कुर्याद्यथाविधि ॥१३॥
पृथिव्यां यानि तीर्थानि समुद्रं प्रविशन्ति हि ॥ तस्मात् समुद्रो ह्यधिकः स्नानमात्राद्विमुक्तिदः ॥१४॥

सेतौ सिन्धौ सरस्वत्यां गोकर्णे पुरुषोत्तमे ॥ उदन्वदम्भसि स्नानं सार्वकालं विधीयते ॥१५॥
अन्येषु सर्वक्षेत्रेषु पर्वणि स्नानमाचरेत् ॥ प्रातःकाले ह्यन्यदिने सागरं न स्पृशेत् क्वचित् ॥१६॥
गोकर्णे नृपशार्दूल सिन्धुस्नानं सदा चरेत् ॥ पिप्पलञ्च कविं कण्वं कृतान्तं जीवितेश्वरम् ॥१७॥
मन्युञ्च कालरात्रिञ्च विद्यां दुर्गां गणाधिपम् ॥ देवानृषीन् पितॄंश्चैव तर्पयित्वा विधानतः ॥१८॥
पुनः स्नानञ्च कृत्वैव ब्राह्मणेभ्यो यथाविधि ॥ गोभूतिलहिरण्यादिदानं दद्यात् सदक्षिणम् ॥१९॥
पितृस्थालीं समासाद्य पितॄणां पिण्डदो भवेत् ॥ तत्र पिण्डप्रदानेन पितरः सर्व एव हि ॥२०॥
सद्यः प्रयान्ति वै स्वर्गं कुलकोटिसमन्विताः ॥ स्नात्वा रुद्रपदे सम्यगर्चयित्वा महाबलम् ॥२१॥
शृणुयात् तीर्थमाहात्म्यं कुर्याच्च निशि जागरम् ॥ ब्राह्मणान् भोजयेत् पश्चात् स्वयं भुञ्जीत वाग्यतः ॥२२॥
ततः सर्वेषु तीर्थेषु स्नात्वा तल्लिङ्गमर्चयेत् ॥ त्रयस्त्रिंशत्सु तीर्थेषु त्रयस्त्रिंशद्दिनेषु च ॥२३॥
ऐकैकं दिवसं स्थित्वा कुर्यादेवं विधिः स्मृतः ॥

---

## त्रयस्त्रिंशत् तीर्थानि

तीर्थानाञ्च त्रयस्त्रिंशत्तेषां नामानि मे शृणु ॥२४॥
१गोकर्णं २गुहतीर्थाख्यं ३ताम्रगौर्यभिधासरित् ॥
४गायत्रञ्च तथा ५चान्द्रं ६ब्रह्मकुण्डं ततः परम् ॥२५॥
७विश्वामित्रं८सङ्गमञ्च९चक्रं१०कापिलमुत्तमम् ॥
११अरण्यं १२अग्नितीर्थञ्च १३वैनायकमतः परम् ॥२६॥
१४कौबेरं १५नादतीर्थञ्च १६पश्चात् सांवर्तकं शुभम् ॥
१७आदित्यतीर्थञ्च शुभं १८मार्कण्डेयं १९अघापहम् ॥२७॥
२०दुर्गाकुण्डं २१नागतीर्थं २२कोटितीर्थमतः परम् ॥

२३उन्मज्जनं महातीर्थं २४नदी वैतरणी तथा ॥२८॥
२५अशोकपञ्चकं २६पश्चाद् गङ्गाधारमतः परम ॥
२७भीमकुण्डं २८तथाऽगस्त्यं २९वसिष्ठं ३०गारुडं तथा ॥२९॥
३१मालिन्याख्या नदी शुक्ला ३२शिंशुमारमथोच्यते ॥
३३एकबिन्द्वादिबिन्दूनां चतुष्कन्त्वेकमुच्यते ॥३०॥
एतान्येकैककोटीनां तीर्थानां नायकानि तु ॥

---

ब्रह्माण्डकोटितीर्थानि करस्पृष्टानि ते प्रभो ॥३१॥
तेन सत्येन गोकर्णे तीर्थेष्वावाहितो भव ॥ इमं मन्त्रं समुच्चार्य कोटितीर्थादिषु क्रमात् ॥३२॥
स्नानं कुर्याद्यथान्यायं सर्वतीर्थेषु भारत ॥ आदौ कृतयुगे तानि स्वरूपाण्याश्रयन्ति हि ॥३३॥
त्रेतायां स्थाणुभूतानि द्वापरे गोमयानि च ॥ पश्चिमं युगमासाद्य दृश्यादृश्यं भवन्ति च ॥३४॥
अशक्तः सर्वतीर्थानामभिषेकेषु मानवः ॥ अष्टतीर्थाभिषेकेण फलं सर्वमवाप्नुयात् ॥३५॥
गोकर्णं गुहतीर्थं च ताम्रगौरी च निम्नगा ॥ गायत्री कोटितीर्थञ्च ब्रह्मकुण्डमतः परम् ॥ ३६॥
रामतीर्थं सङ्गमञ्च अष्टतीर्थान्यनुक्रमात् ॥ एवं सर्वेषु तीर्थेषु गोकर्णस्थेषु पार्थिव ॥३७॥
स्नात्वा यथाक्रमं मर्त्यो तत्तल्लिङ्गं समर्चयेत् ॥ एवं गोकर्णमासाद्य क्षेत्रविध्यादिकं नृप ॥३८॥
यः करोति नरो भक्त्या तस्य पुण्यमनन्तकम् ॥ इह भुक्त्वा महाभोगान् शिवलोकं व्रजेदसौ ॥३९॥
यत्पृष्टं भवता राजन् तदुक्तञ्च मयाधुना ॥ इतः परं महाराज किमन्यच्छ्रोतुमिच्छसि ॥४०॥
इति श्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे क्षेत्रविधिवर्णनं नाम षट्षष्टितमोऽध्यायः ॥६६॥

## ॥ कपिलतीर्थम् ॥

शतानीक उवाच ॥

शंस मे कापिलं तीर्थमुत्पत्तिं तस्य चैव हि ॥ अरण्यतीर्थस्य विभो शंस नादेश्वरं प्रभो ॥ १॥
अशोकस्याश्रमं ब्रूहि लिङ्गं तीर्थं तथैव हि ॥ अन्येषां चैव सर्वेषां तीर्थानां सूतनन्दन ॥ २॥
उत्पत्तिञ्चैव माहात्म्यं विस्तराद्वक्तुमर्हसि ॥

सूत उवाच ॥

शृणु राजन् प्रवक्ष्यामि यत्पृष्टोहमिह त्वया ॥३॥

तीर्थानां चैव सर्वेषां प्रभावं जन्म भारत ॥ कपिलस्य च तीर्थस्य शृणु पूर्वमरिन्दम ॥४॥

पूर्वं कृतयुगे राजन् ग्रहणं भास्करस्य च ॥ राहुणा राजशार्दूल नक्षत्रे श्रवणाह्वये ॥५॥

पुष्यमासि च भद्रन्ते अमायाञ्चाभवन्नृप ॥ आजग्मुः सर्वलोकास्तु गोकर्णं प्रति सुव्रत ॥ ६॥

इतस्ततोऽनुधावन्ति प्रजा राजन् चतुर्विधाः ॥ देवासुरमनुष्याश्च गन्धर्वाप्सरसस्तथा ॥ ७॥

नागाः पिशाचा यक्षाश्च पशुपक्षिसरीसृपाः ॥ अगमंस्तत्र भूतानि सर्वाणि भरतर्षभ ॥८॥

ग्रहणं दृष्टुकामा हि गोकर्णे तीर्थसत्तमे ॥ तस्मिन् काले हरो देव्याः सहितः समुपेयिवान् ॥९॥

तं दृष्ट्वा समितिं राजन् गौरी शङ्करमब्रवीत् ॥ किमिदं देव देवेश भूतानां समितिः कृता ॥१०॥

किमर्थं वै महादेव अत्रागच्छन्ति वै प्रजाः ॥ तामुवाच महादेवो वियतिस्थः प्रियां शिवाम् ॥११॥

अद्यापराह्ने ग्रहणं भविष्यति वरानने ॥ सूर्यस्य देवि तं दृष्टुमागच्छन्ति च वै प्रजाः ॥१२॥

स्नात्वा सम्पूज्य मां भक्त्या ये पश्यन्ति विभावसुम् ॥ ग्रस्तं तु राहुणा देवि न तेषामस्ति दुर्गतिः ॥१३॥

मत्प्रसादेन गच्छन्ति मृताः स्वर्गं न संशयः ॥ तस्मादितस्ततो भद्रे प्रजा देवि चतुर्विधाः ॥ १४॥

आगच्छन्त्यनिषं तेषां समूहो देवि सत्तमे ॥ ततो गौरी शिवं नत्वा विस्मिता वाक्यमब्रवीत् ॥ १५ ॥

एते स्वर्गं गमिष्यन्ति सर्वे यदि महेश्वर ॥ नावकाशं ततस्तत्र भवेदिति मतिर्मम ॥१६॥

ततः प्रहस्य भगवान् शङ्करो भरतर्षभ ॥ अब्रवीद्गिरिजां देवो मधुरं वचनं हरः ॥१७॥

सर्वे स्वर्गं गमिष्यन्ति नात्र कार्या विचारणा ॥ पर्यायेण यथाकर्म तथा प्राप्स्यन्ति स्वर्गतिम् ॥१८॥

निरयं वा महाभागे पुण्यपापप्रकर्षणात् ॥ मध्ये तेषां गमिष्यन्ति त्रयो निर्वाणमेव हि ॥१९॥

नान्ये गच्छन्ति वै स्वर्गं तामसा भक्तिवर्जिताः ॥ तेषामल्पतरा सिद्धिः कायक्लेशाद्भविष्यति ॥२०॥

तीर्थानि देवताश्चापि भक्त्या तुष्यन्ति नान्यथा ॥ तस्मात् सिद्धिकरा भक्तिर्भक्तिहीनस्तु यो नरः ॥२१॥

फलं न लभते देवि नात्र कार्या विचारणा ॥ स्वर्गापवर्गफलदा भक्तिरेव शुभानने ॥२२॥

देवी कुतूहलेनाथ ह्यपृच्छच्छङ्करं मुदा ॥ तन्मे शंस जगन्नाथ मोक्षं गच्छन्ति ये प्रभो ॥ २३॥

ततस्तामब्रवीद्देवो दृश्यतामिति सादरम् ॥ वृषो भूत्वा महादेवो गौरीमिदमुवाच ह ॥ २४॥

भव त्वं कपिला देवि एहि भूमिं शुभानने ॥ इत्युक्त्वा तौ नृपश्रेष्ठ मिथुनं कर्दमाम्भसि ॥२५॥
अर्धलग्नमभूद्राजन् मार्गे तेषां नृपोत्तम ॥ तं देशमगमत् कश्चित् पुरुकुत्स इति द्विजः ॥२६॥
सार्धं जनैर्बहुविधैर्मिथुनं तद्ददर्श ह ॥ दृष्ट्वा तत्प्राह तान् विप्रः कृपयातिपरिप्लुतः ॥२७॥
इदं गोमिथुनं लग्नं पङ्के महति पश्यत ॥ उद्धृत्येदं वयं सर्वे पश्चाद्यास्यामहे जनाः ॥२८॥
नेच्छंस्ततस्ते राजेन्द्र कालातिक्रान्तिशङ्कया ॥ गतास्ते राजशार्दूल पुरुकुत्सं विहाय वै ॥२९॥
पुरुकुत्सोऽपि मतिमान् कर्दमं तं विवेश ह ॥ प्रविश्योद्धर्तुकामस्तु महद्यत्नं समारभत् ॥३०॥
शक्तो न तस्माद्राजेन्द्र यत्नवानपि स द्विजः ॥ उद्धर्तुं चालितुं वापि ततो दुःखमुपागमत् ॥३१॥
तस्मिंस्तथा वर्तमाने आत्रेयो नाम वै द्विजः ॥ सार्थेन महता सार्धं ततस्तं देशमागमत् ॥३२॥
तं दृष्ट्वा पुरुकुत्सस्तु आहूयेदमभाषत ॥ इदं गोमिथुनं लग्नं पङ्के महति पश्यत ॥३३॥
इदमुद्धृत्य वेगेन यास्यामः सहिता वयम् ॥ आत्रेये तु तथेत्युक्ते अन्ये नैच्छन्त तद्वचः ॥३४॥
यथेष्टं वै गतास्ते हि आत्रेयः प्रविवेश ह ॥ ततस्तौ द्विजशार्दूलौ यत्नवन्तौ बभूवतुः ॥३५॥
अशक्तवन्तौ राजेन्द्र ततो दुःखमुपागतौ ॥ ततः पुनरमेयात्मा सुहोत्रो नाम वै द्विजः ॥ ३६॥
धर्मज्ञः शीलवान् राजन् स तं देशमुपागमत् ॥ महत्या त्वरया युक्तो दृष्टुं ग्रस्तं विभावसुम्
॥३७॥
सैंहिकेयेन भद्रंते राहुणा राजसत्तम ॥ द्विजैः परिवृतः सोऽथ ददर्श महदद्भुतम् ॥३८॥
लग्नं पङ्के गोमिथुनं तदुद्धारे द्विजोत्तमौ ॥ कृपया परयाविष्टस्तस्मिन्नेव पपात ह ॥३९॥
सुहोत्रः पुरुकुत्सश्च आत्रेयश्च महायशाः ॥ ते च गोमिथुनं तस्मात् उद्धृत्य नृपपुङ्गव ॥४०॥
अपङ्कं देशमानीय विससर्जुर्द्विजोत्तमाः ॥ सम्मृज्य हस्तौ चाङ्गानि सान्त्वयन्तश्च ते द्विजाः ॥ ४१ ॥
हे मात इति ते विप्रा ऊचुः पितरिति द्विजाः ॥ तैः सान्त्वमानो भगवान्नीलकण्ठ उमापतिः ॥४२॥
प्रत्यक्षमगमत्तेषां देव्या सार्धं महामते ॥ उद्धृत्य तान् द्विजवरान् स्वीचकार तनौ शिवः ॥ ४३॥
ते प्रविश्य महादेवं मुक्तेः स्थानमनुत्तमम् ॥ तस्मिन्निर्वाणमापन्ना ईश्वरास्ते बभूविरे ॥४४॥
यत्र गोमिथुनं लग्नं तीर्थं तत् कापिलं विदुः ॥ तत्र स्नात्वा नरो भक्त्या अश्वमेधफलं लभेत्
॥४५॥
त्रिजन्मचरितं पापमल्पं वा यदि वा बहु ॥ श्रावणे पुष्यमासे वा स्नानमात्रेण नश्यति ॥४६॥
मासिभाद्रपदे कृष्णे षष्ठी भौमार्कसंयुता ॥ रोहिणीपातयुक्ता चेत् सा षष्ठी कपिला स्मृता ॥४७॥
तस्मिन् काले नृपश्रेष्ठ तीर्थे कपिलसञ्ज्ञके ॥ स्नानं कुर्वन्ति ये भक्त्या ते भवाब्धिं तरन्ति वै

॥४८॥

कापिलस्य तु तीर्थस्य माहात्म्यं यः शृणोति च ॥ पापकञ्चुकमुत्सृज्य स याति परमां गतिम्

॥४९॥

इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे कपिलतीर्थवर्णनंनाम सप्तषष्टितमोऽध्यायः ॥६७॥

अध्यायाः अकारादि <<BACK ॥ अध्यायः ६८ ॥ NEXT>> श्लोक संख्या–५७

## ॥ अरण्यतीर्थ – नादेश्वरमहिमानुवर्णनम् ॥

### अरण्यतीर्थम्

सूत उवाच ॥

अरण्यतीर्थस्य विभो प्रभावं शृणु पार्थिव ॥ अरण्यो नाम राजासीत् पुरा कृतयुगे महान् ॥१॥

चिरं राज्यश्रियं भुक्त्वा विषयाननुभूय सः ॥ ततो विरक्तो भोगेषु तपसे कृतमानसः ॥२॥

पुत्रे राज्यधुरं न्यस्य ययौ गोकर्णनामकम् ॥ क्षेत्रं भरतशार्दूल अरण्यो नृपसत्तमः ॥३॥

तत्राश्रमपदं कृत्वा तपस्तेपे सुदुश्चरम् ॥ तपसा महता तस्य तुतोष भगवान् हरः ॥४॥

प्रत्यक्षमगमत् तस्य वचनं चेदमब्रवीत् ॥ प्रसन्नं विद्धि मां राजन् ददाम्यभिमतं तव ॥५॥

यत्ते नृपवर ब्रूहि वरं मत्तोऽभिकाङ्क्षसि ॥ ततः प्रणम्य राजर्षिर् देवदेवमुमापतिम् ॥६॥

प्राहेदं तमदीनात्मा प्रीतं दृष्ट्वा महेश्वरम् ॥ सिद्धिमिच्छामि देवेश गुह्यामपि च देहि मे ॥७॥

तीर्थं चेदं नृपश्रेष्ठ सर्वपापहरं भवेत् ॥ इत्युक्तस्तेन तं देवस्तथाऽस्त्वित्यब्रवीद्वचः ॥८॥

इति दत्वा वरं तस्मै शङ्करोन्तरधीयत ॥ अरण्यो राजशार्दूलस्तत्र सिद्धः सनातनः ॥९॥

तन्नाम्ना चाभवत् ख्यातं तीर्थं त्रैलोक्यपावनम् ॥ अरण्यतीर्थमारण्यमाश्रमं च महोदयम् ॥१०॥

कापिलस्य तु तीर्थस्य दक्षिणेन कुरूद्वह ॥ अभवच्छरपातात्तु पवित्रं पापनाशनम् ॥११॥

तत्र स्नात्वा नरो राजन्नग्निष्टोमफलं लभेत् ॥ माघमासे तु पौर्णम्यां स्नानं तत्र विशिष्यते ॥१२॥

आजन्मचरितं पापं तत्र स्नानाद्विनश्यति ॥ पितृनुद्दिश्य यस्तत्र ददाति च जुहोति च ॥१३॥

तदक्षयं पितृणां हि भविष्यति न संशयः ॥

---

नादेश्वर

ततः परं कुरुश्रेष्ठ शृणु नादेश्वरं परम् ॥१४॥

सुनादो नाम विप्रेन्द्रः पूर्वं स्वारोचिषेन्तरे ॥ असौ पातालमगमत् सुतलं नाम भारत ॥१५॥

स महात्मा महाबुद्धिः कामचारी द्विजोत्तमः ॥ सुतले विचरन् सोथ ददर्श परमेश्वरम् ॥१६॥

लिङ्गमूर्तिधरं साक्षाज्ज्वलन्तं स्वेन तेजसा ॥ सूर्यानलसमं राजन्नमृतस्यन्दिनं सदा ॥१७॥

अङ्गुष्ठमात्रं तल्लिङ्गं दृष्ट्वा विस्मयमागतः ॥ मणिनागस्य भद्रन्ते तस्य वेश्मनि भारत ॥१८॥

सुनादस्तं नागराजमभ्यगच्छन्महातपाः ॥ मणिनागोऽपि तं दृष्ट्वा अभ्युत्थायासनं ददौ ॥१९॥

पूजयामास तं सम्यगर्घ्यपाद्यादिभिर्नृप ॥ उवाच तं द्विजश्रेष्ठं स्वागतं ते द्विजोत्तम ॥२०॥

किं मया कार्यमित्येतद्ब्रूहि तद्वितराम्यहम् ॥ सुनादस्तं नागराजमब्रवीत् प्रीतिसंयुतः ॥२१॥

किमिदं ते नागराज तेजसा ज्वलते महत् ॥ लिङ्गमूर्तिधरः साक्षान्नीलकण्ठ इवापरः ॥२२॥

तच्छ्रुत्वा नागराजस्तु वचनं ब्राह्मणस्य हि ॥ तं प्रणम्य महाभागमिदं वचनमब्रवीत् ॥२३॥

श्रूयतां द्विजशार्दूल सर्वदेवमयं त्विदम् ॥ अमृते मथ्यमाने तु सम्भूतं लिङ्गमुत्तमम् ॥२४॥

सार्धं वस्तुभिरन्यैस्तु बहुभिर्द्विजसत्तम ॥ एकैकं जगृहुस्तस्मात् सुरसिद्धादयस्तदा ॥२५॥

अश्वं चाप्सरसश्चैव नागराजमतः परम् ॥ अगृह्यदिन्द्रो भगवन् ब्रह्मोङ्कारमगृह्णत ॥२६॥

लक्ष्मीश्च कौस्तुभं रत्नं गृहीतं विष्णुना प्रभो ॥ बालेन्दुश्च विषं चोग्रं गृहीतं तत्र शम्भुना ॥२७॥

एवं समस्तभूतानि स्वं स्वं भागमगृह्णत ॥ ततः पिता मे भगवान् काश्यपस्तपसां निधिः ॥२८॥

जग्राहेदं तदा दिव्यं लिङ्गं मणिमयं शुभम् ॥ आराधयामास चिरं पिता मम महातपाः ॥२९॥

अनन्यदुर्लभां विप्र सिद्धिमाप च कश्यपः ॥ तस्मिन् प्रत्यक्षमगमच्छिवः साक्षात् सनातनः ॥३०॥

प्रीतः काश्यपमाहेदं भगवान् वृषभध्वजः ॥ सिद्धिं प्राप्नोषि भगवन् किं भूयस्ते ददाम्यहम् ॥३१॥

ततस्तु काश्यपो राजन् प्रणिपत्य कृताञ्जलिः ॥ उवाच वचनं श्लक्ष्णं प्रसन्नं गोवृषध्वजम् ॥३२॥

अस्मिन् लिङ्गे भवान् देव नित्यं भवितुमर्हति ॥ सान्निध्यमेव ते देव वरमेतद्वृणोम्यहम् ॥३३॥

यदि प्रसन्नो भगवन् तन्मह्यं दातुमर्हसि ॥ तच्छ्रुत्वा वचनं तस्य देवदेव उमापतिः ॥३४॥

तथास्त्विति वरं दत्वा सान्निध्यमकरोत् प्रभुः ॥ तस्मिन् मणिमये लिङ्गे रमते च महेश्वरः ॥३५॥

तन्मह्यमददाद्विप्र पिता प्रीतेन चेतसा ॥ उक्तं च ददता तेन इदं पित्रा महात्मना ॥३६॥

सुनादो नाम वै विप्रो यदाऽऽगन्ता गृहं तव ॥ तदा तस्मै प्रदातव्यमिदं मणिमयं शिवम् ॥३७॥

यावन्न याचते लिङ्गं तावत्तुभ्यं महाद्युते ॥ संसिद्धिं दास्यति विभो गृहीत्वा लिङ्गमुत्तमम् ॥३८॥

एवमुक्तं काश्यपेन पित्रा मम महात्मना ॥ तस्माद्गृहाण विप्रेन्द्र प्रसीद सुमुखो भव ॥३९॥

सूत उवाच ॥

ततः सुनादो भगवान् काश्यपस्यात्मसम्भवात् ॥ तद्गृहीत्वा महालिङ्गं दिव्यं मणिमयं शुभम् ॥४०॥
प्रीतः प्रसन्नमनसा अहीश्वरमभाषत ॥ वरं ब्रूहि महाभाग मनसा यद्यदिच्छसि ॥४१॥
दातास्मि ते नागराज यद्यपि स्यात् सुदुर्लभम् ॥ ततः प्रणम्य तन्नाग इदं वचनमब्रवीत् ॥४२॥
परं ज्ञानं परां सिद्धिं परमार्थं च सत्तम ॥ इच्छामि त्वत्प्रसादेन तन्मह्यं दातुमर्हसि ॥४३॥
तच्छ्रुत्वाऽथ सुनादोपि नागराजमभाषत ॥ याचितं यत्त्वया नाग तत्सर्वं ते भविष्यति ॥४४॥
इत्युक्त्वा तं सुनादोपि ययौ स्वैरगतिर्द्विजः ॥ सुतलान्निर्गतः सोऽथ गोकर्णं समुपागमत् ॥४५॥
आगत्य तत्र विप्रेन्द्रः कृत्वाश्रमपदं शुभम् ॥ आराधयामास विभोर् लिङ्गं तदमृतोद्भवम् ॥४६॥
आराध्य सुचिरं कालं तपसा महता नृप ॥ प्रत्यक्षीकृत्य लोकानामीशानं प्रत्यभाषत ॥४७॥

सुनाद उवाच ॥

लयमिच्छामि देवेश त्वय्येवेत्यब्रवीद्वचः ॥ ततो महेश्वरस्तस्मै ददौ सायुज्यमात्मनि ॥४८॥
ततः सुनादो भगवान् स्वयमेव शिवोऽभवत् ॥ नादेश्वरमिति ख्यातं तल्लिङ्गं भरतोत्तम ॥४९॥
अधस्तादवने राजन्निदानीं तत्र वर्तते ॥ ताड्यमाने पदा तत्र नादयत्यवनीतलम् ॥५०॥
असिद्धास्तन्न पश्यन्ति सिद्धाः पश्यन्ति तं नृप ॥ तीर्थं तत्र तु तस्यैव नादतीर्थमिति श्रुतम् ॥५१॥
अस्ति पुण्यप्रदं राजन् सर्वकामप्रदं नृणाम् ॥ कार्तिके शुक्लपक्षे तु एकादश्यां नृपोत्तम ॥५२॥
तत्र स्नात्वाऽश्वमेधस्य फलं विन्दति मानवः ॥ आजन्म चरितं पापं तत्र स्नानाद्विनश्यति ॥५३॥
दृष्टमात्रे तु तल्लिङ्गे स्वर्गं गच्छन्ति देहिनः ॥ विधूय सर्वपापानि ब्रह्महत्यादिकान्यपि ॥५४॥
नावकाशमभूत् स्वर्गे देवानामवनीपते ॥ सञ्चिन्त्य देवैर्मुनिभिर्गोपितं तदभूद्भुवि ॥५५॥
तदेतत् कोटितीर्थस्य उदीच्यां दिशि विद्यते ॥ शरपाते कुरुश्रेष्ठ सुनादस्याश्रमं शुभम् ॥५६॥
नादेश्वरस्य माहात्म्यं ये शृण्वन्ति नरा भुवि ॥ विधूय सर्वपापानि निरुजः स्युः सदा नृप ॥५७॥
इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे अरण्यतीर्थनादेश्वरमहिमानुवर्णनंनाम
अष्टषष्टितमोऽध्यायः ॥६८॥

अध्यायाः अकारादि <<BACK ॥ अध्यायः ६९ ॥ NEXT>> श्लोक संख्या–५०
॥ अशोक पञ्चक महिमानुवर्णनम् ॥

## ।। अशोकपञ्चकम् ।।

सूत उवाच ।।

अतः परमशोकस्य तीर्थं शृणु कुरूद्वह ।। अशोको नाम राजर्षिः प्लक्षद्वीपाधिपः पुरा ।।१।।
पौत्रो मेधातिथेश्चैव पुत्रः पारावतस्य च ।। तस्य चासीत् पुत्रशतमशोकस्य महात्मनः ।। २।।
तेषामपि माहावीर्या पुत्रपौत्रादिसन्ततिः ।। सन्तत्या सहितो राजा रमते शाश्वतीः समाः ।। ३।।
कन्याशतं च तस्यासीत् अशोकस्य महात्मनः ।। तासां पुत्रैश्च पौत्रैश्च स देशः समपूर्यत ।।४ ।।
स तैः सर्वैः परिवृतो बुभुजे विषयान् प्रियान् ।। रञ्जनात् सर्वलोकानां राजासीत् पृथिवीपतिः
।।५।।
अक्षोहिण्यो नृपस्यासन् बह्व्यस्तस्य वशानुगाः ।। ततः शत्रुरभूत्तस्य सुमतिर्नाम पार्थिवः ।। ६।।
सुमतेश्चापि राजेन्द्र बलं दशगुणं ह्यभूत् ।। सेनाभिर्बहुभिः सार्धं सुमतिः क्षत्रियर्षभः ।।७।।
अशोकस्य पुरीं रुध्वा तेन राज्ञा महत्तरम् ।। युद्धं चकार सुचिरमशोकेन महात्मना ।। ८।।
अहिंसयित्वा नृपतिमशोकं पार्थिवोत्तमम् ।। सेनां विनाशयामास पुत्रपौत्रादिभिः सह ।।९।।
ततः सन्त्यज्य सर्वाणि वस्तूनि स नृपोत्तमः ।। सशोकः स्वपुरं राज्यं विहायैको महामनाः ।।१० ।।
अश्वरत्नं समारुह्य वलक्षं भरतर्षभ ।। अग्नेः प्रसादाल्लब्धं तु वायुवेगं तु कामगम् ।।११।।
तेनाश्वेनागतो राजा जम्बुद्वीपं प्रति प्रभो ।। विहाय तानि वर्षाणि भारतं खण्डमागतः ।।१२।।
कर्मभूमिरियं राजन् भोगमोक्षप्रदायिका ।। श्रेष्ठमत्रापि गोकर्णं क्षेत्राणामुत्तमोत्तमम् ।।१३।।
तद्विदित्वा महाराजा गोकर्णं समुपागमत् ।। शतशृङ्गगिरिं प्राप्य देवगन्धर्वसेवितम् ।।१४।।
पितामहानां राजेन्द्रस्तत्र दृष्ट्वाश्रमं शुभम् ।। चतुरश्चात्मनश्चैव तत्र दृष्ट्वा पितामहान् ।।१५।।
प्रियव्रतस्य पुत्रास्ते अशोकस्य पितामहाः ।। मुक्तिकामास्तपस्यन्तो भ्रातरस्ते नृपोत्तम ।।१६।।
दृष्ट्वा ते भ्रातरः पौत्रमाशीर्भिरभिनन्द्य च ।। तैः पूजितः स राजर्षिः स्ववृत्तान्तं न्यवेदयत् ।।१७।।
तच्छ्रुत्वा वचनं ते वै पौत्रस्य नृपसत्तम ।। ते तमूचुः कृपाविष्टा अशोकं शोकसंयुतम् ।।१८।।
आराधय महादेवं महता तपसा सुत ।। अत्रस्थस्त्वं नृपश्रेष्ठ स ते शोकं प्रहास्यति ।।१९।।
व्रतैर्बहुविधै राजन् रुद्रोक्तैः सर्वकामदैः ।। स ते मनोरथान् राजन् प्रदास्यति न संशयः ।।२०।।

सूत उवाच ।।

अशोकस्तु तथेत्युक्त्वा कृत्वाश्रमपदं शुभम् ।। व्रतोपवासनिरतो यथा चोक्तं पितामहैः ।। २१।।
तथा चकार स तपः शिवध्यानपरायणः ।। वायुभक्षो निराहारो अङ्गुष्ठेन भुवं स्पृशन् ।। २२।।

एवं द्वादश वर्षाणि तैः सार्धं पृथिवीपतिः ॥ तुतोष तपसा तस्य तेषां चापेक्षया हरः ॥२३॥
प्रत्यक्षमगमत् तेषां सन्निधौ तस्य पार्थिव ॥ ते दृष्ट्वा देवदेवेशं शूलपाणिमुमापतिम् ॥२४॥
द्वादशादित्यसङ्काशं ज्वलन्तं स्वेन तेजसा ॥ शिरोभिरवनिं गत्वा प्रणेमुस्ते महर्षयः ॥ २५॥
शरणं भव देवेश अशोकस्य सदाशिव ॥ इति तेषां वचः श्रुत्वा तानाह भगवान् शिवः ॥२६॥
वरं ब्रूत महाभागा तद्ददाम्यविलम्बितम् ॥ इत्युक्ते शूलिना राजा प्रणम्येदं वचोऽब्रवीत् ॥२७॥
अशोक इति मे नाम प्रथितं वृषभध्वज ॥ पुत्रैः पौत्रैः परिवृतो दौहित्रैरपि शङ्कर ॥२८॥
मोदमानः स्थितो राज्ये दुःखानामविशारदः ॥ मृतास्तेद्य महादेव हृतं राज्यं परैर्मम ॥२९॥
वीतं सर्वधनं देव विहायैकं त्रिलोचन ॥ शोकेन महता देव आविष्टः पार्वतीपते ॥३०॥
इहागतोऽस्मि देवेश त्वामहं शरणङ्गतः ॥ पितामहैर्मम विभो सङ्गत्य सुरसत्तम ॥३१॥
तेषामेव प्रभावेण त्वामहं दृष्टवानज ॥ अतः परं मम विभो यत्कृत्यं तत्प्रयच्छ नः ॥३२॥
ततस्तमाह राजानं शङ्करं प्रणयादिदम् ॥ जीवन्तु सुहृदस्ते वै ये मृता नृपते युधि ॥३३॥
मत्प्रसादादरीन् सर्वान् त्वं जेष्यसि न संशयः ॥ शोको न भविता तात अद्य प्रभृति सुव्रत ॥३४॥
प्रसादान्मम राजेन्द्र सिद्धिर्भवतु शाश्वती ॥ आश्रमस्तव राजेन्द्र लोके ख्यातो भविष्यति ॥३५॥
तीर्थञ्च तव नाम्नेदं ख्यातं भवतु पार्थिव ॥ लिङ्गञ्च तव राजेन्द्र अशोकेश्वरसंज्ञया ॥३६॥
पूज्यं भवतु त्रैलोक्ये सर्वपापहरं भवेत् ॥ पूर्वेषां तव राजेन्द्र आश्रमाणि महान्ति च ॥३७॥
तीर्थानि तेषां राजेन्द्र तत्तत्संज्ञाभिरप्युत ॥ भवन्तु मत्प्रसादेन सर्वपापहराणि वै ॥ ३८॥
वैशाखे तु विशाखायामेषु स्नात्वा नरोत्तमाः ॥ अशोकेशं पूजयन्ति गन्धपुष्पाक्षतादिभिः ॥३९॥
मत्प्रसादेन ते शोकं सप्तजन्म न चाप्नुयुः ॥ सप्तजन्मकृतं पापं स्नानात् शुद्ध्यन्ति ते नराः
॥४०॥
गच्छ त्वं पालय विभो राज्यं निहतकण्टकम् ॥ पुत्रैः पौत्रैः परिवृतो दौहित्रैर्ज्ञातिबान्धवैः ॥४१॥
सहितः सर्वभूतैस्त्वं चिरं पालय मेदिनीम् ॥ इति दत्वा वरं शम्भुरशोकाय नृपोत्तम ॥४२॥
अनुमन्य च राजर्षीन् तत्रैवान्तरधीयत ॥ अशोकेशस्य पुरतस्तीर्थं शोकविनाशनम् ॥ ४३॥
अशोकस्य नृपश्रेष्ठ स्थितं सर्वमलापहम् ॥ तस्मात् पश्चिमतः किञ्चिद् विंशद्धस्तप्रमाणतः
॥४४॥
अग्निद्युतेः स्थितं तीर्थं सर्वकिल्बिषनाशनम् ॥ तस्मान्नैर्ऋत्यदेशे तु त्रिंशद्धस्तप्रमाणतः ॥४५॥
अग्निबाहोर् नृपश्रेष्ठ स्थितं तीर्थवरं प्रभो ॥ तस्माद्वायव्यदिग्भागे पञ्चाशद्धस्तमानतः ॥ ४६ ॥

तीर्थं मेधातिथे राजन् स्नातानां सिद्धिदायकम् ॥ तस्मात्पश्चिमदिग्भागे शरपाते स्थितं पुरोः ॥४७॥
तीर्थं पुण्यतमं राजन् स्नातानां मोक्षदायकम् ॥ अशोकपञ्चकमिति सर्वलोकेषु विश्रुतम् ॥४८॥
अशोकपञ्चके स्नात्वा अशोकेशं समर्चयेत् ॥ सर्वेषामेवदुःखानां ध्वंसो भवति निश्चयात् ॥४९॥
अशोकेशस्य माहात्म्यं ये श्रुण्वन्ति नरा भुवि ॥ तेषां नृप सुखध्वंसो जायते न कदाचन ॥ ५०॥
इतिश्रीस्कान्दे सनत्कुमारसंहितायां गोकर्णखण्डे अशोकपञ्चकमहिमानुवर्णनं नाम एकोनसप्ततितमोऽध्यायः ॥६९॥

 अध्यायाः अकारादि <<BACK  ॥ अध्यायः ७० ॥  NEXT>>  श्लोक संख्या–६८

## ॥ कामाघनाशिनी–कामेश्वरमहिमानुवर्णनम् ॥

कामाघनाशिनी नदी–कामेश्वरः(अघनाशिनीग्रामे)

सूत उवाच ॥

तस्मादाग्नेयदिग्भागे क्रोशमध्येऽस्ति निम्नगा ॥ कामाघनाशिनी नाम सर्वपापहरा शुभा ॥ १॥
तस्यां स्नात्वा पुरा कामो गोकर्णक्षेत्रमागमत् ॥ हरे कृतमहाद्रोहाद् विमुक्तो मन्मथो नृप ॥२॥

शौनक उवाच ॥

ईश्वरे तु कथं द्रोहो मन्मथेन कृतो विभो ॥ कामाघनाशिनी नाम कथं जाता नदी शुभा ॥३॥
कथं स्नानं समकरोत् कथं क्षेत्रं गतः प्रभो ॥

सूत उवाच ॥

शृणु शौनक वक्ष्यामि यत् पृष्टोऽहं त्वयानघ ॥४॥
हरकोपाग्निना दग्धः पूर्वं कामः शुचान्वितः ॥ शिवे कृतस्वाघशान्त्यै त्रिः परीत्य धरामिमाम् ॥५॥
क्षेत्रस्यास्य प्रवेशे तु ह्यनर्हो मदनोऽभवत् ॥ तस्मात् क्षेत्राद्बहिः स्थित्वा तपस्तीव्रमतप्यत ॥६॥
दिव्यवर्षसहस्रं तु लिङ्गं कृत्वा विधानतः ॥ पूजयामास मदनो शिवध्यानपरायणः ॥७॥
ततस्तुष्टो महादेवः प्रत्यक्षमगमत्तदा ॥ दृष्ट्वा नेत्रपथे शम्भुं हर्षोत्कर्षसमन्वितः ॥८॥
तुष्टाव वाग्भिरिष्टाभिः कृताञ्जलिपुटः स्थितः ॥ नमः शिवाय शुद्धाय शान्ताय हरये नमः ॥९॥
शङ्कराय शरण्याय त्रिनेत्राय नमो नमः ॥ सृष्टिस्थितिविनाशानां हेतवे परमात्मने ॥१०॥

देवदेव नमस्तेस्तु पशूनां पतये नमः ॥ देवानां वचनात् पूर्वं त्वयि द्रोहमकारिषम् ॥११॥
तद्दोषशान्तिर्मे भूयाच्छरीरं च वृणे प्रभो ॥ क्षेत्रस्यान्तः प्रवेशं च स्थितिं पूज्यां च तत्र भो ॥१२॥
त्वत्पादाम्बुजभक्तिं च त्वद्भक्तानां च सङ्गमम् ॥ तच्छ्रुत्वा वचनं शम्भुः प्रीत्याह मकरध्वजम्
॥१#३॥
वसुदेवगृहे साक्षाद्भगवान् कमलापतिः ॥ यदावतरणं कुर्यात्तस्य पुत्रत्वमाप्नुहि ॥१४॥
गोकर्णान्तःप्रवेशार्हप्रायश्चित्तं वदाम्यहम् ॥ इत्युक्त्वा भगवान् शम्भुस्त्रिशूलेनाखनत्तदा ॥१५॥
खनिते भूतले गङ्गा पातालादूर्ध्वमागता ॥ उवाच च पुनः कामं शङ्करो वृषवाहनः ॥१६॥
नमः शुद्धाय शान्ताय हरये परमात्मने ॥ सृष्टिस्थितिविनाशानां कारणाय नमो नमः ॥१७॥
इमं मन्त्रं समुच्चार्य स्नात्वा कामाघनाशिनीम् ॥ तस्माद्द्रोहोद्भवात् पापात्तत्क्षणान् मुच्यते नरः
॥१८॥
तस्मात्स्नानं कुरुष्वात्र सर्वपापाद्विमुच्यसे ॥ श्रुत्वेत्थं वचनं शम्भोः स्नानं कृत्वा यथाविधि ॥१९॥
निर्मलः शान्तहृदयः शिवभक्तिसमन्वितः ॥ तत्क्षणादभवत् कामः शिवस्तुतिपरायणः ॥२०॥
हरशम्भो महादेव विश्वेशामरवल्लभ ॥ शिवशङ्कर सर्वेश भक्तवत्सल पाहि माम् ॥२१॥
इति स्तुत्वा हरं भक्त्या वरमन्यमयाचत ॥ लिङ्गमेतत् पूजकानां कामदं भवतु प्रभो ॥२२॥
कामेश्वराभिधानेन सर्वसिद्धिप्रदोऽस्तु वै ॥ अघनाशननाम्नीयं नदीनां प्रवरा भवेत् ॥२३॥
चैत्रमासि सिते पक्षे त्रयोदश्यां तु यो नरः ॥ स्नात्वा सम्पूज्य कामेशं सर्वान् कामानवाप्नुयात्
॥२४॥
इति कामेरितं श्रुत्वा शङ्करः प्रत्यभाषत ॥२५॥
यदुक्तं भवता सर्वं तद्भवेन्मन्मथाधुना ॥ ब्रह्महा गुरुतल्पी वा स्वर्णस्तेयी च मानवः ॥२६॥
सुरापानरतो वापि संयुक्तोप्युपपातकैः ॥ स्नात्वा सम्पूज्य कामेशं सर्वान् कामानवाप्नुयात् ॥२७॥
सर्वपापविनिर्मुक्तो यात्रार्हः स भवेत् द्विज ॥ गोकर्णस्य द्विजश्रेष्ठ किमु सन्मार्गवर्तिनः ॥२८॥
इति दत्वा वरान् शम्भुः मन्मथं पुनरब्रवीत् ॥

---

## कामेश्वरः(गोकर्णे) कामतीर्थं च

मया साकं प्रविश भो गोकर्णं मामकं स्मर ॥२९॥
श्रुत्वेत्थं देवदेवेन साकमागत्य मन्मथः ॥ क्षेत्रं प्रविश्य गोकर्णं दृष्ट्वा सर्वं शिवात्मकम् ॥३०॥

कृतकृत्यमिवात्मानं मन्यमानोऽचरत्तपः ॥ कोटितीर्थस्य सविधे किञ्चिद्धरिहरालयात् ॥३१॥
उदीच्यां दिशि कामस्तु कृत्वाश्रमपदं शुभम् ॥ लिङ्गं तत्र प्रतिष्ठाप्य तदग्रे तीर्थमुत्तमम् ॥३२॥
जितेन्द्रियो निराहारः शिवपूजापरोऽभवत् ॥ तस्मिंस्तथा वर्तमाने प्रत्यक्षत्वमगाद्धरः ॥३३॥
पुनः कामस्य विप्रेन्द्र कृपया परमेश्वरः ॥ दिव्यवर्षसहस्रान्ते गौर्या साकं सदाशिवः ॥३४॥
उवाच चचनं श्लक्ष्णं मन्मथं प्रति शौनक ॥ ब्रूहि यत्तेऽभिलषितं वरं मत्तो गृहाण भो ॥३५॥
श्रुत्वेत्थं भगवद्वाक्यमुन्मील्य नयने स्मरः ॥ दृष्ट्वा देवं प्रणम्याथ स्तुत्वा वव्रे मनोगतम् ॥३६॥
नमस्ते देवदेवेश भक्तवत्सल धूर्जटे ॥ मयाऽर्चितमिदं लिङ्गं ख्यातं मन्नामतो भवेत् ॥३७॥
पूजकानां नृणां देव वाञ्छितार्थप्रदायकम् ॥ मया कृतमिदं तीर्थं कामतीर्थाभिधानकम् ॥३८॥
दर्शनात् स्पर्शनात् स्नानात् कामदं मोक्षदं भवेत् ॥ सिद्धोऽस्मि सर्वव्यापी च त्वत्प्रसादादहं प्रभो ॥३९॥
इति कामेरितं सर्वं श्रुत्वा त्रिपुरसूदनः ॥ पुनराह शिवः कामं मन्मथ शृणु मे वचः ॥४०॥
चैत्रशुक्लत्रयोदश्यामत्र स्नात्वा सदाशिवम् ॥ यजन्ति ते कामदेव सर्वान् कामानवाप्नुयुः ॥४१॥
इति दत्वा वरं शम्भुस्तत्रैवादर्शनं गतः ॥ कृतकृत्योऽथ वै कामो यथा कामं जगाम ह ॥४२॥
कामेश्वराभिधं लिङ्गं दर्शनात् पूजनादपि ॥ सर्वकामप्रदं राजन् देहान्ते मोक्षदं नृणाम् ॥४३॥

---

## शम्भुकथा

सूत उवाच ॥

शृणु राजन् प्रवक्ष्यामि इतिहासं पुरातनम् ॥ पुरा कलिङ्गदेशीयो ब्राह्मणः शम्भुनामकः ॥४४॥
सदा दुर्जनसंसक्तः कामचारी द्विजाधमः ॥ विटमार्गरतो नित्यं द्यूतचौर्यविशारदः ॥४५॥
स्वधर्मस्य परित्यागी शूद्रवृत्तिरतः सदा ॥ एवं बहुतिथे काले कदचिद्ब्राह्मणाधमः ॥४६॥
निशीथे कामसन्तप्तो मातृसङ्गमथाऽकरोत् ॥ मोहात् स नृपशार्दूल तेन पापेन पीडितः ॥४७॥
लोके दूष्योऽभवत् सोऽपि पश्चात्तापमुपागतः ॥ बभ्राम जगतीं सर्वां मात्रा सह द्विजाधमः ॥४८॥
ऋषीणामाश्रमान् सर्वान् पापमोक्षपरायणः ॥ तिरस्कृतस्तु सर्वैस्तैर्मुनिभिर्भावितात्मभिः ॥४९॥
ततो दूर्वाससं दृष्ट्वा प्रणम्य च पुनः पुनः ॥ प्रसाद्य प्रार्थयामास प्राञ्जलिर्वाक्यमब्रवीत् ॥५०॥
पापोऽहं पापकर्माहं मुनिभिर्दूषितोऽस्म्यहम् ॥ अज्ञानान्मुनिशार्दूल मातृसङ्गमकारिषम् ॥५१॥
एतत्पापविशुद्ध्यर्थमुपायं वद मे मुने ॥ अनाथे पापनिरते कृपां कुरु दयानिधे ॥५२॥

दूर्वासा उवाच ॥

त्वया कृतस्य पापस्य निष्कृतिर्नास्ति कुत्रचित् ॥ त्वया सम्भाषणाद्विप्र पातकं भवति ध्रुवम् ॥५३॥
तथापि तव पापस्य निष्कृतिं शृणु भो द्विज ॥ गोकर्णाख्यं महाक्षेत्रं सर्वपापनिषूदनम् ॥५४॥
पश्चिमाम्बुधितीरे तदस्ति शैवं महोदयम् ॥ तत्रास्ति सर्वपापघ्नी नदी कामाघनाशिनी ॥५५॥
शिवत्रिशूलजनिता मन्मथस्याघशान्तये ॥ तत्र स्नात्वा तु कन्दर्पः शिवद्रोहाद्विमुक्तवान् ॥५६॥
मात्रा सहैव त्वं विप्र गच्छ गोकर्णमद्य वै ॥ स्नात्वा कामाघहारिण्यां जपन् पञ्चाक्षरं मनुम् ॥५७॥
तत्र कामेश्वरं लिङ्गं पूजयस्व यथाविधि ॥ एवं द्वादशवर्षं तु कुरु नित्यमतन्द्रितः ॥५८॥
एवं कृते त्वया विप्र तव पापं विनश्यति ॥ इति दूर्वाससो वाक्यं श्रुत्वा तं प्रणिपत्य च ॥५९॥
गोकर्णं क्षेत्रमासाद्य मात्रा सह द्विजस्तदा ॥ कामाघनाशिनीं दृष्ट्वा तत्रोवास चिरं द्विजः ॥६०॥
स्नात्वा कामाघहारिण्यां कामेशं परिपूजयन् ॥ जपन् पञ्चाक्षरीं विद्यां मात्रा सह कुरूद्वह ॥६१॥
ततो द्वादशवर्षान्ते तत्क्षेत्रं प्रविवेश ह ॥ गोकर्णस्थेषु तीर्थेषु कोटितीर्थादिषु द्विजः ॥६२॥
स्नात्वा तल्लिङ्गमभ्यर्च्य सार्वभौमं महाबलम् ॥ कृतकृत्योऽभवच्छम्भुर्मात्रा सह तदा नृप ॥६३॥
ततः स्वभवनं प्राप्य मात्रा सह यथासुखम् ॥ स्वाचारनिरतः शान्तो ब्रह्मध्यानपरायणः ॥६४॥
भुक्त्वा भोगाननेकांस्तु देहान्ते मोक्षमाप्तवान् ॥ एवं कामाघनाशिन्या माहात्म्यं कथितं तव ॥६५॥
महापातकयुक्तो वा संयुक्तोऽप्युपपातकैः ॥ स्नात्वा कामाघनाशिन्यां नरो मुच्येत पातकैः ॥६६॥
कामेश्वरं पूजयित्वा सर्वान् कामानवाप्नुयात् ॥ इदं कामाघहारिण्या माहात्म्यं यः शृणोति वै
॥६७॥
सर्वपापविनिर्मुक्तः शिवलोके महीयते ॥

इतिश्रीस्कान्देसनत्कुमारसंहितायां गोकर्णखण्डे कामाघनाशिनीमहिमानुवर्णनं नाम सप्ततितमोऽध्यायः ॥७०॥

अध्यायाः अकारादि <<BACK ॥ अध्यायः ७१ ॥ NEXT>> श्लोक संख्या–६५

## ॥ रावणेश्वरादिलिङ्ग– कुबेरेश्वर,वैश्रवणतीर्थमहिमानुवर्णनम् ॥

### रावणादीनामुत्पत्तिः

सूत उवाच ॥

श्लेष्मातकमिति ख्यातं वनं सिद्धनिषेवितम् ॥ दक्षिणस्यां तु राजेन्द्र रुद्रयोन्याः स्थितं शुभम् ॥१॥

पौलस्त्यास्तत्र तप्ता वै बहवः सिद्धिमागताः ॥ तत्रस्थो रावणो राजन् परां सिद्धिमुपागतः ॥२॥
तन्माहात्म्यं वदाम्यद्य शृणुष्व नृपपुङ्गव ॥ पुरा पुलस्त्य नामाऽभूद्ब्राह्मणो मानसः सुतः ॥३॥
तप्यमानस्तपस्तीव्रं मेरोः सानौ महामुनिः ॥ तृणबिन्द्वभिधानस्य राजर्षेः कस्यचित् सुताम् ॥४॥
उपयेमे विधानेन मुनिस्तां वरवर्णिनीम् ॥ तस्यां विश्रवसं नाम तनयं सोभ्यजीजनत् ॥५॥
स विश्रवास्तपोनिष्ठो गुणैः सर्वैः पितुः समः ॥ उपयेमे भरद्वाजतनयां वरवर्णिनीम् ॥६॥
तस्यां वैश्रवणो नाम पुत्रोऽभूद्विश्रवस्य हि ॥ स चिराय तपस्तेपे ब्रह्माणं प्रति भारत ॥७॥
तस्मात् समग्रमैश्वर्यं विमानं पुष्पकाभिधम् ॥ लब्ध्वा लङ्कामब्धिमध्ये निवासाय पुरीमपि ॥८॥
लोकपालत्वमप्यदात्तस्य तुष्टः पितामहः ॥ धनानामीश्वरत्वं च अमरत्वञ्च दत्तवान् ॥९॥
विमानं तत्समारुह्येत्यायाति धनेश्वरः ॥ श्रिया परमया युक्तो ज्वलन् कीर्त्या समन्वितः ॥१०॥
तं ददर्श कदाचित्तु सुमाली नाम राक्षसः ॥ गोकर्णाभिमुखं यान्तं विमानेनार्कवर्चसा ॥११॥
शतशृङ्गे तपस्यन्तं पितरं दृष्टुमागतम् ॥ सुमाली स्पृहयामास दृष्ट्वा वैश्रवणश्रियम् ॥१२॥
तत्सम्पदर्थी रक्षेन्द्रः स्वसुतामिदमब्रवीत् ॥ कैकेशी नाम सा राजन् सुमालिदुहिता शुभा ॥१३॥
पुत्रि प्रदानकालस्ते भर्तारं वरय स्वयम् ॥ त्वां दातुमागतं विद्धि पातालादवनीतलम् ॥१४॥
लङ्का नाम पुरी सेयं मदीया वरवर्णिनी ॥ त्यक्त्वा चेमां पुरीं रम्यां पालालं गतवानहम् ॥१५॥
सभ्रातृकः सभृत्यश्च भीत्या विष्णोर्महात्मनः ॥ तस्मात् पतित्वे वरय मुनिं विश्रवसं शुभे ॥१६॥
सदृशं राजराजस्य तस्मात् पुत्रमवाप्स्यसि ॥ त्वया त्राता भविष्यन्ति सर्वे तव सुहृज्जनाः ॥१७॥
सा तथेति प्रतिज्ञाय गता विश्रवसोऽन्तिकम् ॥ तां दृष्ट्वा विश्रवा राजन् श्रीमिवायतलोचनाम्
॥१८॥
विस्मयोत्फुल्लनयनस्तामपृच्छन्महातपाः ॥ कासि भद्रे कुतश्चासि किमर्थं चागता वनम् ॥१९॥
सा तमाहानवद्याङ्गी प्रणम्य शिरसा तदा ॥ राक्षसेन्द्रस्य तनया सुमालेर्विद्धि मां मुने ॥२०॥
तेनाहं प्रेषिता विप्र त्वत्सकाशमिहागता ॥ कन्याऽहं कैकसी नाम शेषं त्वं ज्ञातुमर्हसि ॥२१॥
ततो मुनिर्ज्ञानदृष्ट्या ज्ञात्वा तस्या मनोगतम् ॥ विश्रवा मुनिशार्दूलो तां कन्यां पुनरब्रवीत् ॥२२॥
पुत्रकामासि कल्पाणि मत्तस्त्वं कामतोऽनघे ॥ अतीव दारुणे काले यस्मान्मां प्रत्युपागता ॥२३॥
तस्मात् क्रूरा भविष्यन्ति पुत्रास्तव शुभानने ॥ तेषां कनीयान् धर्मज्ञः पुत्रो वंशकरो भवेत् ॥२४॥
ततस्तेनैवमुक्ता सा सुमालितनया शुभा ॥ अकरोद्भर्तृशुश्रूषां रूपयौवनशालिनी ॥२५॥
तस्यामभूत् क्रूरकर्मा राक्षसोऽतीवदारुणः ॥ दशास्यो विंशतिभुजो नीलाञ्जनचयोपमः ॥२६॥

ततश्च कुम्भकर्णोऽभून्महाकायो महाबलः ॥ ततः शूर्पनखा जज्ञे दारुणाऽतीवभीषणा ॥२७॥
ततो विभीषणो जज्ञे साक्षाद्धर्म इवापरः ॥ एवं ते राक्षसा राजन् बभूवू रावणादयः ॥२८॥

---

## रावणेश्वरादिलिङ्ग

गोकर्णं ते समासाद्य तपस्तेपुर्महाबलाः ॥ शिरांसि स्वानि विच्छिद्य जुहाव दशकन्धरः ॥२९॥
निराहारो जपन् ब्रह्म तपो घोरमतप्यत ॥ कुम्भकर्णोऽपि राजेन्द्र धर्मबुद्धिर्विभीषणः ॥३०॥
तेषां तपः प्रभावेण ब्रह्मा प्रत्यक्षतां गतः ॥ ददौ तेषां वरान् ब्रह्मा यथाभिलषितान्नृप ॥३१॥
अणिमादिमहासिद्धिमवध्यत्वं च रावणः ॥ युद्धे समस्तभूतेभ्यः ऋते मानुषजातितः ॥३२॥
कुम्भकर्णो महानिद्रां वव्रे पापमतिस्तदा ॥ विभीषणोऽपि धर्मात्मा वव्रे धर्ममतिं नृप ॥३३॥
अमरत्वं विष्णुभक्तिं लब्धवान् स विभीषणः ॥ एवं दत्वा वरान् ब्रह्मा रावणादिकरक्षसाम् ॥३४॥
तत्रैवान्तर्दधे लिङ्गे अभिन्नो भिन्नदर्शनः ॥

सूत उवाच ॥

रावणेनार्चितं लिङ्गं कुम्भकर्णेन पूजितम् ॥३५॥
विभीषणेन च विभो स्थापितं पूजितं नृप ॥ ये पूजयन्ति मनुजा दीर्घायुष्या भवन्ति ते ॥३६॥

---

## श्लेष्मातकं वनम्

गोकर्णे तद्वनं श्रेष्ठं सर्वसिद्धनिषेवितम् ॥ तत्र श्लेष्मातके सिद्धान्निबोध कुरुनन्दन ॥३७॥
हेतिर्नाम महारक्षः प्रहेतिश्च महारथः ॥ विद्युत्केशोम्बरीषश्च पुलस्त्यो विश्रवा मुनिः ॥३८॥
राजराजश्च यक्षेन्द्रो विश्वाचित्तिर्विधूरथः ॥ एते चान्ये च बहवस्तत्र सिद्धिमुपागताः ॥३९॥

सूत उवाच ॥

एवं लब्ध्वा वरं रक्षो ऐश्वर्यबलदर्पितः ॥ रावणो मातृवाक्येन दैत्यसङ्घसमन्वितः ॥४०॥
स सङ्गरे वैश्रवणं विजित्य सह सैनिकम् ॥ अपहृत्य पुरीं लङ्कां विमानमपि पुष्पकम् ॥४१॥
लङ्कायां वसतिं कृत्वा बुभुजे विषयान् प्रियान् ॥ बहुदैत्यसमायुक्तः स्वयं राजाऽभवत् तदा ॥४२॥
लोकानां बाधको नित्यं किमन्यच्छ्रोतुमिच्छसि ॥

---

## कुबेरेश्वर,वैश्रवणतीर्थ

शतानीक उवाच ॥

निर्यासितो वैश्रवणो रावणेन पुराद्बहिः ॥४३॥

स्थानभ्रष्टो राजराजः किमकार्षीच्च तद्वद ॥

सूत उवाच ॥

निर्यासितो वैश्रवणो रावणेन दुरात्मना ॥४४॥

गोकर्णे तु तपस्यन्तं पितरं चागमत्ततः ॥ प्रणम्य पितरं भक्त्या इदं वचनमब्रवीत् ॥४५॥

गुरो मदीयां वसतिं लङ्कां वै रावणोऽसुरः ॥ अपहृत्य स्वयं तात स्थितस्तत्राकुतोभयः ॥४६॥

विमानं पुष्पकं नाम स्वयं भुङ्क्ते दुराशयः ॥ स्थानं मे नास्ति भगवन् वस्तुं मे तत् प्रकल्पय ॥४७॥

इति पुत्रोदितं श्रुत्वा विश्रवा तमुवाच ह ॥

विश्रवा उवाच ॥

शृणु पुत्र प्रवक्ष्यामि कार्यं हितमनुत्तमम् ॥४८॥

दुर्जनैः कलहो नित्यं मैत्रं चापि महामते ॥ दुर्जनैः सह संवादः परिहार्यो मनीषिणा ॥४९॥

तस्मात्त्वमपि गोकर्णे कृत्वाश्रमपदं शुभम् ॥ तपश्चर महाबुद्धे प्रत्यक्षीकुरु शङ्करम् ॥५०॥

इति श्रुत्वा पितुर्वाक्यं पादौ तस्याभिवन्द्य च ॥ गोकर्णं क्षेत्रमासाद्य वने श्लेष्मातके शुभे ॥५१॥

कृत्वाश्रमपदं रम्यं निराहारो जितेन्द्रियः ॥ प्रतिष्ठाप्यादिगोकर्णादाग्नेय्यां लिङ्गमुत्तमम् ॥५२॥

अभ्यर्चयन्ननुदिनं गन्धपुष्पाक्षतादिभिः ॥ स्वतीर्थे स्नानमाधाय ब्रह्मध्यानपरायणः ॥५३॥

एवं तपस्यतस्तस्य प्रत्यक्षत्वमगाद्धरः ॥ तपस्यन्तं वैश्रवणं दृष्ट्वा चाह वृषध्वजः ॥५४॥

वरं वरय भद्रन्ते यत्ते मनसि वर्तते ॥ नितरां तव तुष्टोस्मि घोरेण तपसाऽनघ ॥५५॥

इत्युक्ते शम्भुना वव्रे पौलस्त्यो वाञ्छितान् वरान् ॥ अष्टौ निधीन् महापद्मप्रमुखान् महतीं श्रियम् ॥५६॥

अमरत्वं च कैलासं विश्रान्तीमलकापुरीम् ॥ उदक्ककुभ ईशत्वं शिबिकां च मनोहराम् ॥५७॥

यदि तुष्टोसि देवेश देहि मे वृषभध्वज ॥ इत्युक्ते धनदेनैवं उवाच परमेश्वरः ॥५८॥

तथास्तु वै राजराज यदुक्तं भवतानघ ॥ राजाधिराजमन्त्रेण स्नात्वा सरसि तावके ॥५९॥

लिङ्गं वैश्रवणेशाख्यं भक्त्या सम्पूजयन्ति च ॥ तेषां लक्ष्मीः स्थिरा भूयान्नश्येयुः पातकान्यपि ॥६०॥

सर्वपापैर्विनिर्मुक्ता मयि भक्तिः स्थिरा भवेत् ॥ ऊर्जशुक्लत्रयोदश्यां स्नानमत्र प्रशस्यते ॥६१॥

इति दत्वा वरं तस्मै साकं तेनेन्दुभूषणः ॥ जगाम कैलासगिरिं गीर्वाणगणवन्दितः ॥६२॥